भगवतो श्रीरमणमहर्षेः

अन्तेवासिना

श्रीकाव्यकण्ठवासिष्ठगणपतिमुनिना प्रणीतः

उमासहस्रादिग्रंथसंग्रहः

संपादकः

अ. मधुकेश्वरराव

विजयानगरम् (आंध्र प्रदेश)

042

ॐ

Sri Pudipeddi Lakshmanamurty
Gam - with love
Madhukeswara
8-2-1974
Anakapalli

भगवतो श्रीरमणमहर्षेः

अन्तेवासिना

श्रीकाव्यकण्ठवासिष्ठगणपतिमुनिना प्रणीतः

उमासहस्रादिग्रन्थसङ्ग्रहः

(उमासहस्रं महाकाव्यम्, मातृतत्त्वप्रकाशिका, जैमिनीय-
तर्कवार्तिकानि, शिवस्तवराजः, तन्त्रहृदयम्)

W. Prabhakar Sastry
1979.

संपादकः

अ. मधुकेश्वररावः

विजयानगरम् (आंध्र प्रदेश)

५४७

प्रकाशकः
अ. मधुकेश्वरराव:
विजयानगरम् (आंध्र प्रदेश)

Copy Right

मुद्रक :
नरेन्द्रकुमार प्राणलाल आचार्य
आचार्य मुद्रणालय,
कर्णघंटा, वाराणसी,
(उत्तर प्रदेश, भारत)

५००—अगस्त १९७१.

ॐ

नमो भगवते श्रीरमणाय

Umasahasra is not an imaginative mental idea of the poet sage Sri Kavyakantha. Indra, the first god had darsan of UMA the parashakti as far as the truth comes from Kenopanishad. The poet has also the supreme divine vision of 'UMA' and the whole Kavya had origin from the Upanishadic sources of Truth. The Kavi is a siddha, a Genius, a master of Vedas, Sanskrit language and literature, besides he is Mantra Drishta, a Bhashyakara on Rik Samhita. He had perfect para–Pashyanti Jnana Vibhuti. By the grace of his preceptor, Bhagvan Sri Ramana Maharishi, and in the presence of Bhagvan this sacred Kavya was completed in twenty days time and the last eight stabakas extempore in few hours time, Prayers to heavens invisible justice, to give harmony, peace, Justice to mundane setbacks, to be faithful, to believe firmly in duty is the charm of this Masterful Mahakavya 'Umasahasra', with a structure of 40 stabakas of 25 slokas in each, recited in 29 metres embraces the whole of Hindu Religious thoughts of Vedas, Upanishadas, Kavyas, Itihasas, Mythology, prosdy and Vibhutis. It pleases any person to his ideals and ideas, be of any religious sect or following, Advaitin, Visisthadvaitin, Dvaitin, Bhakta, Shakta, Kapalika, Pasupatha, Sunyavadin.

In his spiritual quest for perfection. the poet came to the holy feet of Sri Ramana, the sage of Arunachala and by his grace during 1907, while at Chuta Guha composed 'Umasahasra' in praise of Adya Shakti UMA in twenty days time, Bhagvan Ramana Maharishi's spiritual light and blessings graced the whole work. Sri Ganapathi Muni was only Nimitta rather medium; through the trancedental mind of Sri Ganapathi flowed the eternal light of Sri Ramana; this Umasahasra the celestial Kavya of immortality.

पुण्यां चूतगुहासेयं रमणेन महर्षिणा ।
अधिष्ठिता सेवकानां पापहन्त्री विराजते ॥ १ ॥

Sri Ganapathi Muni started to write Umasahasra at Chuta Guha on 26-11-1907. Late Srimati Achchammal was the cause and inspiration for this work. 'UMA' is Vaidik Devata. The Kavya was completed by 15-12-1907. Bhagvan, Sri Narayana Ghanapathi, Sri Vasudeva Sastri and many scholars used to meet daily to hear the version. After a fortnight 'Nayana' had a boil on his middle finger unable to hold the pen. One medical practitioner Punyakirti' operated the boil. On the request of Sri Gambhiram Seshayya, Nayana agreed to complete the Kavya extempore and dictated the rest of 200 slokas on the last day to four lekhakas, Bhagvan was in samadhi. when the Kavya was complete, asked 'Nayana' did you speak what all I have said; Nayana says;

यदस्य महतः काले पारं यातोऽस्मि कर्मणः ।
अनुग्रहोऽयमाचार्यरमणस्य महात्मनः ॥ २ ॥

The time and date of Kavya, Ganapathi Muni says;

प्लवङ्गे कार्तिके कृष्णे पष्ठ्यां मंगलवासरे ।
स्तोत्रमेत्समारब्धं तटे शोणधरामृतः ॥ ३ ॥

एकादश्यां शुक्लपक्षे मार्गशीर्षे रवेर्दिने ।
नीतं समाप्तिं विंशत्या दिनानां व्रतीना मया ॥ ४ ॥

About the Kavya Nayana speaks;

दर्शितं रमणस्यार्षेर्यावद् वाक्यैर्मिताक्षरैः ।
यावच्चापि कृपादानं विज्ञातमुपदेशतः ॥ ५ ॥

तंत्रेभ्योऽवगतं यावद्ग्रामाचारशासिना ।
यावत्परमपुण्यासु कुलगोष्ठीषु च श्रुतम् ॥ ६ ॥

विदितं विविधं यावदितिहासविलोकनात् ।
यावदप्यात्मना दृष्टं तपता विपुलं तपः ॥ ७ ॥

अधिकृत्य महामायां भुवनानामधीश्वरीम् ।
अत्र स्तोत्रे प्रसङ्गेषु समस्तं तत्प्रदर्शितम् ॥ ८ ॥

In the end, the Kavi concludes about the work;

अत्रापि गुणलेशाश्चेदालंकारिकसंमताः ।
सुप्रतापसरस्वत्या निर्गश्चान्त्यानर्गलम् ॥ ९ ॥

Finally the Kavya was recited before "Devi Maraka tamba" and many disciples, scholars of Arunachala assembled. Bhagvan attended the recitation. Ganapathi Muni speaks of the work;

यदि गायन्निमं ग्रन्थमुत्तरेदा पदःकृति ।
महिमा स महेश्वर्याः शीर्षं स्यादन्नतं नमे ॥
अयमद्यापदप्रीतेरुद्गारो वाङ्मया कृतिः ।
अर्धकश्चिदनेनापि सतां यदि मया जितम् ॥ १० ॥

Due to an unfortunate political incident, the original Umasahasra is lost in Kundalini River bed at Padavedu when Nayana was at Renuka Peetha. One disciple Sri Dooraswamy left the book in river bed and by an unusual flood at night the work disappeared mysteriously.

After an year 'Nayana' while on pilgrimage to Southern Khetras came to Jambukeswaram and by the grace of 'Akhilanda Naiki Devi' started rewriting the Kavya, but could only recollect 700 slokas in his mind, Sri Ramakrishna, a disciple was attending all the time and this work of 700 slokas was named as UMA stuti or UMA Saptha Sathi. This work was sent to Bhagawan. This was later developed into 'Umasahasra' of one thousand slokas by 1921 and finalised during 1923 at Chuta Guha. In all Umasahasra has been rewritten seven times and finally this present work was completed by 1923.

Matru Tatwa Prakasika' of 33 slokas with Subodhinya Vyakhaya by 'Nayana' was written at Aurobindo Ashrama when Nayana visited Sri Aurobindo and Sri Mata during August 1928. This is incomplete.

Many disciples of old generation still live to speak of Late Ganapathi Muni, his life and works. Amongst them, one enlightened soul still exists to speak of Sri Nayana.

more closely. He is Sri Devendra Subramanya Viswamitra B. A. LL. B. Sirsi the most deserving, pious and pure devotee of 'Nayana'. Srimati Kamakshamma. his noble wife is very beloved to 'Nayana' from her childhood. Sri Viswamitra and Srimati Kamakshamma are blessed by 'Nayana' as well as their loving children Smt. Indrani Pundit, Sri Divaspathi, Smt. Manorama Divaspathi, Sri Brahmanaspathi M. A. LL. B. (a bright sanskrit scholar). It is not that Sri Viswamitra holds copyrights for all the works of Ganapathi Muni, he is a rare gem amongst Nayanas' disciples, I mean 'Priya Sishya', who greatfully preserved all the works of 'Nayana' with extreme faith, love and devotion for posterity. I am always thankful, and indebted to Sri Viswamitra, his wife and children for helping me to undertake this holy task.

Sri Ganapathi Muni stayed with Late Sri Mahabaleswar Krishnappa Hegde Kodsar Kanchikay, for many months, His son Sri Gopalakrishna has kindly contributed to print these valuable manuscripts as a token of devotion and spiritual service in remembrance of his late father's love to 'Nayana', M/s Totkar Urban Bank M/s Gajanan Stores, Sri M. S. Bhatt M. A. LL. B., M/s V. K. Dhakappa & Sons, Sirsi, have Kindly helped. I am thankful.

Jaminiya Tarka Vartika–Sivastavaraja–Tantra Hridaya are very old works of Nayana.

I am thankful to my friend Sri Pranlal Acharya M. A. (Sanskrit) who has kindly gone through all the proofs and to the staff of Acharya Mudranalaya who have deligently completed the work in time.

Bhagvan's grace and blessings be ever on the noble learned souls of Bharat.

Varanasi,
Sravana Poornima
Virodhikritu.

Madhukeswara

दिवङ्गतस्य विदुषः श्रीमतः

टी. वी. कपालशास्त्रिणः

मधुरस्मृतौ समर्पितोऽयं ग्रन्थः

मधुकेश्वरेण

श्रीवासिष्ठगणपतिमुनिः

श्रीमहाबलेश्वर कृष्णप्पा हेग्डे



श्रीमधुकेश्वर, श्री डी. एस. विश्वामित्र

उमासहस्रम्

महाकाव्यम्

प्रथमः स्तबकः

अखिलजगन्मातोमा तमसा तापेन चाकुलानस्मान् ।
अनुगृह्णात्वनुकम्पासुधार्द्रया हसितचन्द्रिकया ॥ १ ॥

निखिलेषु प्रवहन्तीं निरुपाधिविमर्शयोगदृश्योर्मिम् ।
अजरामजाममेयां कामपि वन्दे महाशक्तिम् ॥ २ ॥

सा तत्त्वतः समन्तात्सत्यस्य विभोस्तता तपश्शक्तिः ।
लीलामहिलावपुषा हैमवती तनुषु कुण्डलिनी ॥ ३ ॥

परमः पुरुषो नाभिर्लोकानां सत्य उच्यते लोकः ।
परितस्ततः सरन्ती सूक्ष्मा शक्तिस्तपो लोकः ॥ ४ ॥

अन्तर्गूढार्थानां पुरुषाग्नेर्धूमकल्प उद्गारः ।
शक्तिज्वालाः परितः प्रान्तेष्वभवज्जनो लोकः ॥ ५ ॥

अतिसूक्ष्मधूमकल्पं लोकं ततमाख्ययाऽन्यया नाकम् ।
एतं ततोऽपि सूक्ष्मा व्याप्ताऽन्तरतः परा शक्तिः ॥ ६ ॥

धूमान्तरोष्मकल्पा शुद्धज्वालोपमा च या शक्तिः ।
तां दिवमाहुः केचन परमं व्योमापरे प्राहुः ॥ ७ ॥

उद्गीर्णधूमकल्पो योऽयमपारो महाञ्जनो लोकः ।
व्योमान्तरिक्षगगनप्रभृतिभिरिभिधाभिराहुस्तम् ॥ ८ ॥

प्रान्तेषु कोऽपि शक्तेः पृथगात्मा वियदुपाधिसङ्गेन ।
परमात्मनो विभक्तः स्वयमभिमन्ता विनिष्पेदे ॥ ९ ॥

दक्षः परोक्षमुदितः पन्था एष त्विषां जनो लोकः ।
तद्गर्भे लब्धात्मा कथिता दाक्षायणी शक्तिः ॥ १० ॥

सत्याः प्रागपि शक्तेः प्रादुर्भावः स कीर्त्यते प्रथमः ।
ईशाभिमानमय्याः पृथगभिमानित्वनिष्पत्त्या ॥ ११ ॥

आकाशस्य सुतैवं लक्षणया वस्तुतः प्रसूः शक्तिः ।
अदितेर्दक्षो दक्षाददितिरिति श्रुतिरबाधैवम् ॥ १२ ॥

जगतां मातापितरौ सती-भवौ केऽपि पण्डिताः प्राहुः ।
अदिति-प्रजापती तावपरेषां भाषया विदुषाम् ॥ १३ ॥

दिव्यपुमाकृतिमीशे बिभ्रति लीलार्थमस्य रमणाय ।
दिव्यवनिताकृतिं सा बभार माता च भुवनानाम् ॥ १४ ॥

भासुरहेमाभरणां बहुशोभामीश्वरप्रमोदकलाम् ।
मूर्तिं पावनकीर्तिं तां हैमवतीमुमामाहुः ॥ १५ ॥

तस्य प्रथमः साक्षी भुवनजुषां नयनशालिनां मध्ये ।
वपुषः किलादिसुदृशो निरुपमपुण्यो निलिम्पपतिः ॥ १६ ॥

पल्लवमृदु वेदिगत-ज्वलनपवित्रं महार्घमणिकान्तम् ।
नवचन्द्रखण्डसौम्यं शिवसुदृशस्तत्स्मरामि वपुः ॥ १७ ॥

केचन गौरीं देवीं शीताद्रेर्दैवतात्मनो जाताम् ।
कथयन्ति स्त्रियमुत्तमलावण्यास्वादितो गण्याम् ॥ १८ ॥

सत्यैव भवतु सेयं कथा तथाऽपि प्रभाषितां भक्तैः ।
तां मूर्तिमादिसुदृशो जानीयात्कमपि तेजोंशम् ॥ १९ ॥

मन्यंते केऽपि घनं पर्वतमुक्तं निगूढया वाचा ।
प्रादुर्भवति गभीरध्वनिरविषह्या यतः शक्तिः ॥ २० ॥

आकाशो गोलेभ्यो यद्वितरति निजरजश्चयादन्नम् ।
नेशाय कीर्त्यते सा संसारे दक्षयागकथा ॥ २१ ॥

व्याप्ताऽपि यन्निगूढा बहिरीक्षकबुद्ध्यपेक्षया नष्टा ।
शक्तिर्यागे तस्मिन्नवसानं तदुदितं सत्याः ॥ २२ ॥

पर्वतनाम्नो वैदिकभाषायां मदियमतिबला शक्तिः ।
घनतो भवति व्यक्ता तदभिहितं पार्वतीजननम् ॥ २३ ॥

तेजोंशतः शिवाविह हिमाचलेऽनुग्रहाय भूमिजुषाम् ।
दत्तो यत्सान्निध्यं लीलाचारित्रमन्यदिदम् ॥ २४ ॥

एतासामार्याणां जानंतः शास्त्रसम्मतं भावम् ।
जानीयुर्भवमहिषीं भुवनानामम्बिकां देवीम् ॥ २५ ॥

द्वितीयः स्तवकः

सहादरेण यो वलक्षपारिजातमालया
गलस्थलीविभूषया ध्वनिं विनैव भाषते ।
महेशपुण्ययोषितो मनोज्ञहास एष मे
विभूतये प्रकल्पतां विधूतये च पाप्मनाम् ॥ १ ॥

निरन्तरश्रिते सदा कृपारसप्रवाहिनी
विलासिनीतनुर्विभोः पुमाकृतेर्विसोहिनी ।
सुधातरङ्गकल्पहासभासुरानना शिवा
पदाब्जलम्बिनो धुनोतु पाप्मनः फलं मम ॥ २ ॥

करोति या बिभर्ति या निहन्ति या जगत्त्रयं
समन्ततो विभाति या न दृश्यते क्वचिच्च या ।
अतीव गुप्तरूपिणी गुरूपदेशमन्तरा
न शक्यते बुधैश्च बोद्धुमन्धकारिसुन्दरी ॥ ३ ॥

महान्धकारबन्धुरस्य भूतसञ्चयस्य या
विनिद्रितस्य सर्वबीजधाम्नि मौनमुद्रिते ।
समन्ततो विजृम्भणाय भासनाय चाभव-
न्महद्विधाय चेष्टितं ममेयमिष्टदेवता ॥ ४ ॥

महेशगर्भतः समस्तभूतबीजकोशतः
किरन्त्यशेषविश्वमप्यपारदिव्यवैभवा ।
विचित्रचेष्टयाऽऽद्यया विधूतनाथनिद्रया
जगन्नुता जयत्यसावनादिशक्तिरद्भुता ॥ ५ ॥

भवं भणन्ति तान्त्रिकास्त्वदाश्रयं तमव्ययं
समामनन्ति वैदिकाः सदर्चिते सदाह्वयम् ।
न कश्चिदर्थभेद एतदाख्ययोर्द्वयोर्भवे-
द्विदेयमादिमं पदं पुमान्तरं नपुंसकम् ॥ ६ ॥

स चेद्भवोऽभिधानतो भवान्यसि त्वमव्यये
समीर्यते स सद्यदि त्वमम्ब भण्यसे सती ।
न तेऽस्ति भावता न शक्तिरूपिणी हि विद्यते
न वेद्मि कालिके कथं सतोऽसतश्च भिद्यते ॥ ७ ॥

जगद्विधानकार्यतः पुरा सुरासुरस्तुते
त्वमम्ब जीवितं भवस्यभावमूलवादिनाम् ।
विकल्पवर्जिता मतिः प्रबोधमूलवादिनां
रसोऽनपेक्ष उत्तमः प्रमोदमूलवादिनाम् ॥ ८ ॥

भवत्यसावतो भवान्यनादिरन्तवर्जितः
जगन्ति माति नित्यमोरसौ तदभ्यधाय्युमा ।
रसात्मिकोऽयतेऽखिलैरसौ ततः शिवोच्यते
परैवमीशितुश्चितिस्त्रिधा बुधैरुदीर्यते ॥ ९ ॥

चितिः परैव कामना रसेन केनचिद्युता
चितिः परैव सर्वदाऽप्यनन्त्यजस्य तु क्रिया ।
चितिः परैव गोचरावभासिका मतिः स्मृता
त्रितैवमन्यथा चितेश्चिरन्तनैरुदीर्यते ॥ १० ॥

चिकीर्षति प्रभौ ज्वलत्त्वदीयकीलसन्तते-
र्विकीर्णधूमजालमेतदम्बरस्थलं ततम् ।
विसृष्टितः पुराऽसि या शिवप्रभुत्वरूपिणी
पृथक्प्रभुश्च लक्षिताऽसि सा सवित्रि पुष्करे ॥ ११ ॥

पुनर्विपाकतो घनीभवद्भिरक्षिगोचरै-
स्ततस्ततः समुज्ज्वलैः खसूक्ष्मरेणुगोलकैः ।
अजाण्डवृक्षकोटिकन्दवृन्दवद्व्यधाः पुरा
महेशदृष्टिमय्युमेऽम्ब मण्डलानि भास्वताम् ॥ १२ ॥

तपोऽग्निधूमजालके भवन्ति तैजसाणवो
भवन्ति जीवनाणवो भवन्ति पार्थिवाणवः ।
क्रमेण तद्विसृष्टिरीशशक्तिपाकवैभवे
सहस्रभानुमण्डलं तु गोचरादि गृह्यताम् ॥ १३ ॥

मयूखमालिमण्डले निधाय पादमुग्रया
मयूखशक्तिरूपया त्वयाऽम्ब चेष्टमानया ।
खकोशतः समाहृतैः पुनस्त्रिरूपरेणुभि-
र्व्यधायि मङ्गलादिभिः सह ग्रहैरियं मही ॥ १४ ॥

विसर्जनेन भूयसाऽपि देव्यतृप्तयेयता
विचेष्टितं विलक्षणं पुनर्व्यधीयत त्वया ।

इहान्तरे वसुन्धरा-मयूखमालिबिम्बयो-
रमुष्य कर्मणः सवित्रि चन्द्रमण्डलं फलम् ॥ १५ ॥

वधू-पुमाकृतो ततो बभूवथुर्युवां शिवे
त्वमीश्वरश्च लीलया विहर्तुमत्र विष्टपे ।
अहो प्रभुं नभस्तनुं त्वदीयगर्भसम्भवा-
ऋणन्ति कालि तत्र चित्रभाषणास्त्वदात्मजम् ॥ १६ ॥

पुमानथो स बिम्बतो हिरण्मयो दिवाकरे
धियाऽपि नैव केवलं हिरण्मयेन वर्ष्मणा ।
इदं तु कार्यरूपमन्यदुच्यते बुधैः प्रभो-
रिहान्तरे नृणां पुनर्वपुस्तदम्ब बिम्बितम् ॥ १७ ॥

स्वयं च काञ्चनप्रकाशवर्ष्मणा प्रभाकरे
तथाऽन्तरे नृणां च तस्य बिम्बिताऽसि सन्निधौ ।
रसस्य देवताऽसि देवि पुष्करे दिवाकरे
मयूखदेवताऽसि भोगदेवताऽसि देहिषु ॥ १८ ॥

विसर्जनेन भूयसा नभस्यमुत्र भास्करे
महीषु चाम्बिके युवां विधाय देहिनो बहून् ।
क्षितेः सुधाकरं गतान्पितॄन्विनेतुमव्यये
तनू च तत्र बभ्रथुः प्रपञ्चराशि मायया ॥ १९ ॥

नभोऽन्तरे हिरण्मयं विभुं प्रचक्षते हरं
दिनेशबिम्बबिम्बितं भणन्ति पङ्कजासनम् ।
इहास्यदन्तरालयं वदन्ति विष्णुमच्युतं
सवित्रि जन्मिनामियं त्रिमूर्तिवादिधोरणी ॥ २० ॥

नभोऽन्तरे प्रचक्षते हिरण्मयाङ्गमीश्वरं
दिनेशबिम्बपूरुषं हिरण्यगर्भमाख्यया ।
विराजमानमक्षरं विराजमन्तरे नृणां
सवित्रि तत्त्ववेदिनामियं तु नामकल्पना ॥ २१ ॥

हिरण्मयाङ्गमम्बरे वदन्ति सोममम्बिके
दिवाकरस्य मण्डले तु बिम्बितं पुरन्दरम् ।
शरीरिणामिहान्तरेऽग्निमालपन्ति भासुरं
चिरन्तनोक्तिदर्शिनामियं शिवे प्रणालिका ॥ २२ ॥

सरोरुहाक्ष-वाग्वधूमनोहरौ तु पूर्ववत्
सुधांशुबिम्बपूरुषस्तु रुद्रसंज्ञकः शिवे ।
हिरण्मयोऽन्तरिक्षजात ईश्वरः सदाशिवः
सदेव वस्तु काञ्चनाङ्गि पञ्चमूर्तिवादिनाम् ॥ २३ ॥

प्रभोः प्रमाऽऽदितस्ततः प्रमावती स्वयं पृथ-
ग्विहायसा शरीरिणि प्रभौ ततो हिरण्मये ।
हिरण्मयाङ्गताकृतिर्नभोऽन्तरे च भास्करे
तथाऽन्तरेषु देहिनां महेश्वरी जयत्युमा ॥ २४ ॥

मदीयमम्बिकाऽखिलस्य विष्टपस्य दुष्टधी-
दविष्टपादपङ्कजा धुनोतु कष्टजालकम् ।
इमे च कोमलैः पदैरमूल्यतल्पशालिन-
स्तदीयमञ्चरूपतां भजन्तु पञ्चचामराः ॥ २५ ॥

तृतीयः स्तवकः

शुभ्रस्मितलेशो मातुर्मरुताग्नः ।
अन्तस्तिमिराणामन्तं विदधातु ॥ १ ॥

आद्यौ भुवनानां माता-पितरौ तौ ।
देवासुरमर्त्यैर्वन्द्यावविनिन्द्यौ ॥ २ ॥

वृते पृथगेकस्तौ विग्रहवन्तौ ।
आहैकशरीरं द्वन्द्वं कविरन्यः ॥ ३ ॥

शक्तिं तनुशून्यामीशं च पुमांसम् ।
वक्ति प्रमदायां सन्देहयुतोऽन्यः ॥ ४ ॥

ईशं च तमेके सन्मात्रमुशन्ति ।
ब्रह्मैकमथान्ये गायन्ति न शक्तिम् ॥ ५ ॥

केचित्तनुहीनं प्रज्ञायुतमीशम् ।
शक्तिं विदुरस्य प्रज्ञामविकुण्ठाम् ॥ ६ ॥

उक्तं दधतस्तैः केचित्पुनराहुः ।
मायातनुबन्धं नाथस्य न शक्तेः ॥ ७ ॥

नित्यं सशरीरौ येषां पितरौ तौ ।
एकोऽप्यथवा तान् प्रत्याह निसर्गः ॥ ८ ॥

मातापितरौ यत् तावेकशरीरौ ।
चित्रप्रथनार्था सा काचन लीला ॥ ९ ॥

सन्मात्रकथानां कार्ये मनुजादौ ।
धीस्वान्तविकासः स्यात्कारणहीनः ॥ १० ॥

अद्वैतिभिरन्या मायाऽऽश्रयणीया ।
शक्तेरतिरिक्ता सा किं किमु वादैः ॥ ११ ॥

न स्यात्पृथगात्मा शक्तेः किमुपाधेः ।
चक्षुः श्रितचित्तेर्विश्वाकृतिता वा ॥ १२ ॥

एकान्तविदेहौ तौ चेदतिसूक्ष्मौ ।
लीलातनुबन्धाशक्तावभिधेयौ ॥ १३ ॥

भक्तानुगृह्णन् दिव्याद्भुतलीलः ।
तद्विग्रहबन्धो बोध्यो लसदर्थः ॥ १४ ॥

स्त्रीत्वं यदि नेष्टं पुंस्त्वं कुत इष्टम् ।
ना वा किमु नारी न स्यादनुमेया ॥ १५ ॥

तस्मात्पितरौ तौ वाच्यौ मतिमन्तौ ।
सूक्ष्मावपि भूयो लीलातनुमन्तौ ॥ १६ ॥

नास्मत्तनुपत्ते शक्तीश्वरमूर्ती ।
एकाऽमृतरूपा त्वन्या प्रणवात्मा ॥ १७ ॥

दिव्यं घनतेजः कुर्वद् ध्वनिमन्तः ।
सम्पश्यदशेषं मूर्तिः प्रणवात्मा ॥ १८ ॥

दिव्यो घनसोमः स्यन्दन् रसमन्तः ।
भुञ्जन्भुवनौघं पीयूषशरीरम् ॥ १९ ॥

बोधोऽनवलम्बो दिव्यं खलु तेजः ।
मोदः परिशुद्धो दिव्यः खलु सोमः ॥ २० ॥

सोमांशमहोंशौ यातो घनभावम् ।
पित्रोर्भुवनानां सङ्कल्पमहिम्ना ॥ २१ ॥

आराधयसीशं तं चिन्मयकायम् ।
आनन्दमयाङ्गी त्वं देवि किलेयम् ॥ २२ ॥

दिव्यं तव कायं दिव्ये तव वस्त्रे ।
दिव्यानि तवाम्ब स्वर्णाभरणानि ॥ २३ ॥

यद्देवि विलोक्या-ऽस्यप्राकृतकाया ।
युक्तीः समतीता सेयं तव माया ॥ २४ ॥

नव्यास्तनुमध्याः प्रत्नां तनुमध्याम् ।
विद्वत्सदसीमाः सम्यक्प्रथयन्तु ॥ २५ ॥

चतुर्थः स्तवकः

अमृतांशुबिम्बसाराद् भूयोऽपि विनिर्गतो भृशं सूक्ष्मः ।
सारो गौरोवदनाद् दरहासो हरतु दुःखजालं नः ॥ १ ॥

कुलकुण्डे प्रणवन्ती चेतन्ती हृदि समस्तजन्तूनाम् ।
मूर्धनि विचिन्तयन्ती मृत्युञ्जयमहिषि विजयते भवती ॥ २ ॥

तेजोजलान्नसारे स्रयोऽणवो मूल-हृदय-मस्तकेषु ।
पाकात्ते निष्पन्ना-स्त्रैलोक्यव्यापिकेऽम्ब देहवताम् ॥ ३ ॥

पूर्णे शरीरशिल्पे द्वारेण ब्रह्मरन्ध्रसंज्ञेन ।
नाडीपथेन गत्वा तैजसमणुमाविशत्यमेयबले ॥ ४ ॥

अंशेनाविश्यादौ यासि पुनस्त्वं ततश्च निर्यासि ।
मार्गाभ्यां द्वाभ्यां त्वं नाड्याः पश्चात्पुरश्च सिद्धाभ्याम् ॥ ५ ॥

यातायातविहारे मातस्तस्मिन्भवत्युपाधिस्ते ।
आरभ्य मस्तकस्थलमामूलाधारमस्थिपञ्जरिका ॥ ६ ॥

नृतनुषु विहरन्तीं त्वाम् उपाधिवीणाकृतेर्जगन्मातः ।
साद्दश्यात्कुण्डलिनीं परोक्षवादप्रियाः प्रभाषन्ते ॥ ७ ॥

नभसः शीर्षद्वारा प्रवहन्तीं य इह विग्रहे शक्तिम् ।
अनुसन्दधाति नित्यं कृतिनस्तस्येतरेरलं योगैः ॥ ८ ॥

सर्वेषु विशसि तुल्यं निर्गच्छसि तुल्यमम्ब भुवनानाम् ।
ज्ञाता चेदसि शक्त्यै न ज्ञाता चेद्भवस्यहङ्कृत्यै ॥ ९ ॥

अवतरणं ध्यातं चेद् आरोहणमद्भुतम् भवेच्छक्तेः ।
यस्मिन्निदं शरीरं भवति महद्वैद्युताग्नियन्त्रमिव ॥ १० ॥

आरोहणमध्यातृषु हृदयेऽहङ्कारमात्रनिष्पत्त्यै ।
तदनु शरीरमिदं स्यात् सुखाय दुःखाय वा यथाभोगम् ॥ ११ ॥

या व्यक्तिता जनिमतामहङ्कृतिः सकलभेदधीभूमिः ।
पृथगिव तवाम्बिके सा सत्त्वैवोपाधिसंश्रयाद् भान्ती ॥ १२ ॥

एतमाहुरविद्यां बीजं संसारवृक्षराजस्य ।
सर्वरसफलयुतस्य प्रारब्धजलेन देवि दोहदिनः ॥ १३ ॥

व्यक्तित्वार्पकदेहे निम्ने कुल्येव जनिमतां मातः ।
प्रवहत्यनारतं ते शक्तिश्चिन्नाणि देवि तन्वाना ॥ १४ ॥

सारमपामणुभूतं हृदयस्थं सूरयो विदुश्चितम् ।
श्रेष्ठं प्राणं केचन पञ्चानिलमूलभूतमाहुरिमम् ॥ १५ ॥

मन एव चित्तसंज्ञं व्यवहरतां विभजनानभिज्ञानाम् ।
कविलोकव्यवहारस्तदधीनस्तत्त्वधीर्भवत्यन्या ॥ १६ ॥

तदनाहतस्य विलसद् दक्षिणतो दहरनामकगुहायाम् ।
चित्तं कुलकुण्डात्ते काऽप्यनुगृह्णाति देवि रश्मिकला ॥ १७ ॥

चित्तमनु श्लिष्टं ते कलयाऽङ्गुष्टप्रमाणमिव भासा ।
दर्पणममलब्रह्म-प्रतिबिम्बाकर्षकं शिवे भवति ॥ १८ ॥

अन्तरमावर्ताभं प्रतिबिम्बमकायमेतदीशस्य ।
अङ्गुष्ठाभं प्राहुर्मानेनोपाधिचैत्तभासस्ते ॥ १९ ॥

दम्पत्योर्वा रूप-प्रतिबिम्बो चक्षुषोः शिवे भवतः ।
कुलकुण्डे हृदये चाप्यरूपयोरेव कश्चिदुल्लासः ॥ २० ॥

चित्तमणीयो वित्तं य इदं मूल्ये प्रपञ्चतोऽप्यधिकम् ।
हृदयगुहायां निहितं जानीते स विजहाति बहिराशाः ॥ २१ ॥

अप्राप्ता मूर्धानं हृदयात् सम्प्रस्थिता धृता नाड्या ।
त्वद्रुचिरुक्ता बुद्धिस्त्वयि निष्ठा भवति देवि तन्निष्ठा ॥ २२ ॥

अन्नमयाणुं प्राप्तं धीज्योतिश्चन्द्रमार्कमिव तेजः ।
परिभाष्यते महेश्वरि मन इति सङ्कल्पसम्भवस्थानम् ॥ २३ ॥

सङ्कल्पे सङ्कल्पे विच्छक्तिं मनसि विस्फुरन्तीं त्वम् ।
य उपास्ते स जनस्ते गृह्णाति महेशवल्लभे चरणम् ॥ २४ ॥

आधारचक्रशयने ममेह निद्रां विहाय विचरन्तीम् ।
गीतय एताः परमामुपतिष्ठन्तां जगद्विभोः कान्ताम् ॥ २५ ॥



पञ्चमः स्तवकः

श्रीखण्डचर्चामिव कल्पयन्त्यो मुहुः कपोलेषु सखीजनस्य ।
श्रीकण्ठकान्ताहसिताङ्कुराणां श्रीमन्ति कुर्वन्तु जगन्ति भासः ॥ १ ॥

कीर्तिर्वलक्षा कुसुमायुधस्य स्वर्णाद्रिकोदण्डजयोन्नतस्य ।
दरस्मितश्रीर्हिरदाल्यमातुर्द्राघीयसीं वो वितनोतु भूतिम् ॥ २ ॥

प्रमथ्यमानामृतराशिवीचि-प्रोद्गच्छदच्छाच्छतुषारकल्पाः ।
युष्माकमिच्छां विदधत्वमोघां विघ्नेशमातुर्दरहासलेशाः ॥ ३ ॥

चन्द्रातपः कश्चन सम्प्रसन्नो महेशनेत्रातिथितर्पणो नः ।
मनोभिलाषं सफलीकरोतु महेश्वरीहासलवप्रकाशः ॥ ४ ॥

वलक्षवक्षोजपटाञ्चलेन चलेन सार्धं कृतकेलयो नः ।
पुत्रत्रयारातिकलत्रहास-भासो निरासं विपदां क्रियासुः ॥ ५ ॥

भूयासुरायासहराणि तानि स्मितानि भूतेशमृगीदृशो नः ।
येषां त्विषो बिभ्रति दिग्वधूटी-गण्डेषु कर्पूरपरागलीलाम् ॥ ६ ॥

कुर्वन्तु कामं सफलं (त्व) मदीयं कुलाद्रिकन्याहसितानि तानि ।
येषां मयूखैः क्रियते सिताद्रे-रुद्यानवाटीषु नवो वसन्तः ॥ ७ ॥

आम्रेडितं भूषणचन्द्रभासां नासाविभूषामहसां द्विरुक्तिः ।
पुरारिनारीस्मितकान्तयो मे पूर्णानि कुर्वन्तु समीहितानि ॥ ८ ॥

निर्माय विश्वालयमम्ब शर्वस्त्वया समं शिल्पविदा स शिल्पी ।
विहर्तुमिच्छन्नपि वोढुमिच्छन्नारीं भवन्तीं पुरुषो भवंस्त्वाम् ॥ ९ ॥

दिव्यं दुकूलं धवलं दधाना वेण्या फणीन्द्रोपमया लसन्ती ।
प्रफुल्लराजीवविलोचना त्वं प्रपञ्चभर्तुर्नयनान्याहार्षीः ॥ १० ॥

प्रत्यङ्गबन्धं ज्वलदुत्तमं ते भुजङ्गराजोपमवेणि रूपम् ।
आत्मैकनिष्ठस्य च विश्वभर्तुराराधयामास विलोचनानि ॥ ११ ॥

अभूस्त्वमाद्यस्य मनोमदाय स चापि ते प्रीतिपदं बभूव ।
न केवलं वां सकलस्य चासीद्दाम्पत्यबन्धस्य तदम्ब बीजम् ॥ १२ ॥

तवातिकान्ता नयनान्तवृत्तिर्हासः पुरारेश्च नवेन्दुहारी ।
उभौ विवाहोत्सवपूर्वरङ्गं निर्वर्तयामासतुरादिरामे ॥ १३ ॥

दातुं प्रभुः सान्त्वयितुं समर्थः कर्तुं क्षमस्तर्जयितुं च शक्तः ।
संरक्षतान्मां तव सर्ववन्द्ये करस्तुषारांशुभृता गृहीतः ॥ १४ ॥

स्प्रष्टुं न शक्या परमे परैस्त्वं स चान्यया चिन्तयितुं न शक्यः ।
त्वमेव शर्वस्य स एव तेऽम्ब दाम्पत्यमेवं युवयोस्तु सत्यम् ॥ १५ ॥

निजाद्भुतंसेन्दुत इन्दुमन्यमुत्पाद्य ते शम्भुरदाद्भुतंसम् ।
मूर्तामिवासौ शुभगात्रि रात्रिं प्राप्य त्वदीयां कबरीं चकासे ॥ १६ ॥

बभूविथागेन्द्रगृहे यदा त्वं स चेश्वरस्तत्र चकार वासम् ।
विलोकमानस्तव देवि विद्युत्पाञ्चालिकायाः कमनीयभावम् ॥ १७ ॥

सिद्धं स वां साधयितुं प्रवृत्तो योगं प्रदग्धो मदनश्चकल्पे ।
वशीति कीर्तिं गिरिशस्य भर्तुं तुभ्यं त्वपर्णेति यशश्च कर्तुम् ॥ १८ ॥

घोरं तपश्चेद्वचितं त्वयाऽपि प्राग्रूपभर्तुः समनुग्रहाय ।
विहाय यत्नं क इहाखिलाम्ब सम्बद्धमप्यर्थमुपैतु जन्तुः ॥ १९ ॥

ज्वलत्कपर्दो दहनाङ्कभालः कपालमाली करिकृत्तिवासाः ।
भुजङ्गभूषो भसिताङ्गरागः पुष्पेषु वैरी परुषाट्टहासः ॥ २० ॥

श्मशानवासी पुरुषास्थिशूली जहार ते चेदनघाङ्गि चेतः ।
दृष्टान्तमर्थोऽयमवाप नैव प्रीतिर्बहिः कारणमाश्रितेति ॥ २१ ॥

रूपं पुरारेरथवा तदेतत् सेयं च चेष्टा समयान्तरेषु ।
कान्तं वपुः कान्ततराश्च लीलास्त्वया समं खेलितुमेष धत्ते ॥ २२ ॥

प्रहृष्टयक्षः समवेतसिद्धो नृत्यद्गणेन्द्रो विकसन्मुनीन्द्रः ।
भूयोऽपि योगो युवयोर्हिमाद्रौ बभार मातर्महमद्वितीयम् ॥ २३ ॥

महेश्वरस्त्वां परिणीय लेभे यावात्मजौ द्रावनवाङ्गि मुख्यौ ।
एकस्तयोर्भ्रम्यति विश्वमत्तुं भूभृत्तटोराश्रयते बतान्यः ॥ २४ ॥

सङ्कीर्तयन्त्यो जगतां जनन्याः कल्याणवार्ताः कमनीयकीर्तेः ।
इमाः प्रमोदाय सतां भवन्तु सन्दर्भशुद्धा उचजातयो नः ॥ २५ ॥

षष्ठ स्तवकः

हर्तारः शशिकीर्तेः कर्तारो नवभासाम् ।
भर्तारो मम सन्तु स्कन्दाम्बादरहासाः ॥ १ ॥

दिग्वल्लीष्वतिशुभ्रां कुर्वन्तः कुसुमर्द्धिम् ।
भूयासुस्तव भूत्यै मन्मातुः स्मितलेशाः ॥ २ ॥

एकश्चेत्तव शक्तो ब्रह्माण्डस्य भवाय ।
भर्गप्रेयसि हासः किं स्तोत्रं तव भूयः ॥ ३ ॥

उद्याने वियदाख्ये कालि त्वां विहरन्तीम् ।
गोलैः कन्दुककलपैरल्पा वाक्किमु माति ॥ ४ ॥

खं क्रीडाभवनं ते कः कार्यालय एषः ।
पृथ्वीयं बहुलान्ना मातर्भोजनशाला ॥ ५ ॥

बुद्धीनामसि दात्री सिद्धीनामसि नेत्री ।
वीर्याणामसि पेटी कार्याणामसि भाटी ॥ ६ ॥

विद्यानामसि भावो ह्यानामसि हावः ।
देवानामसि लीला दैत्यानामसि हेला ॥ ७ ॥

गन्तॄणामसि चेष्टा स्थाणूनामसि निष्ठा ।
लोकानामसि मूलं लोकादेरसि जालम् ॥ ८ ॥

देवी व्यापकतेजः शक्तिस्त्वविचारे ।
अत्यन्तं सुकुमारी नारी मूर्तिविचारे ॥ ९ ॥

क्व ज्योतिर्महतोऽस्मादाकाशादपि भूयः ।
तत्सर्वं विनयन्ती तन्वङ्गी क्व नु नारी ॥ १० ॥

देवेन्द्राय विभुत्वं सूर्यायोस्रसहस्रम् ।
ऊष्माणं दहनाय ज्योत्स्नामोषधिराजे ॥ ११ ॥

वातायामितवीर्यं विस्तारं गगनाय ।
सान्द्रत्वं वसुधायै तोयाय द्रवभावम् ॥ १२ ॥

महाभाग्यमपारं कोटिभ्यो विबुधानाम् ।
चित्राः काश्चन सिद्धीर्लक्षेभ्यो मनुजानाम् ॥ १३ ॥

स्थाणुभ्यो धृतिशक्तिं गन्तृभ्यो गतिशक्तिम् ।
कस्माच्चिन्निजकोशादेका देवि ददाना ॥ १४ ॥

आश्चर्यं विदधाना सर्ववस्तुदधाना ।
हन्त त्वं मम मातः काचित्कोमलगात्री ॥ १५ ॥

श्रोणीभारनतायां कस्यांचित्तनुगात्र्याम् ।
ईदृक्षा यदि शक्तिः का वेतो ननु माया ॥ १६ ॥

रूपं ते तनुगात्रं वाणी ते मृदुनाढ्या ।
चापं ते मधुरेक्षुः पाणिस्ते सुकुमारः ॥ १७ ॥

लोले लोचनयुग्मे भीरुत्वं प्रकटं ते ।
ब्रह्माण्डं त्वदधीनं श्रद्धत्तामिह को वा ॥ १८ ॥

भ्रूभङ्गं कुरुषे चेन्मुग्धे गौरि मुखाब्जे ।
भूतान्यप्ययि बिभ्यत्येजेरन्नपि ताराः ॥ १९ ॥

शुद्धान्तेश्वरि शम्भोरिच्छा चेत्तव काऽपि ।
घोरोऽग्निस्तृणगर्भाद्घोराग्नेरपि शैत्यम् ॥ २० ॥

द्रष्टुं विश्वमपारं भारस्ते दयितस्य ।
कर्तुं कार्यमशेषं श्रीमातस्तव भारः ॥ २१ ॥

साक्षी केवलमीशः कर्तुं भर्तुमुताहो ।
हर्तुं वाऽखिलमम्ब त्वं साक्षाद्धृतदीक्षा ॥ २२ ॥

कारङ्कारमुमे यद् ब्रह्माण्डानि निहंसि ।
तन्मन्ये सुरमान्ये बालेवाम्ब सदा त्वम् ॥ २३ ॥

लीलोज्जीवितकामे रामे शङ्करसक्ते ।
त्वत्पादार्चनसक्तं भक्तं मा कुरु शक्तम् ॥ २४ ॥

एताः पावनगन्धाः सर्वेशप्रमदे ते ।
हेरम्ब्यो मदलेखाः संतोषाय भवन्तु ॥ २५ ॥

सप्तमः स्तवकः

वाणीसरोरुहदृशो हयराजहंसो
वक्त्रारविन्दनिलयाद्बहिरागतायाः ।
आलापकालदरहास इह स्थितानां
क्षेमं करोतु सुतरां हरसुंदरीयः ॥ १ ॥

नादोऽसि वागसि विभाऽसि चिदस्यखण्डा
खण्डीभवंत्यपि चिदस्यखिलेंद्रकांते ।
तत्तादृशीं निखिलशक्तिसमष्टिमीशे
त्वामंतरिक्षपरिक्लृप्ततनुं नमामि ॥ २ ॥

विश्वप्रसिद्धविभवास्त्रिषु विष्टपेषु
याः शक्तयः प्रविलसन्ति परःसहस्राः ।
तासां समष्टिरतिचित्रनिधानदृष्टिः
सृष्टि-स्थिति-प्रलयकृद् भुवनेश्वरि त्वम् ॥ ३ ॥

जाने न यत्तव जगज्जनयित्रि रूपं
सङ्कल्प्यते किमपि तन्मनसो बलेन ।
सङ्कल्पितस्य वपुषः श्रितशोकहन्त्रि
विन्यस्यते तव वचोतिगधाम नाम ॥ ४ ॥

कामं वदन्तु वनितामितिहासदक्षा-
स्त्वां सर्वलोकजनयित्रि सदेहबन्धाम् ।
सत्यं च तद्भवतु सा तव काऽपि लीला
दिव्यं रजस्तु तव वास्तविकं शरीरम् ॥ ५ ॥

भूजन्मपांसुभिरगर्हितशुद्धरूपा
या काऽपि पांसुपटली विपुलेऽन्तरिक्षे ।
सा ते तनुः सुमहती वरदे सुसूक्ष्मा
तामेव देवसरणिं कथयन्ति धीराः ॥ ६ ॥

या देवि देवसरणिर्भवमग्नदुर्गा
वैरोचनीति कथिता तपसा ज्वलन्ती ।
राजीवबन्धुमहसा विहिताङ्गरागा
सा ते तनुर्भवति सर्वसुपर्ववर्ण्ये ॥ ७ ॥

प्राणास्त्वत्र हृदयं च विराजतेऽत्र
नेत्राणि चात्र शतशः श्रवणानि चात्र ।
घ्राणानि चात्र रसनानि तथा त्वचश्च
वाचोऽत्र देवि चरणानि च पाणयोऽत्र ॥ ८ ॥

सर्वत्र पश्यसि शृणोषि च सर्वतोऽम्ब
सर्वत्र खादसि विजिघ्रसि सर्वतोऽपि ।
सर्वत्र च स्पृशसि मातरभिन्नकाले
कः शक्नुयान्निगदितुं तव देवि भाग्यम् ॥ ९ ॥

सर्वत्र नंदसि विमुञ्चसि सर्वतोऽम्ब
सर्वत्र संसरसि गर्जसि सर्वतोऽपि ।
सर्वत्र देवि कुरुषे तव कर्मजाल-
वैचित्र्यमीश्वरि निरूपयितुं क्षमः कः ॥ १० ॥

विश्वाम्बिके त्वयि रुचां पतयः कियंतो
नानाविधाब्धिकलिताः क्षितयः कियत्यः ।
बिम्बानि शीतमहसां लसतां कियंति
नैतच्च वेद यदि को विबुधो बहुज्ञः ॥ ११ ॥

अव्यक्तशब्दकलयाऽखिलमंतरिक्षं
त्वं व्याप्य देवि सकलागमसम्प्रगीते ।
नादोऽस्युपाधिवशतोऽथ वचांसि चासि
ब्राह्मीं वदंति कवयोऽमुकवैभवां त्वाम् ॥ १२ ॥

नानाविधैर्भुवनजालसवित्रि रूपै-
र्व्याप्तैकनिष्कलगभीरमहस्तरङ्गैः ।
व्यक्तं विचित्रयसि सर्वमखर्वशक्ते
सा वैष्णवी तव कला कथिता मुनींद्रैः ॥ १३ ॥

व्यक्तित्वमम्ब हृदये हृदये दधासि
येन प्रभिन्न इव बद्ध इवान्तरात्मा ।

सेयं कला भुवननाटकसूत्रभर्त्रि
माहेश्वरीति कथिता तव चिद्विभूतिः ॥ १४ ॥

आहारशुद्धिवशतः परिशुद्धसत्त्वे
नित्यस्थिरस्मृतिधरे विकसत्सरोजे ।
प्रादुर्भवत्यमलतत्त्वविभासिका या
सा त्वं स्मृता गुरुगृहस्य सवित्रि शक्तिः ॥ १५ ॥

हव्यं यया दिविषदो मधुरं लभन्ते
कव्यं यया रुचिकरं पितरो भजन्ते ।
अश्नाति चान्नमखिलोऽपि जनो यया एव
सा ते वराहवदनेति कलाऽम्ब गीता ॥ १६ ॥

दुष्टान्निहंसि जगतामवनाय साक्षा-
दन्यैश्च घातयसि तत्तबलैर्महद्भिः ।
दम्भोलिचेष्टितपरीक्ष्यबला बलारेः
शक्तिर्न्यगादि तव देवि विभूतिरेषा ॥ १७ ॥

सङ्कल्परक्तकणपानविवृद्धशक्त्या
जाग्रत्समाधिकलयेश्वरि ते विभूत्या ।
मूलाग्निचण्डशशिमुण्डतनुत्रभेत्र्या
चामुण्डया तनुषु देवि न किं कृतं स्यात् ॥ १८ ॥

त्वं लोकराज्ञि परमात्मनि मूलमाया
शक्रे समस्तसुरभर्तरि जालमाया ।
छायेश्वरान्तरपुमात्मनि योगमाया
संसारसक्तहृदयेष्वसि पाशमाया ॥ १९ ॥

त्वं भूतभर्तरि भवस्यनुभूतिनिद्रा
सोमस्य पातरि विडौजसि मोदनिद्रा ।
सप्ताश्वबिम्बपुरुषात्मनि योगनिद्रा
संसारमग्नहृदयेष्वसि मोहनिद्रा ॥ २० ॥

विष्णुश्चकार मधुकैटभनाशनं य-
न्मुक्तः सहस्रदलसम्भवसंस्तुता सा ।
काली घनाञ्जननिभप्रभदेहशालि-
न्युग्रा तवाम्ब भुवनेश्वरि कोऽपि भागः ॥ २१ ॥

विद्युत्प्रभामयमदृष्यतमं द्विषद्भि-
श्चण्डप्रचण्डमखिलक्षयकार्यशक्तम् ।
यत्ते सवित्रि महिषस्य वधे स्वरूपं
तच्चिन्तनादिह नरस्य न पापभीतिः ॥ २२ ॥

शुम्भं निशुम्भमपि या जगदेकवीरौ
शूलाग्रशान्तमहसौ महती चकार ।
सा कौशिकी भवति काशयशाः कृशोद-
र्यात्माङ्गजा तव महेश्वरि कश्चिदंशः ॥ २३ ॥

माये शिवे श्रितविपद्विनिहन्त्रि मातः
पश्य प्रसादभरशीतलया दृशा माम् ।
एषोऽहमात्मजकलत्रसुहृत्समेतो
देवि त्वदीयचरणं शरणं गतोऽस्मि ॥ २४ ॥

धिन्वन्तु कोमलपदाः शिववल्लभाया-
श्चेतो वसन्ततिलकाः कविकुञ्जरस्य ।
आनन्दयन्तु च पदाश्रितसाधुसङ्घं
कष्टं विधूय सकलं च विधाय चेष्टम् ॥ २५ ॥

अष्टमः स्तवकः

तमसामभितो हन्ता चण्डिकाहासवासरः ।
सतां हृदयराजीवविकासाय प्रकल्पताम् ॥ १ ॥

या निद्रा सर्वभूतानां योगनिद्रा रमापतेः ।
ईड्यतां सा महाकाली महाकालसखी सखे ॥ २ ॥

विरञ्चिना स्तुते मातः कालि त्वं चेन्न मुञ्चसि ।
मधु-कैटभ-संहारं करोतु कथमच्युतः ॥ ३ ॥

वासवः काशनीकाशयशोलङ्कृतदिङ्मुखः ।
महोग्रविक्रमाद्यस्मादासीदाजौ पराङ्मुखः ॥ ४ ॥

यत्प्रतापेन सन्तप्तो मन्ये वाडवरूपभृत् ।
भगवाननलोऽद्यापि सिन्धुवासं न मुञ्चति ॥ ५ ॥

कुर्वाणो भूतकदनं यस्मिन्विस्मितचेतसः ।
एष एवान्तको नाहमित्यासीदन्तकस्य धीः ॥ ६ ॥

रणे येनातिरस्कृत्य त्यक्तो राक्षस इत्यतः ।
चिराय हरिदीशेषु कोणेशः प्राप्तवान्यशः ॥ ७ ॥

यन्नियन्तुमशक्तस्य कुर्वाणमसतीः क्रियाः ।
नियन्तुरसतामासीत्पाशिनो मलिनं यशः ॥ ८ ॥

बाहुवीर्यपराभूतो यस्य प्रायेण मारुतः ।
बभूव क्षणदान्तेषु रतान्तपरिचारकः ॥ ९ ॥

निधीन्येन जितो हित्वा राजराजः पलायितः ।
स्पष्टं बभाण माधुर्यं प्राणानामखिलादपि ॥ १० ॥

यस्मिन्नुत्तरपूर्वस्या-दिश एकादशाधिपाः ।
कुण्ठा बभूवुरात्मीयकण्ठोपमितकीर्तयः ॥ ११ ॥

निजशुद्धान्तकान्तानामाननैरेव निर्जितम् ।
ललज्जे यः पुनर्जित्वा शूरमानी सुधाकरम् ॥ १२ ॥

बालस्येव क्रीडनकैः प्रवीरैर्यस्य खेलतः ।
लीलाकन्दुकधीरासीद्देवे दीधितिमालिनि ॥ १३ ॥

त्रियामाचरशुद्धान्तभ्रूविलासनिवारणम् ।
विष्णोः सुदर्शनं चक्रं यस्य नापश्यदन्तरम् ॥ १४ ॥

महिषं तं महावीर्यं या सर्वसुरदेहजा ।
अवधीद्दानवं तस्यै चण्डिकायै नमो नमः ॥ १५ ॥

मुखं तवासेचनकं ध्यायं ध्यायं निरन्तरम् ।
मृगेन्द्रवाहे कालेन मृडस्त्वन्मुखतां गतः ॥ १६ ॥

कार्त्तिकीचन्द्रवदना कालिन्दीवीचिदोर्लता ।
अरुणाम्भोजचरणा जयति त्रिरुचिः शिवा ॥ १७ ॥

यत्ते कचभरः कालो यद्बाहुर्लोकरक्षकः ।
युक्तं द्वयं शिवे मध्यस्त्वसन्नाको न नाकराट् ॥ १८ ॥

स्वदेहादेव या देवी प्रदीपादिव दीपिका ।
आविर्बभूव देवानां स्तुवतां हर्तुमापदः ॥ १९ ॥

धैर्य-चातुर्य-गाम्भीर्य-वीर्य-सौन्दर्यशालिनीम् ।
रत्नं नितम्बिनीजातौ मेनिरे यां सुरासुराः ॥ २० ॥

यदीय-हुङ्कृत्यनले धूम्राक्षोऽभवदाहुतिः ।
समाप्तिं भीषणं यावन्नैवावाप विकत्थनम् ॥ २१ ॥

चामुण्डा-शिवदूत्यौ यत्कले दारुणविक्रमे ।
भक्षयामासतुर्मूर्तीः कीर्तिभिः सह रक्षसाम् ॥ २२ ॥

यस्याः शूले जगामास्तं यशः शुम्भनिशुम्भयोः ।
नमामि विमलश्लोकां कौशिकीं नाम तामुमाम् ॥ २३ ॥

यशोदागर्भजननाद् यशोदां गोकुलस्य ताम् ।
वन्दे भगवतीं नन्दां विन्ध्याचलनिवासिनीम् ॥ २४ ॥

अम्बिकामुपतिष्ठन्तामेताश्चण्डीमनुष्टुभः ।
प्रसन्नाः साध्वलङ्काराः सिद्धपद्मेक्षणा इव ॥ २५ ॥

नवमः स्तवकः

शारदवलक्षपक्षक्षणदावैमल्यशिक्षकोऽस्माकम् ।
जागर्तु रक्षणाय स्थाणुपुरन्ध्रीमुखविकासः ॥ १ ॥

व्याख्यानं हर्षस्य प्रत्याख्यानं शरत्सुधाभानोः ।
दिशतु हृदयप्रसादं गौरीवदनप्रसादो नः ॥ २ ॥

अन्तर्गतस्य हर्षक्षीरसमुद्रस्य कश्चन तरङ्गः ।
हासो हरहरिणदृशो गतपङ्कं मम करोतु मनः ॥ ३ ॥

दिशि दिशि विसर्पदंशुप्रशमिततापं परास्तमालिन्यम् ।
कुशलानि प्रदिशतु नः पशुपतिहृदयेश्वरीहसितम् ॥ ४ ॥

अन्तर्गतं च तिमिरं हरन्ति विहसन्ति रोहिणीकान्तम् ।
हसितानि गिरिशसुदृशो मम प्रबोधाय कल्पन्तम् ॥ ५ ॥

भूषातुषारदीधितिदीधित्या सह विहायसो रङ्गे ।
विचरन्पुरहरतरुणीदरहासो मे हरत्वेनः ॥ ६ ॥

रुद्राणीदरहसितान्यस्माकं संहरन्तु दुरितानि ।
येषामुदयो दिवसो भूषापीयूषकिरणस्य ॥ ७ ॥

स्कन्दजननीमुखेन्दोरस्मान्पुष्णातु सुस्मितज्योत्स्ना ।
मुनिमतिकैरविणीनामुल्लासकथा यदायत्ता ॥ ८ ॥

कमनीयकण्ठमालामुक्तामणितारकावयस्यो नः ।
कामान्वितरतु गौरीदरहासो नाम धवलांशुः ॥ ९ ॥

अनवद्यकण्ठमालामुक्तावलिकिरणनिवहसहवासी ।
हरदयितारहासो हरतु ममाशेषमज्ञानम् ॥ १० ॥

अ इव ज्ञदृश्य उत्तम इलाधराधीशनन्दिनीहासः ।
पूर्णं करोतु मानसमभिलाषं सर्वमस्माकम् ॥ ११ ॥

आलोकमात्रतो यः शङ्करमसमास्त्रकिङ्करं चक्रे ।
अल्पोऽप्यनल्पकर्मा हासो नः पातु स शिवायाः ॥ १२ ॥

स्मरमतरतमीशं यः करोति भावप्रसङ्गचातुर्या ।
द्विजगणपुरस्कृतोऽव्यात् स शिवाहासप्रवक्ता नः ॥ १३ ॥

रदवाससा रथो मां शरी करैः पातु पार्वतीहासः ।
पावकदृशं जिगीषोः पञ्चपृषत्कस्य सेनानीः ॥ १४ ॥

शिवहृदयमर्मभेदि स्मितं तदद्रीशवंशमुक्तायाः ।
दशनद्युतिद्विगुणितश्रीकं शोकं धुनोतु मम ॥ १५ ॥

ब्रह्माण्डरङ्गभाजो नट्याः शिवसूत्रधारसहचर्याः ।
श्रीवर्धनोऽनुलेपो मुखस्य हासः पुनात्वस्मान् ॥ १६ ॥

अधरप्रवालशयने नासाभरणप्रभाविलासिन्या ।
रममाणो हररमणीहासयुवा हरतु नः शोकम् ॥ १७ ॥

अधरोष्ठवेदिकायां नासाभरणांशुशावकैः साकम् ।
कुलमखिलमवतु खेलन्नद्रिसुताहासबालो नः ॥ १८ ॥

अनुलेपनस्य वीप्सा द्विर्भावः कुचतटीदुकूलस्य ।
हरतु हृदयव्यथां मे हसितं हरजीवितेश्वर्याः ॥ १९ ॥

गिरिशाङ्गरागभसितं स्वागतवचसाऽभिनन्ददादरतः ।
गिरिजालीलाहसितं गरीयसीं मे तनोतु धियम् ॥ २० ॥

दयितेन सँल्लपन्त्याः सह तुहिनमरीचिशिशुकिरीटेन ।
वागमृतबुद्बुदोऽव्यादलसो मामगभुवो हासः ॥ २१ ॥

शुद्धः कुचाद्रिनिलयादपि मुक्ताहारतो हरपुरन्ध्र्याः ।
वदनश्रीप्रासादे विलसन् हासोऽलसोऽवतु माम् ॥ २२ ॥

व्यर्थीभूते चूते गतवति परिभूतिमसितजलजाते ।
अनिते सिद्धिमशोके कमलेऽपि गलज्जयश्रीके ॥ २३ ॥

बहुधा बिभेद हृदयं हरस्य बाणेन येन सुमबाणः ।
तदुमालीलाहसितं मल्लीसुममस्तु मे भूत्यै ॥ २४ ॥

अमलदरस्मितचिह्नास्ता एताः सर्वमङ्गला आर्याः ।
कमनीयतमास्वसमामुपतिष्ठन्तामुमां देवीम् ॥ २५ ॥

दशमः स्तवकः

सङ्क्षालनाय हरितां विभूतये लोकत्रयस्य मदनाय धूर्जटेः ।
कात्यायनीवदनतः शनैः शनैर्निर्यन्ति शुभ्रहसितानि पान्तु नः ॥ १ ॥

स्वल्पोऽपि दिक्षु किरणान्प्रसारयन् मन्दोऽपि बोधममलं दधत्सताम् ।
शुभ्रोऽपि रागकृदनङ्गवैरिणो हासः पुराणसुदृशः पुनातु नः ॥ २ ॥

चेतोहरोऽप्यतिजुगुप्सितो भवेत् सर्वोऽपि जीवकलया यया विना ।
सा वर्ण्यतां कथमपारचारुतापीयूषसिन्धुरखिलेन्द्रसुन्दरी ॥ ३ ॥

अत्यल्पदेववनितां च पार्थिवैर्भाविवैर्वयं तुलयितुं न शक्नुमः ।
तां किं पुनः सकलदेवसुन्दरीलोकाक्षिपारणतनुप्रभामुमाम् ॥ ४ ॥

वर्षापयोदपटलस्य सान्द्रता सूर्यात्मजोर्मिचयनिम्नतुङ्गता ।
कालार्हिभूमिपतिदीर्घता च ते केशेषु भर्गभवनेश्वरि व्रयम् ॥ ५ ॥

ईशानसुन्दरि तवास्यमण्डलान्नीचैर्नितान्तममृतांशुमण्डलम् ।
को वा न कीर्तयति लोष्टपिण्डकं लोके निकृष्टमिह मानवीमुखात् ॥ ६ ॥

बिभ्रत्यमर्त्यभुवनस्थदीर्घिकापङ्केरुहाणि वदनाय ते बलिम् ।
नो चेत्कथं भवति सौरभं महद्भिन्ने सुमेभ्य उरुकेशि ते मुखे ॥ ७ ॥

गीर्वाणलोकतटिनीजलेरुहां गन्धे शुभे भवतु ते मनोरतिः ।
लोकाधिराज्ञि तव वक्त्रसौरभे लोकाधिराजमनसस्तु सम्मदः ॥ ८ ॥

को भाषतां तव सवित्रि चारुतां यस्याः स्मितस्य धवलद्युतिर्लवः ।
यस्याः शरीररुचिसिन्धुवीचयः शम्पालताः पृथुलदीप्तिभूमयः ॥ ९ ॥

लोकाम्बिके न विलसन्ति के पुरो मन्दस्मितस्य तव रोचिषां निधेः ।
ये तु व्यधायिषत तेन पृष्टतो हन्तैषु काऽपि तिमिरच्छटा भवेत् ॥ १० ॥

किं वा रदावलिरुचिर्मुखस्य किं सम्फुल्लता वरधियः किमूर्मिका ।
सन्तोषपादपसुमं नु शङ्करप्रेमस्वरूपमुत देवि ते स्मितम् ॥ ११ ॥

दिक्षु प्रकाशपटलं वितन्वता कोटिप्रभाकरविभक्ततेजसा ।
नेत्रेण ते विषमनेत्रवल्लभे पङ्केरुहं क उपमाति पण्डितः ॥ १२ ॥

श्रीकर्ण एष तव लोचनाञ्चले भान्त्या दयादयितया प्रबोधितः ।
एतं सवित्रि मम कञ्चन स्तवं श्रुत्वा तनोतु भरतावनेः श्रियम् ॥ १३ ॥

स्वा नासिका भवति युञ्जतां सतां संस्तम्भिनी चलतमस्य चक्षुषः ।
त्वन्नासिका पुरहरस्य चक्षुषः संस्तम्भिनी भवति चित्रमम्बिके ॥ १४ ॥

बिम्बप्रवालनपह्लवादितः पीयूषसारभरणाद् गुणाधिकः ।
गोत्रस्य पुत्रि शिवचित्तरञ्जकः श्रेष्ठो नितान्तमधराधरोऽपि ते ॥ १५ ॥

दोर्वल्लिके जननि ते तटित्प्रभामन्दारमाल्यमृदुतापहारिके ।
निश्शेषबन्धदमनस्य धूर्जटेर्बन्धाय भद्रचरिते बभूवतुः ॥ १६ ॥

हस्ताब्जयोस्तव मृदुत्वमद्भुतं गृह्णाति ये सदयमेव धूर्जटिः ।
अत्यद्भुतं जननि दार्ढ्यमेतयोः शुम्भादिदर्पविलयो ययोरभूत् ॥ १७ ॥

राजन्तु ते कुचसुधाप्रपायिनो लोकस्य मातरनघाः सहस्रशः ।
एतेषु कश्चन गजाननः कृती गायन्ति यं सकलदायिसत्करम् ॥ १८ ॥

त्वन्नाभिकूपपतितां दृशं प्रभोर्नेतुं विनिर्मलगुणे पुनस्तटम् ।
सौम्यत्वदीयहृदयप्रसारितः पाशः सवित्रि तव रोमराजिका ॥ १९ ॥

त्वन्मध्यमो गगनलोक एव चेत्त्वद्दिव्यवैभवविदो न विस्मयः ।
प्राज्ञैर्हि सुन्दरि पुरत्रयद्विषस्त्वं देहिनी त्रिभुवनेन गीयसे ॥ २० ॥

नाभिहृदाद्विगलितः कटीशिलाभङ्गाद्पुनः पतति किं द्विधाकृतः ।
कान्तोरुयुग्ममिषतः सवित्रि ते भावारिपूर इभशुण्डयोः समः ॥ २१ ॥

जङ्घायुगं तव महेशनायिके लावण्यनिर्झरि जगद्विधायिके ।
अन्तःपरिस्फुरदगुप्तसुप्रभाबाणाढ्यतूणयुगलं रतीशितुः ॥ २२ ॥

पुष्पास्त्रशासननिशान्तराज्ञि ते लोकत्रयस्यखलकम्पनं बलम् ।
श्रोणीभरेण गमने किल श्रमं प्राप्नोषि केन तव तत्त्वमुच्यताम् ॥ २३ ॥

यत्रैव नित्यविहृतेरभूदमा राजीवमन्दिरचरीति नामतः ।
तन्मे सदा भणतु मङ्गलं शिवापादाम्बुसम्भवममेयवैभम् ॥ २४ ॥

केशादिपादकमलान्तगायिनीः कन्तुप्रशासननिशान्तनायिका ।
अङ्गीकरोतु ललिता इमाः कृतीर्गौरी कवेश्चरणकञ्जसेविनः ॥ २५ ॥

एकादशः स्तवकः

झषकेतुना प्रयुक्तः सम्मोहनचूर्णमुष्टिरीशाने ।
दरहासो धरदुहितुः करोतु भुवनं वशेऽस्माकम् ॥ १ ॥

उपजीवद्भिः कान्तेर्लेशांस्ते जगति सुन्दरैर्भावैः ।
उपमितुमगङ्गानि तव प्राया लज्जेऽम्ब यतमानः ॥ २ ॥

अवतंसपल्लवतुलां बिभ्राणं श्रुतिनतभ्रुवः शिरसि ।
चरणं व्रजामि शरणं वामं कामारिललनायाः ॥ ३ ॥

शङ्करनयनोन्मादनमतिमधुरं भाति मतिमता वर्ण्यं ।
जङ्घायुगं भवत्याः कुसुमपृषत्कस्य सर्वस्वम् ॥ ४ ॥

एकैकलोकने द्वयमन्योन्यस्मरणहेतुतामेति ।
देवि भवस्य तवोरुः शुण्डा च गजेन्द्रवदनस्य ॥ ५ ॥

नाकोऽवलग्नमीश्वरि कटिरवनिर्भोगिनां जगन्नाभिः ।
कुक्षौ न केवलं ते बहिरपि वपुषि त्रयो लोकाः ॥ ६ ॥

मन्ये महाकृपाणं तव वेणीमचलपुत्रि मदनस्य ।
असिधेनुकां विशङ्के निशिततरामां तु रोमालिम् ॥ ७ ॥

द्विरदवदनेन पीतं षड्वदनेनाथ सकलभुवनेन ।
अक्षय्यक्षीरामृतमम्बायाः कुचयुगं जयति ॥ ८ ॥

जगदम्ब लम्बमाना पार्श्वद्वितये तवागलाह्वाति ।
सान्द्रग्रथितमनोज्ञप्रसूनमालेव भुजयुगली ॥ ९ ॥

जानन्ति शक्तिमसुराः सुषमां सख्यो वदान्यतामृषयः ।
मृदुतां तवाम्ब पाणेर्वेद स देवः पुरां भेत्ता ॥ १० ॥

कम्बुसदृगम्ब जगतां मणिवेषोद्भुस्रजाकृताकल्पः ।
कण्ठोऽनघस्वरस्ते धूर्जटिदोर्नयनकर्णहितः ॥ ११ ॥

हरकान्ते वदनं ते दर्शं दर्शं वतंसशीतांशुः ।
पूर्णोऽप्यवाप कृशतां प्रायेणासूयया शुष्कः ॥ १२ ॥

चन्द्रं रणाय सकला चपलाक्षीवदनजातिराह्वयताम् ।
तं तु महसा मुखं ते महेशकान्ते जिगायैकम् ॥ १३ ॥

वदनकमलं तवेश्वरि कमलजयाद्दर्पितं सुधाभानुम् ।
निर्जित्य कमलजातेरमलं महदाजहार यशः ॥ १४ ॥

लावण्यमरन्दाशाभ्रमद्भ्रवालोकबम्भरं परितः ।
मुग्धं मुखारविन्दं जयति नगाधीशनन्दिन्याः ॥ १५ ॥

शुद्धेन्दुसारनिर्मितमास्याधं ते भवानि भालमयम् ।
सकलरमणीयसारैर्निर्मितमर्धान्तरं विधिना ॥ १६ ॥

वदनं तवाद्रिदुहितर्विजिताय नताय शीतकिरणाय ।
द्वारपदवीं प्रददावयमिह दरहासनामधरः ॥ १७ ॥

ते ते वदन्तु सन्तो नयनं ताटङ्कमालयं मुकुटम् ।
कवयो वयं वदामः सितमहसं देवि ते हासम् ॥ १८ ॥

बिम्बाधरस्य शोभामम्बायाः को नु वर्णयितुमीष्टे ।
अन्तरपि या प्रविश्य प्रमथपतेर्वितनुते रागम् ॥ १९ ॥

गणपतये स्तनघटयोः पदकमले सप्तलोकभक्तेभ्यः ।
अधरपुटे त्रिपुरजिते दधासि पीयूषमम्ब त्वम् ॥ २० ॥

दक्षपीयूषतटिन्यां नासासेतौ विनिर्मिते विधिना ।
भासां भवति शिवे ते मुखे विहारो निरातङ्कः ॥ २१ ॥

कमलाविलासभवनं करुणाकेलीगृहं च कमनीये ।
हरदयिते विनतहिते नयने ते जननि विजयेते ॥ २२ ॥

सर्वाण्यप्यङ्गानि श्रीमन्ति तवेन्दुचूडकुलकान्ते ।
कविनिवहविनुतिपात्रे श्रोत्रे देवि श्रियावेव ॥ २३ ॥

अपि कुटिलमलिनमुग्धस्तव केशः पुत्रि गोत्रसुत्राम्णः ।
बिभ्रत्सुमानि कान्यपि हृदयं भुवनप्रभोर्हरति ॥ २४ ॥

चरणादिकुन्तलान्तप्रकृष्टसौन्दर्यगायिनीरेताः ।
अङ्गीकरोतु शम्भोरम्भोजदृगात्मजस्यार्याः ॥ २५ ॥

द्वादशः स्तवकः

सर्वधैर्यगुणशातशस्त्रिका शम्बरारिजयकेतुपट्टिका ।
मन्दहासकलिका मदापदं पर्वतेन्द्रदुहितुर्व्यपोहतु ॥ १ ॥

मुक्तभोगिकटकेन पाणिना मुग्धगात्रि परिगृह्य ते करम् ।
एकदा शशिकिशोरशेखरः सञ्चचार रजताद्रिभूमिषु ॥ २ ॥

तस्य तत्र परितः परिभ्रमन् वल्लभां वकुलपुष्पचुम्बिनीम् ।
पार्वति त्वदलोकपमद्युतिः चञ्चरीकतरुणो मनोऽधुनोत् ॥ ३ ॥

प्रेयसीं चपलचारुलोचनामुल्लिखन्वपुषि शृङ्गकोटिना ।
त्वद्विलोकितनिभैर्विलोकितैः धूर्जटेरमदयन्मनो मृगः ॥ ४ ॥

मञ्जुकुञ्जभवनानि मालतीपुष्परेणुसुरभिः समीरणः ।
पेशला च पिकबालकाकली मोहमीश्वरि हरस्य तेनिरे ॥ ५ ॥

अग्रतः कुसुमशोभिता लताः पार्श्वतस्त्वमगपालबालिके ।
सर्वतो मदनशिञ्जिनीध्वनिर्धीरता कथमिवास्य वर्तताम् ॥ ६ ॥

कीरकूजितसमाकुले वने शम्भुमम्ब तव पार्श्ववर्तिनम् ।
आजघान मकरध्वजश्शरैरर्दयन्त्यवसरे हि शत्रवः ॥ ७ ॥

ताडितो मकरकेतुना शरैरंसदेशमवलम्ब्य पाणिना ।
एकहायनकुरङ्गलोचनां त्वामिदं किल जगाद शङ्करः ॥ ८ ॥

काकलीकलकलं करोत्यसौ बालचूतमधिरुह्य कोकिला ।
वाचमुद्गिर सरोजलोचने गर्वमुज्झतमियं विमुञ्चतु ॥ ९ ॥

फुल्लकुन्दमकरन्दवाहिनो मल्लिकामुकुलधूलिधारिणः ।
कम्पयन्ति शिशवः समीरणाः पल्लवानि हृदयं च तन्वि मे ॥ १० ॥

वर्णनेन हृतचक्षुषः श्रियः सुभ्रसन्नमधुराकृतीनि ते ।
अङ्गकानि दयिते भजेर्भकः स्वेदबिन्दुहरणेन वाऽनिलः ॥ ११ ॥

तावदेव मम चेतसो मुदे बर्हमेतदनघाङ्गि बर्हिणः ।
यावदक्षिपथमेष विश्लथो गाहते न कबरीभरस्तव ॥ १२ ॥

रागवानधर एष सन्ततं निर्मलद्विजसमीपवर्त्यपि ।
एभिरस्य सहवासतः प्रिये नेषदप्यपगतो निजो गुणः ॥ १३ ॥

चक्षुषः सुदति ते सगोत्रता कैरवैर्निशि दिने कुशेशयैः ।
कश्यपैरपि वशिष्ठबान्धवैर्भूसुपर्वण इव द्विगोत्रिणः ॥ १४ ॥

अल्पयाऽप्यतिसमर्थया स्मितज्योत्स्नया गगनगं हरत्तमः ।
केवलं सुवचनामृतं किरच्चन्द्रबिम्बमतुषारमाननम् ॥ १५ ॥

नित्यमब्जमुखि ते परस्परश्लिष्टमश्लथपटीकुटीरगम् ।
शर्वरीभयविवर्जितं स्थलीचक्रवाकमिथुनं कुचद्वयम् ॥ १६ ॥

लालनीयमयि देवमौलिभिः कोमलं चरणपल्लवद्वयम् ।
कच्चिदद्रिपुरुहूतपुत्रिके न स्थली तुदति कर्कशा तव ॥ १७ ॥

एवमादि वदति त्रिलोचने त्वन्मुखे लसति मौनमुद्रया ।
आततान जलचारिकेतनो नर्तनं नगमहेन्द्रबालिके ॥ १८ ॥

देवि ते पुरजितावतंसितः पारिजातकुसुमस्रजा कचः ।
मानसं पुरजितोऽमुना हृतं स्मर्यते क्व मलिनात्मना कृतम् ॥ १९ ॥

ब्रह्मचर्यनियमादचञ्चला नायिका यदि लुलायमर्दिनी ।
नायकश्च सुमबाणसूदनो वेद को रतिरहस्यमेतयोः ॥ २० ॥

लोचनोत्सवविधौ विशारदे वारिदावरणदोषवर्जिते ।
मर्दयत्यपि नभोगतं तमः श्यामिकारहितसुन्दराकृतौ ॥ २१ ॥

भाति शीतकिरणस्तनन्धये प्राणनायकजटाकुटीजुषि ।
शुभ्रपर्वततटे शुभाङ्गि ते सम्मदाय न बभूव का निशा ॥ २२ ॥

सन्तु भूषणसुधांशुदीधितिव्यक्तमुग्धमुखशोभयोर्मिथः ।
तानि तानि गिरिजा-गिरीशयोः क्रीडितानि जगतो विभूतये ॥ २३ ॥

मोदकादनपरस्य सृष्टये क्रीडितं जननि वां किमप्यभूत् ।
शक्तिभृत्तनयरत्नजन्मने किञ्चिदीश्वरि बभूव खेलनम् ॥ २४ ॥

माधुरीरसपरिप्लुता इमाः काव्यकण्ठविदुषो रथोद्धताः ।
आदधत्वचलनाथनन्दिनीमानसे किमपि मोदमुत्तमम् ॥ २५ ॥

त्रयोदशः स्तवकः

भक्ताम्बुधिं तारयताद्भवन्तं हासोऽद्भुतः कुञ्जरवक्त्रमातुः ।
यो हन्ति बिम्बाधरलङ्घनेऽपि व्यक्तालसत्वो हरितां तमांसि ॥ १ ॥

सक्तः सदा चन्द्रकलाकलापे सर्वेषु भूतेषु दयां दधानः ।
गौरीकटाक्षो रमणो मुनिर्वा मदीयमज्ञानमपाकरोतु ॥ २ ॥

कृपावलोको नगकन्यकायाः करोतु मे निर्मलमन्तरङ्गम् ।
येनाङ्कितः शङ्कर एकतत्त्वं विश्वं लुलोके जगते जगौ च ॥ ३ ॥

कालीकटाक्षो वचनानि मह्यं ददातु मोचामदमोचनानि ।
यत्पातपूतं रघुवंशकारं नराकृतिं प्राहुरजस्य नारीम् ॥ ४ ॥

युष्माकमभ्यां वितनोतु वाणीमेणीदृगेषा गिरिशस्य योषा ।
यस्याः कटाक्षस्य विसारि वीर्यं गिरामयं मे विविधा विलासः ॥ ५ ॥

नगात्मजायाः करुणोर्मिशाली दृगन्तसन्तानधुनीप्रवाहः ।
भीष्मेण तत्तान्भवनामकेन ग्रीष्मेण युष्मांच्छिशिरीकरोतु ॥ ६ ॥

अजस्रमार्द्रा दययाऽन्तरङ्गे यथा भवो निम्नगयोत्तमाङ्गे ।
सन्तापशान्तिं भवसुन्दरी मे करोतु शीतेन विलोकितेन ॥ ७ ॥

पुण्या सदाऽपीश्वर एव सक्ता पतिव्रतासाम्यमिता तवेक्षा ।
कुलाचलाधीश्वरकन्यके मे संहारमंहोवितते र्विधत्ताम् ॥ ८ ॥

शर्वस्य रामे नियमेन हीना श्यामा तवेक्षा गणिकाङ्गनेव ।
नीचेऽपि मर्त्ये निपतत्यनर्घा बिभर्ति ना षोडश यः सुवर्णान् ॥ ९ ॥

पद्मायताक्षि क्षितिधारिकन्ये कटाक्षनामा तव कालसर्पः ।
यं सन्दशत्येष जगत्समस्तं विस्मृत्य चाहो न दधाति मोहम् ॥ १० ॥

ईशद्विषा शैलमहेन्द्रकन्ये करोति मैत्रीं विषमायुधेन ।
प्रभाषते पातकिनश्च पक्षे कुतः कटाक्षो न तवाम्ब मुग्धः ॥ ११ ॥

कृपान्वितः कर्णसमीपचारी श्रीमान्सदा पुण्यजनानुकूलः ।
साम्यं कुरुणामधिपस्य शम्भोः प्राणप्रिये ते भजते कटाक्षः ॥ १२ ॥

कर्णान्तिकस्थोऽपि न धर्मवैरी कृष्णोऽपि मातर्नकुलं न पाति ।
शीतोऽपि सन्दीपयति स्मरार्चिं हरस्य ते शैलसुते कटाक्षः ॥ १३ ॥

अयं कटाक्षस्तव तोयवाहः कारुण्यकाले परिजृम्भमाणः ।
गृहेषु लीनान् सुखिनो विहाय निराश्रयान् सिञ्चति विश्वमातः ॥ १४ ॥

कस्यापि वाचा वपुषा बलेन समस्य सर्वैरपि यन्निदेशाः ।
अम्भोधिवेलास्वपि न स्खलन्ति शम्भोः प्रियेऽयं तव दृक्प्रसादः ॥ १५ ॥

द्वारेषु तेषां विचरन्ति शूराः सौधेषु सारङ्गदृशस्तरुण्यः ।
प्रगल्भवाचः कवयः सभासु शर्वाणि ते येषु कृपाकटाक्षः ॥ १६ ॥

यत्राम्ब ते कोऽपि कटाक्षलेशः स दुर्जयः सङ्गरसीम्नि शूरः ।
पूर्वं दिवं पूरयति द्विषद्भिस्ततो यशोभिर्भुवमिन्दुगौरैः ॥ १७ ॥

यं तारकाकान्तकलापकान्ते न लोकसे कोऽपि न लोकते तम् ।
यं लोकसे तेन विलोकितोऽपि श्रियं समृद्धां समुपैति लोकः ॥ १८ ॥

सुधां हसन्ती मधु चाक्षिपन्ती यशो हरन्ती वनिताधरस्य ।
परिष्करोत्यस्य कवित्वधारा मुखं हरप्रेयसि लोकसे यम् ॥ १९ ॥

सर्वेन्द्रियानन्दकरी पुरन्ध्री विद्याऽनवद्या विपुला च लक्ष्मीः ।
इयं त्रिरत्नी पुरुषस्य यस्य दुर्गे त्वया दृष्टमिमं तु विघ्नः ॥ २० ॥

मुधा क्षिपस्यद्रिसुते कटाक्षान् कैलासकान्तारमहीरुहेषु ।
इतः किरेषत्तव नास्ति हानिः सिद्ध्यत्यभीष्टं च समस्तमस्य ॥ २१ ॥

शीताचलाधीशकुमारि शीतः संरक्षणे संश्रितमानवानाम् ।
दुर्धर्षदुष्टासुरमर्दनेषु नितान्तमुष्णश्च तवावलोकः ॥ २२ ॥

रुषा समेतं विदधाति नाशं करोति पोषं कृपया सनाथम् ।
अम्बौषधय्येव तवेक्षितस्य योगस्य भेदेन गुणस्य भेदः ॥ २३ ॥

नाशाय तुल्योद्धतकामलोभक्रोधत्रिदोषस्य भवामयस्य ।
शिवप्रिये वीक्षितभेषजं ते क्रीणानि भक्त्या वद भोः कियत्या ॥ २४ ॥

अभिष्टुतां चारणसिद्धसङ्घैस्त्रिष्टुब्विशेषा अपि मर्त्यसूनोः ।
कृपाकटाक्षैर्विनतान्पुनानां कपर्दिनः सम्यदयन्तु कान्ताम् ॥ २५ ॥

चतुर्दशः स्तवकः

कारणमखिलमतीनां वारणमन्तर्लसत्तमसः ।
मन्दस्मितं महेश्वरसुदृशो मे श्रेयसे भवतु ॥ १ ॥

विश्वतनुस्तनुगात्री वज्रमयी पुष्पसुकुमारी ।
सर्वस्य शक्तिरबला काली गौर्यम्बिका जयति ॥ २ ॥

तामाहुर्जगदम्बां गौरीं केचित्परे कालीम् ।
सा गौरी महिलातनुरम्बरतनुरुच्यते काली ॥ ३ ॥

पाचकशक्तेः काल्याः केवललिङ्गेन भिद्यते कालः ।
यत्पाकतो गभीराद्भुवने सर्वेऽपि परिणामाः ॥ ४ ॥

सर्वभुवनाश्रयत्वात् काली नाम्ना दिगन्येन ।
लोके तु व्यवहरणं विदुषां दिक्कालयोर्भाक्तम् ॥ ५ ॥

दिगदितिरगाद्यखण्डा परिणमयित्री स्मृता काली ।
दक्षस्यैका दुहिता सा द्वे गुणभेदमुग्धदृशाम् ॥ ६ ॥

देहे देहे सेयं कुण्डलिनी नाम जगदम्बा ।
सा स्वपिति संसृतिमतां युञ्जानानां प्रबुद्धा स्यात् ॥ ७ ॥

मूलाधारादग्निर्ज्वलति शिरस्तः शशी द्रवति ।
कुण्डलिनीमयि मन्ये वीणाशयनात्प्रबुद्धेयम् ॥ ८ ॥

यद्द्रवति तत्र किं त्वं किं तत्र त्वमसि यज्ज्वलति ।
किमु तत्रासि महेश्वरि यदुभयमेतद्विजानाति ॥ ९ ॥

एतावग्निषोमौ ज्वालाभिश्चन्द्रिकाभिरपि ।
आवृणुतस्तनुमनयोर्व्यक्तित्वं मे पशुर्भवतु ॥ १० ॥

अग्निस्त्वं सोमस्त्वं त्वमधो ज्वलसि द्रवस्यूर्ध्वम् ।
अमृतमनयोः फलं त्वं तस्य च भोक्त्री चिदम्ब त्वम् ॥ ११ ॥

किन्नु सुकृतं मया कृतमखिलेश्वरि किं तपस्तप्तम् ।
क्रीडयसि मां प्रतिक्षणमानन्दसुधानिधावन्तः ॥ १२ ॥

क्षान्तं किं मम दुरितं शान्तं किं देवि ते स्वान्तम् ।
अनुगृह्णासि विचित्रं मामप्यपराधिनां प्रथमम् ॥ १३ ॥

काले काले सन्ध्यारूपा नोपासिता भवती ।
विच्छिन्नः स्मार्ताग्निस्रोता कुत एव वह्नीनाम् ॥ १४ ॥

दातुं नार्जितमन्नं बहु देवेभ्यश्च भूतेभ्यः ।
यत्किञ्चिदार्जितं वा कलत्रपुत्रान्वितोऽश्नामि ॥ १५ ॥

कश्चिदपि पापहारी न पुरश्चरितश्च ते मन्त्रः ।
कं गुणमभिलक्ष्य मम प्रबुद्धयसेऽन्तर्जगन्मातः ॥ १६ ॥

तव मयि पृथक्तनूजप्रेमा चेत्पक्षपातोऽयम् ।
अथवा सतां निसर्गः सोऽयं त्वयि चाम्ब संभाव्यः ॥ १७ ॥

लक्ष्यं विनैव मन्त्रः किं सिद्ध्यति कोटिशोऽप्युक्तः ।
दध्मस्तद्यदि लक्ष्यं तव रूपं गलति हा मन्त्रः ॥ १८ ॥

सङ्कल्पानां वाचामनुभूतीनां च यन्मूलम् ।
यत्र प्राणो बद्धस्तल्लक्ष्यं देवि ते रूपम् ॥ १९ ॥

नैसर्गिकस्ववृत्तेरहङ्कृतेर्मूलमन्विष्य ।
त्वां किल साक्षात्कुरुते रमणमहर्षेरियं दृष्टिः ॥ २० ॥

मन्ये पर्वतकन्ये मम सेयमहङ्कृतिर्महती ।
अवतरता वर्षगणैरपि तन्मूलं न लब्धमहो ॥ २१ ॥

एष प्रौढो भगवति बहुलं गर्जत्यहङ्कारः ।
एतस्मिन्नयि काले भवती चाबोधि कुण्डलिनी ॥ २२ ॥

तव पश्चात्सम्भूतिं जानाति न सोऽयमद्यापि ।
प्रागिव गर्जति धीरं बिभेति मृत्योर्न नेदिष्ठात् ॥ २३ ॥

अतिपुष्टमहङ्कारं पशुमेतं तुभ्यमर्पयते ।
प्रमथपतिप्राणेश्वरि गणपतिरेकान्तभक्तोऽयम् ॥ २४ ॥

उपगीतयो गणपतेरुपतिष्ठन्तामिमाः प्रीत्या ।
उत्सवसहस्रलोलामुकारवाच्यस्य गृहनाथाम् ॥ २५ ॥

पञ्चदशः स्तवकः

आपदामपहरन्तु ततिं नः सम्पदामपि दिशन्तु समृद्धिम् ।
दन्तकुन्दरुचिदन्तबलानि व्योमकेशसुदृशो हसितानि ॥ १ ॥

अल्पमप्यधिकशक्तिसमृद्धं मन्दमप्यधिकसूक्ष्मविसारम् ।
सुस्मितं स्मरविरोधिरमण्याः कल्पतां मम कुलस्य शुभाय ॥ २ ॥

पुष्कराद्रविमतो भुवमेतां भूमितश्शशधरं क्रममाणा ।
नैव मुञ्चति पदं बत पूर्वं नोत्तरं व्रजति नेशपुरन्ध्री ॥ ३ ॥

भूषणेष्विव सवित्रि सुवर्णं मृत्तिकामिव घटेष्वखिलेषु ।
विश्ववस्तुषु निरस्तविशेषां देवि पश्यति सतीं विबुधस्त्वाम् ॥४॥

किट्टभूतमखिलेश्वरजाये दृश्यजातमखिलं निजपाके ।
प्राणबुद्धिमनसामिह वर्गः सारभूत इति सूरिजनोक्तिः ॥ ५ ॥

सारमीश्वरि तिलेष्विव तैलं विग्रहेषु निखिलेषु निगूढम् ।
ये धिया मथनतो विदुरेकं ते भवन्ति विबुधास्त्वयि लीनाः ॥६॥

आयसं त्रिभुवनेश्वरि पिण्डं वह्निनेव तपसा तनुपिण्डम् ।
यस्य चिज्ज्वलनजालमयं स्यात् तप्तमम्ब स तवालयभूतः ॥ ७ ॥

योऽरणेर्मथनतोऽतिपवित्रं वीतिहोत्रमिव वीतकलङ्कः ।
प्राणमुज्ज्वलयति स्वशरीरात् त्वामसावभयदेऽर्हति यष्टुम् ॥८॥

प्राणता इवसितमेव विचार्यं कुर्वता करणमेव निभाल्यम् ।
गच्छता गमनमेव विशोध्यं तत्तनौ मथनमागमबोध्यम् ॥ ९ ॥

यो रसं पिबति मूर्धसरोजात् सोमपोऽयमनघः प्रयतात्मा ।
अग्निहोत्रमखिलेश्वरि नित्यं मूलकुण्डदहनस्थितिरस्य ॥ १० ॥

चिन्मयी पिबसि सोममिमं किं सोम एव किमसावसि मातः ।
पीयसे पिबसि च स्वयमेका पेयपातृयुगलं किमु भूत्वा ॥ ११ ॥

तैजसं कनकमग्निवितप्तं तेज एव कनकाङ्गि यथा स्यात् ।
मोदरूपकलया तव तप्तं तन्मयं भवति मोदजपिण्डम् ॥ १२ ॥

काऽपि मोदलहरी तव वीचिर्निर्गता दशशतारसुधाब्धेः ।
पूरयत्यखिलमम्ब शरीरं नेह वेद्मि परमे जडभागम् ॥ १३ ॥

सेयमुत्तमतमा निपतन्ती शीतलाद्दशशतारपयोदात् ।
प्रेरितादखिलराज्ञि भवत्या बुद्धिसस्यमवताद्रसवृष्टिः ॥ १४ ॥

दुग्धसिन्धुमथनादमृतं वा शब्दसिन्धुमथनात्प्रणवो वा ।
लभ्यते सुकृतिभिस्तव वीचिर्मूर्धकञ्जमथनाद्रस एषः ॥ १५ ॥

अस्थिषु प्रवहति प्रतिवेगं मज्जसारममृतं विदधाना ।
बिभ्रती मदमनुष्णमदोषं मूर्धकञ्जनिलये तव धारा ॥ १६ ॥

तैत्तिरीयकथितो रसलाभः सोऽयमेव सकलागमवर्ण्ये ।
एतदेव शशिमण्डलनाथे तन्त्रभातितपरामृतपानम् ॥ १७ ॥

मूर्धसोममजरामररूपे युक्तवीक्षणकरेण निपीड्य ।
शम्भुसुंदरि सुनोमि धिनोमि त्वां प्रदीप्तकुलकुण्डनिशान्ताम् ॥ १८॥

दृष्टिरेव रविदीधितिरुग्रा शीर्षकञ्जशशिनं प्रविशन्ती ।
शीतलामृतमयी खलु भूत्वा योगिनो द्रवति मोदकला ते ॥ १९॥

मूर्धनि द्रवसि योगयुतानां चक्षुषि ज्वलसि शङ्करभामे ।
तिष्ठसि स्थिरपदा कुलकुण्डे बाह्यतः स्खलसि नैव कदाऽपि ॥ २०॥

सा यदि द्रवति मोदकला स्यात् सा यदि ज्वलति चित्कलिका स्यात्
सा परा स्थिरपदा यदि तिष्ठत्यक्षरा भवति काचन सत्ता ॥ २१॥

पश्यता नयनमण्डलवृत्तिं गृह्यसे त्वमचलाधिपकन्ये ।
जानता दशशतारविलासं स्पृश्यसे विदितमम्ब रहस्यम् ॥ २२ ॥

व्याप्तशक्त्यसुबलेन लसन्ती भानुबिम्बनयनेन तपन्ती ।
चन्द्रबिम्बमनसा विहरन्ती सा पुनर्जयति मूर्धनि वसन्ती ॥ २३॥

स्वागतं सकललोकनुतायै स्वागतं भुवनराजमहिष्यै ।
स्वागतं मयि भृशं सदयायै स्वागतं दशशतारमितायै ॥ २४ ॥

सत्कविक्षितिभुजो ललिताभिः स्वागताभिरनघाभिरिमाभिः ।
स्वागतं भणितमस्तु भवान्यै खेलनाय शिर एतदिताय ॥ २५ ॥

षोडशः स्तवकः

महोर्विहतमोहं महेशमहिलायाः ।
स्मितं वितनुतान्मे गृहेषु महमग्रयम् ॥ १ ॥

इयद्बहुलगोलं जगल्लघु दधाना ।
पितामहमुखैरप्यखण्डितविधाना ॥ २ ॥

अदुष्टचरितेभ्यः शुभान्यभिदधाना ।
कुलानि मलिनानां हतानि विदधाना ॥ ३ ॥

दुकूलमरुणांशुप्रभं परिदधाना ।
हरस्य रजताद्रिक्षितीशितुरधीना ॥ ४ ॥

मुनीन्द्रकृततन्त्रप्रसिद्धबहुदाना ।
उमा बलमलं नस्तनोत्वतुलमाना ॥ ५ ॥

निरस्तविषयां यद् दधाति मतिकीलाम् ।
समस्तजगदीशे धृतिस्तव मतेयम् ॥ ६ ॥

श्रुता प्रवणचित्तं स्मृता नरमपापम् ।
धृता हृदि विधत्से गतस्वपरभावम् ॥ ७ ॥

अहंमतितटिन्याः सतामवनिमूलम् ।
त्वमेव किल सेयं महर्षिरमणोक्तिः ॥ ८ ॥

अहंमतिलतायास्त्वयीशवधु कन्दे ।
स्थितोऽम्ब भुवनस्य प्रविन्दति रहस्यम् ॥ ९ ॥

यदेतदखिलाम्ब प्रसिद्धमिव दृश्यम् ।
तवैव किल शालं गतो भणति मूलम् ॥ १० ॥

प्रपश्यसि पराची जगद्विविधभेदम् ।
स्वतः किमपि नान्यत्प्रतीचि पुरतस्ते ॥ ११ ॥

स्तुता भवसि शश्वत् स्मृता च भजने त्वम् ।
धृता भवसि योगे तता भवसि बोधे ॥ १२ ॥

स्तुता दिशसि कामं स्मृता हरसि पापम् ।
धृताऽस्यधिकशक्त्यै तता भवसि मुक्त्यै ॥ १३ ॥

विशुध्यति यताशी प्रमाद्यति न शुद्धः ।
प्रमादरहितस्य स्फुटे लससि कञ्जे ॥ १४ ॥

स्फुटं यदि सरोजं नटीव पटु नाट्यम् ।
करोषि यतबुद्धेर्जगज्जननि शीर्षे ॥ १५ ॥
शिरोगतमिदं नः प्रफुल्लमयि पद्मम् ।
अनल्पमकरन्दं त्वमम्ब भव भृङ्गी ॥ १६ ॥

सरोजमतुदन्ती पिबाम्ब मकरन्दम् ।
महामधुकरि त्वं भजेर्मदममन्दम् ॥ १७ ॥

अमङ्गलमितः प्राङ्मयेशवधु भुक्तम् ।
इतः परममेये सुखान्यनुभव त्वम् ॥ १८ ॥

अहङ्कृतिवशान्मे चिदीश्वरि पुराऽभूत् ।
तवाभवदिदानीं ममास्ति न विभुत्वम् ॥ १९ ॥

यदाऽभवदियं मे तदाऽन्वभवदार्तिम् ।
तवेश्वरि भवन्ती भुनक्तु शमिदानीम् ॥ २० ॥

करोत्वियमहन्ता विवादमधुनाऽपि ।
तथाऽपि पुरतस्ते महेश्वरि विवीर्या ॥ २१ ॥

इयं च तव बुद्धेर्यतो भवति वृत्तिः ।
इमामपि कुरु स्वां क्षमावति विरोषा ॥ २२ ॥

सुधाब्धिरिह मातस्तरङ्गशतमाली ।
चिदभ्रपुरमत्र प्रभापदमदभ्रम् ॥ २३ ॥

कुरु त्वमिदमेकं निजालयशतेषु ।
सवित्रि विहरास्मिन् यथेष्टमयि देहे ॥ २४ ॥

कुमारललितानां कृतीर्गणपतीया ।
करोतु मुदमेषा कपर्दिदयितायाः ॥ २५ ॥

सप्तदशः स्तवकः

पापविधूतौ निर्मलगङ्गा तापनिरासे चन्द्रमरीचिः ।
भर्गपुरन्ध्रीहासकला मे भद्रमभिश्रं काऽपि करोतु ॥ १ ॥

शिष्टकुलानां सम्मदयित्री दुष्टजनानां संशमयित्री ।
कष्टमपारं पादजुषो मे विष्टपराज्ञी सा विधुनोतु ॥ २ ॥

नूतनभास्वद्बिम्बनिभाङ्घ्रिं शीतलरश्मिद्वेषिमुखाब्जाम् ।
ख्यातविभूतिं पुष्पशरारेः पूतचरिघां योषितमीडे ॥ ३ ॥

उज्ज्वलतारे व्योम्नि लसन्ती सारसबन्धौ भाति तपन्ती ।
शीतलभासा चिन्तनकर्त्री पातु कुलं मे विष्टपभर्त्री ॥ ४ ॥

प्राणमनोवाग्व्यस्तविभूतिर्लोकविधातुः काचन भूतिः ।
पुष्करपृथ्वीपावकरूपा शुष्कमघं नः सा विदधातु ॥ ५ ॥

इष्टफलानामम्ब समृद्ध्यै कष्टफलानां तत्क्षणधूत्यै ।
चेष्टितलेशोद्दीपितशक्तिं विष्टपभर्त्रिं त्वामहमीडे ॥ ६ ॥

भूमिरुहाग्रस्थापितभाण्डाद्यो मधुपायं पायमजस्रम् ।
विस्मृतविश्वो नन्दति मातस्तत्र किल त्वं धाम दधासि ॥ ७ ॥

कोऽपि सहस्रैरेष मखानां शेष इतीड्यः पन्नगराजः ।
उद्विरतीदं यद्वदनेभ्यो देवि तनौ मे तद्वत पासि ॥ ८ ॥

साकममेये देवि भवत्या पातुमहन्ता यावदुदास्या ।
तावदियं तां मूर्छयतीशे पन्नगराजोद्गारजधारा ॥ ९ ॥

शाम्यति चिन्ताजीवितमस्यामिन्द्रियसत्ताऽप्यस्तमुपैति ।
याति निरुद्धा हा गलदेशे संशयमेषा मातरहन्ता ॥ १० ॥

गौरि महेशप्राणसखीमां पाहि विपन्नां मातरहन्ताम् ।
सा यदि जीवेदीश्वरी तुभ्यं दासजनस्तामर्पयतेऽयम् ॥ ११ ॥

त्वत्स्मृतिवीर्याच्छान्तिसमृद्धां मातरहन्तमां शुद्धतमां मे ।
आत्मभुजिष्यां कर्तुमिदानीं शान्तधियस्ते कोऽस्ति विकल्पः ॥ १२ ॥

मन्दरधारी नामृतहेतुर्वासुकिरज्जुर्नामृतहेतुः ।
मन्थनहेतुस्साऽमृतहेतुः सर्वबलात्मा शर्वपुरन्ध्री ॥ १३ ॥

प्राणिशरीरं मन्दरशैलो मूलसरोजं कच्छपराजः ।
पूर्णमनन्तं क्षीरसमुद्रः पृष्ठगवीणा वासुकिरज्जुः ॥ १४ ॥

दक्षिणनाडी निर्जरसेना वामगनाडी दानवसेना ।
शक्तिविलासो मन्थनकृत्यं शीर्षजधारा काऽपि सुधोक्ता ॥ १५ ॥

कण्ठनिरुद्धे भूरिविषाग्नौ तैजसलिङ्गावासिहरेण ।
त्वद्बलजातं स्वाद्वमृतं को देवि निपीय प्रेत इह स्यात् ॥ १६ ॥

येन विभुस्ते माद्यति शर्वो यत्र शिवे त्वं क्रीडसि हृष्टा ।
सम्मदमूलं तं मदमद्ये वर्धय पुत्रेऽनुग्रहपात्रे ॥ १७ ॥

यो मदमीदृङ्मार्गमुपेक्ष्य स्वर्विभुपूज्ये गर्वसमेतः ।
आहरति श्रीवाह्यसमृद्ध्या ना सुरया वा सोऽसुर उक्तः ॥ १८ ॥

ताम्यति तीव्राफेननिषेवी क्लाम्यति संवित्पत्रनिषेवी ।
भ्राम्यति हालाभाण्डनिषेवी शाम्यति शीर्षद्रावनिषेवी ॥ १९ ॥

अस्तु विरेके पथ्यमफेनं पत्रमजीर्णेष्वस्तु निषेव्यम् ।
अस्तु हितं तद्यक्ष्मणि मद्यं संसृतिहारी देवि रसस्ते ॥ २० ॥

नैव महान्तस्सरवसमृद्धाः सर्वमदेष्वप्यम्ब चलन्तु ।
अल्पजनानां मादकवस्तुप्राशनमीशे नाशनमुक्तम् ॥ २१ ॥

केऽपि यजन्ते यन्मधुमांसैस्त्वां त्रिपुरारेर्जीवितनाथे ।
अत्र न यागो दूषणभागी द्रव्यससङ्गो दुष्यति यष्टा ॥ २२ ॥

दक्षिणमार्गे सिद्ध्यति भक्तः सव्यसरण्यां सिद्ध्यति वीरः ।
नेश्वरि सव्ये नाप्यपसव्ये सिद्ध्यति दिव्ये त्वद्ध्वनिमौनी ॥ २३ ॥

नार्चनभारो नापि जपोऽस्यां दिव्यसरण्यां भव्यतमायाम् ।
केवलमम्बापादसरोजं निश्चलमत्या मृग्यमजस्रम् ॥ २४ ॥

काचिदमूल्या चम्पकमालावृत्तनिबद्धा मञ्जुलमाला ।
अस्तु गणेशस्येश्वरकान्ताकण्ठविलोला चम्पकमाला ॥ २५ ॥

अष्टादशः स्तवकः

धुन्वन्त्यस्तिमिरततिं हरिच्चटीनां
घिन्वन्त्यः पुरमथनस्य लोचनानि ।
स्कन्दाम्बाहसितरुचो हरन्तु मोहं
सान्द्रं मे हृदयगतं प्रसह्य सद्यः ॥ १ ॥

तन्वाना विनतहितं विरोधिवर्गं
धुन्वाना बुधजनमोदमादधाना ।

सम्प्राज्ञी त्रिदिवधरारसातलानां
रुद्राणी भणतु शिवानि मत्कुलस्य ॥ २ ॥

योऽम्ब त्वां हृदि विदधत्तटित्प्रकाशां
पीयूषद्युतिमदहन्मुखारविन्दाम् ।
अन्यत्तु स्मृतिपथतो धुनोति सर्वं
कामारेः सुदति न तस्य भुव्यसाध्यम् ॥ ३ ॥

कालाभ्रद्युतिमसमानवीर्यसारां
शक्त्यूर्मिभ्रमकरशुक्लघोरदंष्ट्राम् ।
यो धीरो मनसि दधाति भर्गपत्नि
त्वामस्य प्रभवति सङ्गरेषु शस्त्रम् ॥ ४ ॥

यः प्राज्ञस्तरुणदिवाकरोज्ज्वलाङ्गीं
तन्वङ्गि त्रिपुरजितो विचिन्तयेत्त्वाम् ।
तस्याज्ञां दधति शिरस्सु फुल्लजाजी-
मालां वा धरणिजुषो वशे भवन्तः ॥ ५ ॥

यो राकाशशधरकान्तिसारशुभ्रां
बिभ्राणां करकमलेन पुस्तकं त्वाम् ।
भूतेशं प्रभुमसकृत्प्रबोधयन्तीं
ध्यायेद्वाग्भवति वशेऽस्य नाकदूती ॥ ६ ॥

जानीमो भगवति भक्तचित्तवृत्ते-
स्तुल्यं त्वं सपदि दधासि रूपमग्र्यम् ।
प्रश्नोऽयं भवति नगाधिनाथकन्ये
रूपं ते मदयति कीदृशं स्मरारिम् ॥ ७ ॥

चारु स्यादलमिति वक्तुमम्ब शक्यं
रूपं ते न वदति कोऽपि कीदृशं वा ।
सम्मोहं परमुपयान्ति कान्तिभाण्डे
कामारेरपि नयनानि यत्र दृष्टे ॥ ८ ॥

सङ्कल्पैः किमु तव भूषणान्यभूवं-
च्छिल्पीन्द्राः किमु विदधुर्यथाऽत्र लोके ।
तत्स्वर्णं भगवति कीदृशं मणीनां
किं रूपं भवति च तत्र योजितानाम् ॥ ९ ॥

यान्यङ्गान्यखिलमनोज्ञसारभूता-
न्येतेषामपि किमु भूषणैरुमे ते ।
आहोस्विल्ललिततमानि भान्ति भूयो
भूषाभिर्विकृततमाभिरप्यमूनि ॥ १० ॥

मुक्ताभिर्भवति तवाम्ब किन्नु हारः
पीयूषद्युतिकरसारनिर्मलाभिः ।
सुण्डैर्वा धवलधवलशब्दमादधद्भिः
सङ्घर्षात्त्रिभुवनसार्वभौमभामे ॥ ११ ॥

वस्त्रं स्याद्यदि तव सर्वशास्त्रगम्ये
कार्पासं दिवि च तदुद्भवोऽनुमेयः ।
क्षौमं चेद्भगवति तस्य हेतुभूताः
कीटाः स्युर्गगनजगत्यपीति वाच्यम् ॥ १२ ॥

रुद्रस्य प्रियदयितेऽथवा सुरद्रु-
र्भूषाणां मणिकनकप्रकल्पितानाम् ।
वस्त्राणामपि मनसे परं हितानां
कामं ते भवति समर्पकः समर्थः ॥ १३ ॥

सुस्कन्धो बहुविटपः प्रवालशोभी
सम्फुल्लप्रसवसुगन्धवासिताशः ।
वृक्षः किं भगवति कल्पनामकोऽयं
सङ्कल्पः किमु तव कोऽपि देवि सत्यः ॥ १४ ॥

सङ्कल्पान्न भवति कल्पपादपोऽन्यः
स्वर्दोग्ध्री पुनरितरा न कुण्डलिन्याः ।
यः कुर्याद् द्वयमिदमुद्गतात्मवीर्यं
कारुण्यात्तव भुवि चास्य नाकभाग्यम् ॥ १५ ॥

आपोनं भवति सहस्रपत्रकञ्जं
वत्सोऽस्याः पटुतरमूलकुण्डवह्निः ।
दोग्धाऽऽत्मा दहरसरोरुहोपविष्टो
मौनं स्यात्सुरसुरभेस्तनूषु दोहः ॥ १६ ॥

दोग्ध्र्यास्ते भगवति दोहनेन लब्धं
वत्साग्निप्रथमनिपानसद्रवायाः ।

दुग्धं स्वाद्वमृतमयं पिबन्ममात्मा
सन्तृप्तो न भवति दुर्भरोऽस्य कुक्षिः ॥ १७ ॥

वत्सोऽग्निः पिबति दृढाङ्घ्रिरम्ब पश्चा-
दश्रान्तं पिबति दुहन् पुरोऽन्तरात्मा ।
वृद्धिं च व्रजति पयः प्रतिप्रदोहं
दोग्ध्र्यास्ते द्रव इह कुण्डलिन्यपारः ॥ १८ ॥

सोमस्य द्रवमिममाहुरम्ब केचिद्
दुग्धाब्धेरमृतरसं गदन्ति केऽपि ।
बाष्पं केऽप्यभिदधते तु कौलकुण्डं
पीनोधस्स्रवमितरे भणन्ति धेनोः ॥ १९ ॥

मूले त्वं ज्वलदनलप्रकाशरूपा
वीणायां प्रबलमहामदोष्मरूपा ।
शीर्षाब्जे सततगलद्रसस्वरूपा
भ्रूमध्ये भवसि लसत्तटित्स्वरूपा ॥ २० ॥

हार्दे चेद्वतरसीह पुण्डरीके
छायावत्सकलमपि प्रपश्यसि त्वम् ।
आरूढा दशशतपत्रमद्रिपुत्रि
स्याश्चेत्त्वं भणसि जगत्सुधासमुद्रम् ॥ २१ ॥

नेत्राभ्यां सरसिरुहच्छदायताभ्यां
वक्त्रेण प्रविमलहासभासुरेण ।
प्रत्यक्षा मम मनसः पुरः पुरन्ध्री
कामारेः परिणतमस्मदीयभाग्यम् ॥ २२ ॥

पुण्यानां परिणतिरेव भूतभर्तुः
सिद्धानां बलनिधिरेव कोऽपि गूढः ।
भक्तानां दृढतरिरेव शोकसिन्धौ
मग्नानां मम जननी महींध्रपुत्री ॥ २३ ॥

उद्धर्तुं विनतजनं विषादगर्तात्
संस्कर्तुं भुवनहिताय योगयुक्तम् ।
संहर्तुं खलकुलमुद्धतं च दर्पाद्
भर्गस्य प्रियतरुणी सदा सदीक्षा ॥ २४ ॥

मृद्वीकां मधुरतया सुधां महिम्ना
गाम्भीर्यात्सुरतटिनीं च निर्जयन्ती ।
शर्वाणीचरितपरा प्रहर्षिणीनां
श्रेणीयं जयतु गणेश्वरेण बद्धा ॥ २५ ॥

एकोनविंशः स्तवकः

प्रफुल्लकल्पपादपप्रसूनसद्यशोदरम् ।
महारुजं धुनोतु ते महेशसुन्दरीस्मितम् ॥ १ ॥

मुनीन्द्रमूलवेदिभूधनञ्जयप्रबोधनम् ।
यतीन्द्रहार्दपेटिकाकवाटबन्धभेदनम् ॥ २ ॥

यथाविधिक्रियापरद्विजातिचित्तशोधनम् ।
ममाम्बिकास्मितं भवत्वघप्रतापरोधनम् ॥ ३ ॥

सुवर्णसालभञ्जिका चयेव शोभयाऽधिका ।
अतीव मार्दवान्विता नवेव पुष्पिता लता ॥ ४ ॥

सुपर्वमौलिरत्नभाविराजिहेमपादुका ।
मरालिकानिमन्त्रकप्रशस्तरत्ननूपुरा ॥ ५ ॥

वलक्षदीधितिप्रभाविशेषहृन्नखावली ।
मुनीन्द्रशुद्धमानसप्रमेयपादसौष्ठवा ॥ ६ ॥

घनीभवत्तटित्प्रभाप्रवाहकल्पजङ्घिका ।
मतङ्गजेन्द्रनासिकामनोज्ञसक्थिशोभिनी ॥ ७ ॥

प्रसूनसायकागमप्रवादचुञ्चुकाञ्चिका ।
विशालकेशचुम्बितोल्लसन्नितम्बमण्डला ॥ ८ ॥

अजाण्डपिण्डसंहतिप्रपूर्णकुक्षिशालिनी ।
अपारदिव्यकान्तिवार्निधाननाभिदीर्घिका ॥ ९ ॥

बिसप्रसूनसायकच्छुराभरोमराजिका ।
जगत्त्रयीवसज्जनोपजीव्यदुग्धभृत्कुचा ॥ १० ॥

महेशकण्ठकन्धकप्रशस्तबाहुवल्लरी ।
समस्तविष्टपाभयप्रदायिपाणिपङ्कजा ॥ ११ ॥
विलोलहारमौक्तिकप्रतानसंवदत्स्मिता ।
विशुद्धसुन्दरस्मितप्रकाशभासिताम्बरा ॥ १२ ॥
सुकोमलोष्ठकम्पनप्रभीतदुर्जयासुरा ।
सुयुक्तकुन्दकुड्मलप्रकाशदन्तपङ्क्तिका ॥ १३ ॥
शरत्सुधांशुमण्डलप्रभाविगर्हणानना ।
सुधामरन्दवज्जपासुमोपमाधराधरा ॥ १४ ॥
तिलप्रसूनचारुताऽपहासिभासिनासिका ।
नवीनभाभनासिकाविलम्बिदिव्यमौक्तिका ॥ १५ ॥
विशुद्धगण्डबिम्बितस्वरूपरत्नकुण्डला ।
महामहस्तरङ्गितप्रभावशालिलोचना ॥ १६ ॥
दलान्तरस्थयामिनीप्रभुप्रभालिकस्थली ।
मयूरबर्हगर्हणप्रकृष्टकेशभासिनी ॥ १७ ॥
दिवाकरायुतोज्ज्वला हिमांशुलक्षशीतला ।
तटित्सहस्रभासुरा निरङ्कचन्द्रशेखरा ॥ १८ ॥
नभोन्तरालचारिणी महाविचित्रकारिणी ।
कुलाग्निकुण्डशायिनी जगत्कथाविधायिनी ॥ १९ ॥
नभस्तले बलेश्वरी धरातले क्रियेश्वरी ।
दिवाकरे विभेश्वरी सुधाकरे रसेश्वरी ॥ २० ॥
महेशवेश्मदीपिका जगत्त्रयप्रमापिका ।
अशेषशीर्षशायिनी समस्तहृन्निवासिनी ॥ २१ ॥
गुणस्तवे गुणस्तवे गुणप्रकर्षदायिनी ।
विचिन्तने विचिन्तने विशिष्टशक्तिधायिनी ॥ २२ ॥
भ्रमाकुलेन दुस्तरा भवालसेन दुर्गमा ।
अमन्त्रकेण दुर्भरा जगत्त्रयेण दुर्जया ॥ २३ ॥
सुवर्णचेलधारिणी समस्तमोदकारिणी ।
विलासिनी निरामया विचिन्त्यतां मनस्त्वया ॥ २४ ॥
पदाब्जवन्दिनः कवेरियं प्रमाणिकावली ।
महेशमानसेश्वरीगृहे महाय कल्पताम् ॥ २५ ॥

विंशः स्तवकः

प्रीतिविकासे स्वल्पतमो रोषविशेषे भूरितरः ।
अद्भुतहासो विश्वसुवो रक्षतु साधुं हन्तु खलम् ॥ १ ॥

सज्जनचित्तानन्दकरी संश्रितपापव्रातहरी ।
लोकसवित्री नाकचरी स्यान्मम भूयो भद्रकरी ॥ २ ॥

अर्चनकाले रूपगता संस्तुतिकाले शब्दगता ।
चिन्तनकाले प्राणगता तत्त्वविचारे सर्वगता ॥ ३ ॥

उज्ज्वलरूपे नृत्यकरी निष्प्रभरूपे सुप्तिकरी ।
गोपितरूपे सिद्धिकरी गोचररूपे बन्धकरी ॥ ४ ॥

अम्बरदेशे शब्दवती पावकताते स्पर्शवती ।
काञ्चनवीर्ये रूपवती सागरकाञ्च्यां गन्धवती ॥ ५ ॥

अप्स्वमलासु स्पष्टरसा चन्द्रविभायां गुप्तरसा ।
संसृतिभोगे सर्वरसा पूर्णसमाधावेकरसा ॥ ६ ॥

चक्षुषि दृष्टिश्चाततमा चेतसि दृष्टिश्चित्रतमा ।
आत्मनि दृष्टिश्शुद्धतमा ब्रह्मणि दृष्टिः पूर्णतमा ॥ ७ ॥

शीर्षसरोजे सोमकला भालसरोजे शक्रकला ।
हार्दसरोजे सूर्यकला मूलसरोजे वह्निकला ॥ ८ ॥

स्थूलशरीरे कान्तिमती प्राणशरीरे शक्तिमती ।
स्वान्तशरीरे भोगवती बुद्धिशरीरे योगवती ॥ ९ ॥

सारसबन्धोरुज्ज्वलभा कैरवबन्धोः सुन्दरभा ।
वैद्युतवह्नेरद्भुतभा भौमकृशानोर्दीपकभा ॥ १० ॥

योधवराणामायुधभा योगिवराणामीक्षणभा ।
भूमिपतीनामासनभा प्रेमवतीनामाननभा ॥ ११ ॥

शस्त्रधराणां भीकरता शास्त्रधराणां बोधकता ।
यन्त्रधराणां चालकता मन्त्रधराणां साधकता ॥ १२ ॥

गानपटूनां रञ्जकता ध्यानपटूनां मापकता ।
नीतिपटूनां भेदकता धूर्तिपटूनां क्षेपकता ॥ १३ ॥

दीधितिधारा लोकयतां जीवितधारा वर्तयताम् ।
ज्ञापकधारा चिन्तयतां मादकधारा द्रावयताम् ॥ १४ ॥

मन्त्रपराणां वाक्यबलं योगपराणां प्राणबलम् ।
आत्मपराणां शान्तिबलं धर्मपराणां त्यागबलम् ॥ १५ ॥

सूरिवराणां वादबलं वीरवराणां बाहुबलम् ।
मर्त्यपतीनां सैन्यबलं रागवतीनां हासबलम् ॥ १६ ॥

वैदिकमन्त्रे भाववती तान्त्रिकमन्त्रे नादवती ।
शाबरमन्त्रे कल्पवती सन्ततमन्त्रे सारवती ॥ १७ ॥

ब्रह्मसुखाब्जे वाग्वनिता वक्षसि विष्णोः श्रीर्ललिता ।
शम्भुशरीरे भागमिता विश्वशरीरे व्योम्नि तता ॥ १८ ॥

भूग्रहगोलैः कन्दुकिनी विष्ठपधाने कौतुकिनी ।
यावदनन्तं वैभविनो प्राणिषु भूयस्सम्भविनी ॥ १९ ॥

कञ्जभवाण्डे मण्डलिनी प्राणिशरीरे कुण्डलिनी ।
पामरभावे सल्ललना पण्डितभावे मोदघना ॥ २० ॥

नार्यपि पुंसा मूलवती तन्व्यपि शक्त्या व्याप्तिमती ।
व्याप्तिमतीत्वे गुप्तिमती चित्रविचित्रा काऽपि सती ॥ २१ ॥

दीधितिरूपा चित्तमयी प्राणशरीराऽप्यद्वितयी ।
ब्रह्मशरीरं ब्रह्मविभा ब्रह्मविभूतिर्ब्रह्मपरम् ॥ २३ ॥

दुर्जनमूलोच्छेदकरी दीनजनार्तिध्वंसकरी ।
धीबललक्ष्मीनाशकृशं पुण्यकुलं नः पातु शिवा ॥ २४ ॥

चन्द्रकिरीटाम्भोजदृशः शान्तिसमृद्धं स्वान्तमिमे ।
सम्मदयन्तु श्रोत्रसुखाः सन्मणिबन्धाः सूरिपतेः ॥ २५ ॥

एकविंशः स्तवकः

इतः पीत्वा कूचं स्कन्दे प्रसारितकरे तत ।
जयति स्मितमुद्भूतं शिवयोरेकदेहयोः ॥ १ ॥

एकतो मणिमञ्जीरक्वाणाहूतसितच्छदम् ।
अन्यतो नूपुराहीन्द्रफूत्कारकृततन्द्रयम् ॥ २ ॥

गीर्वाणपृतनापालं बालं लालयदेकतः ।
उत्सङ्गे गणसम्राजमर्भकं बिभ्रदन्यतः ॥ ३ ॥

विडम्बितब्रह्मचारिकौकैकस्तनमेकतः ।
कवाटार्धनिभं बिभ्रद्वक्षः केवलमन्यतः ॥ ४ ॥

सेनान्याऽऽस्वादितस्तन्यमनुफूत्कुर्वतैकतः ।
फूत्कारमुखरं नागमुग्रं जाग्रतमन्यतः ॥ ५ ॥

एकतो दोर्लतां बिभ्रन्मृणालश्रीविडम्बिनीम् ।
शक्रशुण्डालशुण्डाभं चण्डं दोर्दण्डमन्यतः ॥ ६ ॥

कुत्राप्यविद्यमानेऽपि वन्दनीये तदा तदा ।
परस्परकरस्पर्शलोभतो विहिताञ्जलि ॥ ७ ॥

शक्रनीलसवर्णसत्वाद् भागयोरुभयोरपि ।
ऊर्ध्वाधराङ्गसापेक्षसन्धिज्ञानगलस्थलम् ॥ ८ ॥

एकतः कैरवश्रेणीनिद्रामोचनलोचनम् ।
अन्यतः कमलावासक्षणाधायकवीक्षणम् ॥ ९ ॥

एकतश्चञ्चुपा चारुतारेणाधीतविभ्रमम् ।
अन्यतः पाणिपाथोजे खेलतां मृगबालतः ॥ १० ॥

एकतो भालफलके काश्मीरेण विशेषितम् ।
अन्यतोऽर्धेक्षणेनैव रतिभ्रूविभ्रमद्रुहा ॥ ११ ॥

एकतः शीतलालोकं साधुलोकशिवशङ्करम् ।
अन्यतः प्रज्वलत्प्रेक्षं दुष्टगोष्ठीभयङ्करम् ॥ १२ ॥

एकतो मणिताटङ्कप्रभाद्योतकपोलजम् ।
अन्यतः कुण्डलीभूतकुण्डलीभूतकुण्डलि ॥ १३ ॥

एकतः कुन्तलान्बिभ्रदिन्द्रनीलोपमद्युतीन् ।
अन्यतः पावकज्वालापाटलांशुच्छटा जटाः ॥ १४ ॥

एकतः केशपाशेन कीर्णेनोरसि भासुरम् ।
अन्यतो लम्बमानस्य भोगिनो हरता श्रियम् ॥ १५ ॥

अवतंसितमम्लानपारिजातस्रजैकतः ।
विमलोल्लोलमालिन्या विबुधापगयाऽन्यतः ॥ १६ ॥

रौप्याचलकृतावासं प्राप्यं युक्तेन चेतसा ।
वस्तु रामापुमाकारं हृदि सन्निदधातु मे ॥ १७ ॥

कान्तार्धविग्रहे मातर्जटार्धाश्चिकुरास्तव ।
दधत्यदभ्रसन्ध्याभ्रयुक्तकालाभ्रविभ्रमम् ॥ १८ ॥

दम्पत्योर्युवयोरेष लोपो यन्नास्ति शैलजे ।
वामं पार्श्वं विभोः शेतुं दातुं ते दक्षिणः करः ॥ १९ ॥

लोके स्त्री स्तनयुग्मेन पुष्णात्येकं सुतं न वा ।
स्तनेनैकेन शर्वाणि पुष्णासि त्वं जगत्त्रयम् ॥ २० ॥

खिद्यन्ति योषितः कुक्षौ वहन्त्योऽर्भकमेककम् ।
अर्धकुक्षौ दधासि त्वं त्रिलोकीमम्ब लीलया ॥ २१ ॥

अनुरूपा शिवस्य त्वमनुरूपः शिवस्तव ।
अलङ्कारोऽनुरूपो वामकलङ्कोऽर्भकः शशी ॥ २२ ॥

तवैव तव देहांशो हरस्यैव हरस्य यः ।
प्राणास्तु जगतां धात्रि हरस्य त्वं हरस्तव ॥ २३ ॥

अविभक्तं भवानि स्वं भवस्य तव चोभयोः ।
सकृत्सकरुणं चेतः सङ्कल्पयतु नश्शिवम् ॥ २४ ॥

भवस्य भागमुत्सृज्य भवानी भागमात्मनः ।
भजत्वनुष्टुभामासां सृष्टानां नारसिंहिना ॥ २५ ॥

द्वाविंशः स्तवकः

अखिलस्य विकासकारणं व्यसनिज्ञानिजनावनेषु नः ।
वितनोतु विशेषतः शिवं शिवराजीवदृशो दरस्मितम् ॥ १ ॥

विकले सकले सुरव्रजे व्रजति श्यामलिमानमच्युते ।
जगतस्सदयो हलाहलं चुलुकीकृत्य भयं नुनोद यः ॥ २ ॥

निगमैस्तुरगी भुवा रथी विधिना सारथिमान् विभेद यः ।
कनकाद्रिवरेण कार्मुकी कमलाक्षेण शरी पुरत्रयम् ॥ ३ ॥

अजितस्य च गाढमत्सरैः कमलाकान्तपुरस्सरैस्सुरैः ।
पदजायुधधारया रयाद्वधमाधत्त जलन्धरस्य यः ॥ ४ ॥

कमलासनकञ्जलोचनौ ललिङ्गस्य शिरोऽङ्घ्रि वीक्षितुम् ।
बत हंसवराहभूमिकौ यतमानावपि यस्य न प्रभू ॥ ५ ॥

नयनं निटलान्तरस्थितं विवटय्येषदिवान्वितो रुषा ।
भुवनत्रयनिर्जयोद्यतं मदनं गाढमदं ददाह यः ॥ ६ ॥

सकले धवलः कलेबरे हरिनीलोपमकञ्चुलः क्वचित् ।
अमृतांशुरिवादधाति यः परमामक्षिमुदं प्रपश्यताम् ॥ ७ ॥

अवतंसतुषारदीधितिद्युतिभिर्यस्य यशोभरैरपि ।
सममच्छतरीकृतो दिशामवकाशस्सुतरां प्रकाशते ॥ ८ ॥

गगनानलजीवनानिलक्षितिसोमारुणसोमयाजिभिः ।
महतो बत यस्य मूर्तिभिर्भुवनं क्रान्तमिदं समन्ततः ॥ ९ ॥

सह तेन धनं राजते वसुधाधारिणि काऽपि राजते ।
वनिता भवतापनाशिनी चरणप्रेष्यनिवेदिताशिनी ॥ १० ॥

वनितापुरुषौ पुरातनौ विमले व्योमनि देवदम्पती ।
भुवनत्रितयस्य तौ विभू रजताद्राविह सिद्धदम्पती ॥ ११ ॥

गजचर्मधरः कपालभृद् गृहनाथो गृहिणी तु कालिका ।
रुधिराविलमुण्डमालिनी कथितौ तौ बत पण्डितैः शिवौ ॥ १२ ॥

स किमिन्दुकलाशिरोमणिः किमुताश्लीलकपालभूषणः ।
किमुमे भवती कपालिनी किमु विभ्राजितरत्नमालिनी ॥ १३ ॥

रमसेऽम्ब कपालमालिनी क्वचिदीशेन कपालमालिना ।
अतुलप्रभनिष्कमालिना क्वचिदत्युत्तमरत्नमालिनी ॥ १४ ॥

युवयोर्मरुतस्तनूभुवो बलवन्तो भुवनप्रकम्पनाः ।
शशिदीधितिहारि यद्यशो निगमे पावनमम्ब गीयते ॥ १५ ॥

गुरुमुत्तममभ्रचारिणामसमब्रह्मनिधाननायकम् ।
तव देवि शिवे तनूभुवां मरुतामन्यतमं प्रचक्षते ॥ १६ ॥

द्विरदं वदने महामदं सितदन्तच्छविधौतदिक्तटम् ।
इतरत्र मुखान्नराकृतिं विदुरस्यैव विवर्तमद्भुतम् ॥ १७ ॥

अखिलामरनिर्जयोन्नतः प्रथने तारकदानवो बली ।
हृतवीर्यमदो बभूव यद्वनशक्त्यायुधतेजसाऽञ्जसा ॥ १८ ॥

अमले हृदि निर्मलाशनाच्छिथिले ग्रन्थिचये नराय यः ।
परिपक्वधिये प्रदर्शयेत् तमसः पारमपारवैभवः ॥ १९ ॥

द्रविडेषु शिशुत्वमेत्य यो गिरिशश्लोकविशेषगायिनीम् ।
अमृतद्रवसारहारिणीं निगमाभां निबबन्ध संस्तुतिम् ॥ २० ॥

भुवि भट्टकुमारिलाख्यया भवमेत्याध्वररक्षणाय यः ।
वरजैमिनिभाषिताशयं बहुलाभिः खलु युक्तिभिर्दधौ ॥ २१ ॥

अधुना विधुनोति यस्तमो विबुधप्रेक्षितमार्गरोधकम् ।
रमणाख्यमहर्षिवेषभृच्छ्रितशोणाचलचारुकन्दरः ॥ २२ ॥

स गुहोऽतिमहो महामहाम्बिदशानां प्रथितश्चमूपतिः ।
जगतामधिराज्ञि कोऽपि ते सुतरां प्रीतिपदं कुमारकः ॥ २३ ॥

जयति त्रिपुरारिभागिनी गणपत्यादिमरुद्प्रसूरुमा ।
तमसूत सुरारिधूतये त्रिदशानामपि या चमूपतिम् ॥ २४ ॥

स्वकुटुम्बकथाभिधायिनीर्गणनाथस्य वियोगिनीरिमाः ।
अवधारयतु प्रसन्नया नभनाथप्रियनन्दिनी धिया ॥ २५ ॥

त्रयोविंशः स्तवकः

किरदिवामृतं किरणमालया ।
जयति तत्सितं शिववधूस्मितम् ॥ १ ॥

तव पदं परे मम गुहान्तरे ।
स्फुरतु सर्वदा विकसितं मुदा ॥ २ ॥

पदमघोऽम्बुजान्न किल भिद्यते ।
मदनविद्विषः सदनराज्ञि ते ॥ ३ ॥

विभुतयोररीकृतबहूद्भवौ ।
विदधतुर्जगत्त्रयमिदं शिवौ ॥ ४ ॥

तव तु खेलने नलिनजाण्डकम् ।
गिरिशवल्लभे भवति कन्दुकम् ॥ ५ ॥

सकलमस्त्युमे सदभयङ्करे ।
तव करे परे किमपि नो नरे ॥ ६ ॥

किमिव वर्ण्यतां कशशिकुण्डला ।
उडुमणिस्रजाप्रविलसद्गला ॥ ७ ॥

भण निरन्तरं बहुगुणामुमाम् ।
गतभयं विधेह्यमलवाणि माम् ॥ ८ ॥

अव जहीहि वा ननु भजाम्यहम् ।
भुवनभर्त्रि ते चरणमन्वहम् ॥ ९ ॥

गणपतेः शिरःकमलचुम्बिनी ।
भवतु गोपतिध्वजकुटुम्बिनी ॥ १० ॥

दहरमज्जनं विदधतं जनम् ।
परमदेवते नयसि धाम ते ॥ ११ ॥

जननि विज्ञता भवतु धीमताम् ।
अनुभवस्तु ते करुणया सताम् ॥ १२ ॥

अचलया धिया हृदि गवेषणम् ।
वृषहयप्रियानगरशोधनम् ॥ १३ ॥

न विजहामि ते चरणनीरजम् ।
अवनि धीमतामव न वा निजम् ॥ १४ ॥

पदमुमेऽम्ब ते हृदि विचिन्वते ।
पलितमस्तकाः परमदेवते ॥ १५ ॥

स्वयमनामये सकलधाऽसि ।
निजमहिम्नि सा त्वमयि तिष्ठसि ॥ १६ ॥

स्थितिमसाधयँस्तव पदाम्बुजे ।
विधिमधिक्षिपत्यलसधीरजे ॥ १७ ॥

स्यतु मदापदं शिववधूपदम् ।
यदृषयो विदुस्त्रिभुवनास्पदम् ॥ १८ ॥

गुणगणं गृणँस्तव शिवे शिवम् ।
गतभयोऽभवं मदमितो नवम् ॥ १९ ॥

तव कृपावशात् तदिदमव्यये ।
जननि नः प्लुतिस्तव यदङ्घ्रये ॥ २० ॥

नयनदृश्ययोरयि यदन्तरम् ।
तदमरस्तुते तव वपुः परम् ॥ २१ ॥

अहमिति स्मृतिः क्व नु विभासते ।
इति विचोदयन् महति लीयते ॥ २२ ॥

अमृतसंज्ञके सुखचिदात्मके ।
मतिमदर्थिते जननि धाम्नि ते ॥ २३ ॥

अयि मुदास्पदं स्पृशति ते पदम् ।
श्वसितयात्रया सततदृष्टया ॥ २४ ॥

दधतु सत्कवेर्गणपतेरिमाः ।
नगभुवो मुदं नरमनोरमाः ॥ २५ ॥

चतुर्विंशः स्तवकः

चन्द्रिकासितं चण्डिकास्मितम् ।
भूतले सतां भातु भूतये ॥ १ ॥

भालचक्षुषश्चक्षुषां धनम् ।
किञ्चिदस्तु मे शस्त्रवर्धनम् ॥ २ ॥

साधुसन्ततिक्षेमकारिणी ।
घोरदानवानीकदारिणी ॥ ३ ॥

योगयुक्तसच्चित्तचारिणी ।
पादसेवकप्राज्ञतारिणी ॥ ४ ॥

पुष्पबाणजिन्नेत्रहारिणी ।
पातु मां जगच्चक्रधारिणी ॥ ५ ॥

द्वादशान्तभूजातशारिका ।
सर्ववाङ्मयस्यैककारिका ॥ ६ ॥

पुण्यकर्मसु स्वच्छमस्तका ।
योगशालिषु च्छिन्नमस्तका ॥ ७ ॥

आत्मनि स्थितेः सम्प्रदायिका ।
सर्वजन्मिनां सम्प्रवर्तिका ॥ ८ ॥

मां पुनातु सत्पूज्यपादुका ।
भाललोचनप्राणनायिका ॥ ९ ॥

दानतो यशः पौरुषाद्रमा ।
सम्पदो मदः शीलतः क्षमा ॥ १० ॥

सत्यतो जगत्यत्र गौरवम् ।
यज्ञतो दिवि स्थानमुज्ज्वलम् ॥ ११ ॥

संयमादघव्रातवीतता ।
योगतो महासिद्धिशालिता ॥ १२ ॥

शर्वनारि ते पादसेवया ।
सर्वसत्फलावासिरग्रया ॥ १३ ॥

नोद्यमेन या सिद्धिरुत्तमा ।
विश्वनायिकावीक्षितेन सा ॥ १४ ॥

सम्पदां रमा भारती गिराम् ।
त्वं शिवे प्रभुः प्राणसंविदाम् ॥ १५ ॥

चक्षुषा नभोलक्ष्यधारिणा ।
सिद्ध्यतीव ते देवि धारणा ॥ १६ ॥

आशिरो दधन्नाभितोऽनिलम् ।
देवि विंदति त्वन्मुनिर्बलम् ॥ १७ ॥

हृद्गुहांतरे यद्विशोधनम् ।
तत्सवित्रि ते स्यादुपासनम् ॥ १८ ॥

काऽप्यहम्मतिर्गोचरं विना ।
लोकधात्रि ते रूपभावना ॥ १९ ॥

अस्यमण्डनं कोऽपि विद्यया ।
खण्डनं परः प्राह ना यया ॥ २० ॥
मातरेतया जीयते त्वया ।
एकया तनूभिन्नया धिया ॥ २१ ॥
बाह्यदर्शने विश्वपङ्किला ।
अन्यथा भवस्यम्ब केवला ॥ २२ ॥
खण्डवन्नृणां भासि भोगिनाम् ।
अस्यभिन्नचित् काऽपि योगिनाम् ॥२३॥
बन्ध एष यद्भासि खण्डिता ।
मोक्ष एष यद्भास्यखण्डिता ॥ २४ ॥
एतदीशितुः पत्नि हृन्मुदे ।
सौप्रतिष्ठसद्गीतमस्तु ते ॥ २५ ॥

पञ्चविंशः स्तवकः

कन्याकुमारी सुतरां वदान्या मान्या समस्तैः प्रकृतेरनन्या ।
आक्षेपकं सागरबुद्बुदानां हासं विधत्तां जगतः सुखाय ॥ १ ॥

रक्ष स्वचेतो मदमत्सरादेर्भिक्षस्व काले तनुरक्षणाय ।
वीक्षस्व रामेशवधूपदाब्जं मोक्षस्वलाभे यदि तेऽभिलाषः ॥ २ ॥

लोकस्व दूरीकृतभक्तशोकं हालास्यनाथेक्षणपुण्यपाकम् ।
भीतिः सखे चेद्भवतः पवित्रं ज्योतिर्विशेषं जलचारिनेत्रम् ॥ ३ ॥

यो लोकते तामखिलाण्डराज्ञीमज्ञानविध्वंसविधानविज्ञाम् ।
अम्बां परां जीवनलिङ्गशक्तिं भूयः स कायं न भवे लभेत ॥ ४ ॥

बिभ्रत्सहस्रं च मुखानि शक्तो वक्तुं गुणान् कः कमलालयस्य ।
जन्मापि यत्र प्रभवेज्जनानां मुक्त्यै मुनीनामपि दुर्लभायै ॥ ५ ॥

व्याघ्राङ्घ्रिवाताशनपूजितस्य नाट्यस्थलीनायिकया शिवस्य ।
नेत्राध्वभाजा शिवकामया वो मित्राणि कामाः फलिनो भवन्तु ॥ ६ ॥

आलोकतेऽपीतकुचामयि त्वामालोलचित्तामरुणाचले यः ।
निर्वेदवान् पर्वसुधांशुवक्त्रे सर्वे वशे तस्य भवन्ति कामाः ॥ ७ ॥

यः कुण्डलीपट्टणराजधानीमालोकते कामपि कृत्तमस्ताम् ।
निस्सारमानन्दकथाविहीनं संसारमेतं स जहाति बुद्ध्या ॥ ८ ॥

दृष्ट्वा वधूमादिपुरीश्वरस्य यो लोचनारोचकमाधुनोति ।
तस्यान्तरङ्गं धृतसर्वसङ्गं भूयोभवारोचकमावृणोति ॥ ९ ॥

काञ्ची रमण्याः कुरुतां गृहस्थे काणैर्मुदं कामपि किङ्किणीनाम् ।
काञ्ची भुवः पुण्यपुरी यतीन्द्र त्वामम्बिकानामरवैर्धिनोतु ॥ १० ॥

श्रीकालहस्तिस्थलदर्शनस्य कैलासवीक्षां पुनरुक्तिमाहुः ।
ज्ञानं प्रदातुं चरणाश्रितेभ्यो ज्ञानाम्बिका यत्र निबद्धदीक्षा ॥ ११ ॥

श्रीशैलशृङ्गस्य विलोकनेन सङ्गेन हीनो भविता मनुष्यः ।
धामास्ति यत्र भ्रमरालकायाः शान्तभ्रमं तद्भ्रमराम्बिकायाः ॥ १२ ॥

तीरे विपश्चिद्वर पश्चिमाब्धेर्गोकर्णगां लोकय भद्रकर्णीम् ।
बुद्धिं शिवां सर्वमनोरथानां सिद्धिं च यद्यस्ति मनोऽधिगन्तुम् ॥ १३ ॥

धाम्नि प्रसिद्धे करवीरनाम्नि पुण्याभिधानां कृतसन्निधानाम् ।
देवीं परां पश्यति यो विरक्तो मुक्तेः स पाणिग्रहणाय शक्तः ॥ १४ ॥

ज्ञाने दृढा ते यदि कापि काङ्क्षा नानेहसं मित्र मुधा क्षिपेमम् ।
सेवस्व देवीं तुलजापुरस्थां नैव स्वरूपादितरा किलेयम् ॥ १५ ॥

गोपालिनीवेषभृतं भजस्व लीलासखीं तां भुवनेश्वरस्य ।
इष्टं हृदिस्थं तव हस्तगं स्यात् कष्टं च संसारभवं न भूयः ॥ १६ ॥

आराध्यते वैतरणीतटस्था येनेयमम्बा विरजोऽभिधाना ।
आराधितं तेन समस्तमन्यत् सारो धरायामयमार्यगीतः ॥ १७ ॥

सङ्गीयमानं स्थलमार्यवृन्दैर्वृन्दारकाणां सरितस्तटेऽस्ति ।
यः कालिकां पश्यति कालकेशीं तत्रास्य कालादपि नैव भीतिः ॥ १८ ॥

नीलाचलं सिद्धसमूहसेव्यं लीलानिकेतं प्रवदन्ति यस्याः ।
भद्रा परा काचन गुह्यमुद्रा कामेश्वरी सा भुवनस्य मूलम् ॥ १९ ॥

माङ्गल्यगौरीपददर्शनस्य कर्ता तु भूत्वा सुकृतस्य भर्ता ।
आचारपूतैरधिगम्यमग्र्यं स्थानं प्रपद्येत यतो न पातः ॥ २० ॥

वाराणसी शुभ्रगिरेरनूनं क्षेत्रं पवित्रं भुवनत्रयेऽपि ।
अर्थे प्रजानां विधृतान्नपात्रा गौरी स्वयं यत्र विशालनेत्रा ॥ २१ ॥

वृन्दारकाराधितपादपद्मां नन्दामिमामिन्दुसमानवक्त्राम् ।
आलोक्य विन्ध्याचलवासिनीं ना नालोचयेत्संसृतितो भयानि ॥ २२ ॥

आनन्ददेहामिह मुक्तिसंज्ञां नारीं परीरब्धुमना मनुष्यः ।
दूतीं हृणोतु प्रमथेश्वरस्य कान्तामवन्तीपुरनायिकां ताम् ॥ २३ ॥

यत्राचलच्छिद्रकृता सहाहं भ्रात्रा मुहुः लेखितवान्वनेषु ।
तं सिद्धदेवर्षिनुतं स्मरामि कैलासमावासगिरिं जनन्याः ॥ २४ ॥

पूर्णाम्बरे शीतकरेऽधिकारं बिभ्रत्यगेन्द्रे धवले सलीला ।
क्षेत्रेषु काश्यादिषु गुप्तशक्तिर्गौरीन्द्रवक्त्रासु च सन्निधत्ताम् ॥ २५ ॥

षड्विंशः स्तवकः

आगमविन्मतिकैरविणीनां बोधमजस्रमसौ विदधानः ।
पातु महेशवधूवदनांशो हासशशी सकलानि कुलानि ॥ १ ॥

आयतलोचनचुम्बितकर्णा दानयशोजिततोयदकर्णा ।
शोणनगेशमनःप्रियवर्णा नाशयताज्जगदार्तिमपर्णा ॥ २ ॥

वेदतुरङ्गविलोचनभार्यं वेदशिरोनिचयैरपि मृग्यम् ।
शोकविदारिसुधाकिरणास्यं शोणगिरौ समलोकि रहस्यम् ॥ ३ ॥

मुञ्च समस्तमनोरथलाभे संशयमद्य करामलकाभे ।
दक्षपथमाप नगेन्द्रतनूजा सोऽहमितः परमन्तरराजा ॥ ४ ॥

शिल्पविदः प्रतिमां प्रविशन्ती स्वल्पविदां तरणाय चकास्ति ।
शोणधराभृति सम्प्रति लब्धा हन्त चिरादियमेव ममाम्बा ॥ ५ ॥

भारतभूवलयेऽत्र विशाले सन्त्वनघानि बहूनि गृहाणि ।
आस्यविगीतसुधाकरबिम्बा शोणगिरौ रमतेऽत्र मदम्बा ॥ ६ ॥

वारितसंश्रितपातकजाला वारिधिवीचिनिरङ्कुशलीला ।
वारिजपत्रविडम्बननेत्रा वारणराजमुखेन सुपुत्रा ॥ ७ ॥

आयतवक्रघनासितकेशी तोयजबाणरिपोर्हृदयेशी ।
काशसुमाच्छयशाः परमैषा पाशभिदस्तु तवेन्दुविभूषा ॥ ८ ॥

पङ्कजसम्भवपूजितपादा पङ्कविनाशनपावननामा ।
किङ्करकल्पलता परमेयं शङ्करनेत्रसुधा शरणं नः ॥ ९ ॥

चञ्चलदृग्विनतामरवल्ली पञ्चपृषत्कशरासनझिल्ली ।
काञ्चनगर्भमुखप्रणुतेयं पञ्चमुखप्रमदा शरणं नः ॥ १० ॥

अम्ब विधूय भटान्मदनादीन् नूपुरनादविभीषिकयैषः ।
हन्त जहार बलेन मनो मे शोणनगाङ्घ्रिनिवासिनि तेऽङ्घ्रिः ॥ ११ ॥

कर्णपुटे कुरु मुग्ध ममोक्तिं मुञ्च धनादिषु मानसशक्तिम् ।
शोणगिरीन्द्रवधूपदभक्तिं शीलय शीलय यास्यसि मुक्तिम् ॥ १२ ॥

जीर्णतरे जरयाऽखिलदेहे बुद्धिबलं च विलुम्पति माहे ।
हन्त सविघ्नि तपन्मतिरन्ते सेवितुमिच्छति ना चरणं ते ॥ १३ ॥

तन्त्रविदो नवयोनि तु चक्रं शोणधराधररूपमुशन्ति ।
अर्धममुष्य वपुर्मदनारेरर्धमगेन्द्रसुते तव गात्रम् ॥ १४ ॥

अस्तु नगेश्वरनन्दिनि लिङ्गं तेजसमेतदिहापि तवांशः ।
वीतगुणस्य विना तव योगं देवि शिवस्य कुतः खलु तेजः ॥ १५ ॥

स्थापितमूर्तिरियं तव नम्या पूजयितुं जगदीश्वरि रम्या ।
शोणनगार्धमिदं तव रूपं कीर्तयितुं नगजे धुतपापम् ॥ १६ ॥

शोणनगार्धतनोऽदिशमङ्के धारयसेऽयि गुहं रमणाख्यम् ।
आगतमप्यथि हा मुहुरम्बोच्चाटयसे गणपं ननु कस्मात् ॥ १७ ॥

अङ्कजुषे रमणाय नु दातुं मानववेषधराय गुहाय ।
शोणनगार्धतनो बहु दुग्धं मातरपीतकुचेह विभासि ॥ १८ ॥

पूर्णसमाधिवशात् स्वपिषि त्वं पीतमपीतकुचेऽम्ब न वेत्सि ।
अङ्कजुषा रमणेन सुतेन प्रेक्ष्य यथेष्टमुरोरुहदुग्धम् ॥ १९ ॥

ज्ञानरसाङ्क्षयम्ब निपीय स्तन्यमसौ रमणो मुनिराट् ते ।
ज्ञानमयोऽभवदीश्वरि सर्वः पुष्यति येन तनुं हि तदात्मः ॥ २० ॥

प्रीतिपदाय पयोधरकुम्भात् पार्वति धीमयदुग्धमपीतात् ।
अस्तु गुहाय शिवे बहु दत्तं किञ्चिदिवेश्वरि धारय मह्यम् ॥ २१ ॥

प्रौढमिमं यदि वेत्सि तनूजं शैलसुते मदवारि दधानम् ।
मास्तुपयो वितरानघमङ्गं येन दधानि महेश्वरि शक्तिम् ॥ २२ ॥

स्वार्जितमेव मया यदि भोज्यं सम्मद एव ममाखिलमातः ।
आशिषमद्यतमामयि दत्त्वा प्रेषय यानि जयानि धरित्रीम् ॥ २३ ॥

विद्युति विद्युति वीक्ष्यविलासा वीक्षितकर्मणि लक्ष्यरहस्या ।
पार्वणचन्द्रमुखी ललिताङ्गी तैजसलिङ्गसखी शरणं नः ॥ २४ ॥

मातरपीतकुचेऽरुणशैलाधीश्वरभामिनि भामहनिये ।
साधु विधाय समर्पयते ते दोधकमाल्यमिदं गणनाथः ॥ २५ ॥

सप्तविंशः स्तवकः

विधुन्वन्ध्वान्तानि प्रतिदिशमधर्मं परिहरँ-
श्चिरंयं ख्यातन्वानस्सपदि शमयन् दुःखपटलम् ।
सहस्राराम्भोजे द्रवमसदृशं मे प्रजनयन्
प्रचण्डायाश्चण्ड्यास्सितहसितलेशो विजयते ॥ १ ॥

अरीणां शीर्षेषु ज्वलितदवकीलीन्द्रसदृशं
विनम्राणां शीर्षेष्वमृतकरबिम्बेन तुलितम् ।
विरोधिध्वान्तानां तरुणतरणिप्राभवहरं
प्रचण्डायाश्चण्ड्याश्चरणमसतां हन्तु विभवम् ॥ २ ॥

भजे भासां शालां निखिलधिषणानां जनिभुवं
बलानामाधात्रीं निखिलभुवनेन्द्रस्य दयिताम् ।
भजन्ते यां गीतैर्मधुसमयमाद्यत्पिकवधू-
कलालापा हृद्यैर्हयवदनपङ्केरुहदृशः ॥ ३ ॥

ज्वलन्ती तेजोभिर्महिषमथने या तव तनु-
र्लसन्ती लावण्यैर्गिरिशरमणे या तव तनुः ।
विना क्रोधप्रीती न किमपि तयोर्भेदकमभूत्
तयोराद्या दुर्गा भवति ललिताऽन्या मुनिनुते ॥ ४ ॥

सहस्रं भानूनां भवति दिवसानामधिपतेः
सहस्रं शीर्षाणां भवति भुजगानामधिपतेः ।
सहस्रं नेत्राणां भवति विबुधानामधिपतेः
सहस्रं बाहूनां भवति समये हैमवति ते ॥ ५ ॥

प्रसन्नो वक्त्रेन्दुर्न च नयनयोः कोऽप्यरुणिमा
न कम्पो बिम्बोष्ठे स्मितमपि लसत्काशविशदम् ।
सरोजाभः पाणिः किणविरहितः कोमलतमो
ज्वलच्छूलं त्वासीज्जननि तव शुम्भाय भयदम् ॥ ६ ॥

वधे शुम्भस्यासीत्तव जननि या काचन तनु-
र्दधानाऽग्र्याः शक्तीः शशिकिरणसारोपमरुचिः ।
इमां ध्यायं ध्यायं स्मरहरसखि व्याकुलमिदं
मनो मे विश्रान्तिं भजति भजतां कल्पलतिके ॥ ७ ॥

यदि त्वं संहारे पटुरसि सवित्रि त्रिजगत-
स्तदेतत्त्वां याचे सरसिरुहगर्भादिविनुते ।
इमे मे पाप्मानो भगवति नदन्तो बहुविधा-
स्तदेषु प्रख्यातं प्रतिभयतमं दर्शय बलम् ॥ ८ ॥

विभेदोरः क्रोधात्कनककशिपोरद्भिततनया-
कुचग्रावोल्लीढैरतिशितशिखैर्यैः किल नखैः ।
त्वया दत्ता शक्तिर्नरहरिशरीराय जगतां
विनेत्रे पुंसेऽस्मै जननि रणरङ्गस्थलरमे ॥ ९ ॥

अजेयस्त्रैलोक्यप्रकटितपताकः पलभुजां
बिडौजा यत्कारागृहपरिचयी षड्क्तिवदनः ।
सहस्रारं साक्षाद्धृतनरशरीरं तमजयत्
तवैवावेशेन प्रियपरशुरम्ब द्विजशिशुः ॥ १० ॥

त्वदीया सा शक्तिस्सकलजगदन्तेऽप्यनलसा
पुरा कार्यस्यान्ते तनयमयि हित्वा नृपरिपुम् ।
अविक्षत्काकुत्स्थं दशमुखकुलोन्माथविषये
सहस्रांशुं हित्वा शशिनमिव धत्ते गलति भा ॥ ११ ॥

हृते लोकघ्राते भगवति भवत्यैव स पुरा-
मरिः कीर्तिं लब्धुं चतुरमतिरायाति समये ।
त्वया लोकत्राणे जननि रचिते राक्षसवधाद्
यशोऽवाप्तुं विष्णुर्मिलति च कुतोऽप्येष निपुणः ॥ १२ ॥

स्वरूपं ते वज्रं वियति रजसां सूक्ष्ममहसा-
मुपाधिस्ते स्तोमो भवति चपला काऽपि तनुभा ।
अरुद्धा ते व्याप्तिर्बलमखिलदत्तं बलनिधेः
सहस्रांशः स्वस्य प्रभवसि समस्तस्य च शिवे ॥ १३ ॥

यतः कालव्याजात्पचसि भुवनं वैद्युतमहः-
प्रभावात्कालीं त्वामयि विदुरतः पण्डितवराः ।
प्रभोः शस्त्रं भूत्वा दहसि यदरीन्वज्रवपुषा
प्रचण्डां चण्डीं तद्भगवति भणन्त्यक्षयबले ॥ १४ ॥

अयि त्वामेवेन्द्रं कथयति मुनिः कश्चिदजरे
त्वया शस्त्राढ्यं तं भणति तु परस्तत्त्वविदृषिः ।
युवां माता-पुत्रौ भगवति विभाज्यौ न भवत-
स्ततो धीनां द्वेधा विबुधजनगोष्ठीषु गतयः ॥ १५ ॥

विकुर्वाणा विश्वं विविधगुणभेदैः परिणमद्
विधुन्वाना भावान् भुवनगतिरोधाय भवतः ।
वितन्वाना शर्वं चलवदचलं काचिदवितुं
विचिन्वाना जन्तोः कृतलवमपीशा विजयते ॥ १६ ॥

प्रभा भानोर्यद्वन्नवसि सकलस्यापि तपनी
प्रचण्डा शक्तिः सत्यखिलभुवनेशस्य तपतः ।
सुधांशोर्ज्योत्स्नेव प्रमदयसि चेतः प्रविशतो
भवन्ती भूतादेर्दहरकुहरं मोदलहरी ॥ १७ ॥

प्रचण्डा गौरी वा त्वमसि वसुरुद्रार्कविनुते
स भीमः शम्भुर्वा विभुरभयदः पादसुहृदाम् ।
तयोरेकं रूपं तव सहविभोः खेलति मह-
त्यमुष्मिन्नाकाशे धवलमहसि क्रीडति परम् ॥ १८ ॥

विभक्ता या द्वेधा त्वमसि गगने शीतमहस-
स्तथा रम्ये बिम्बे ज्वलितललितस्त्रीतनुविधा ।

तयोर्व्यूहीशाने जननि कतमा मे जननभूः
पुराजन्मन्यासीद्विकटमथवोग्रैव सुषुवे ॥ १९ ॥

दृशोर्भेदाद् दृष्टेर्न भवति भिदा काऽपि करयो-
र्न भेदाद्भिन्नं स्यात्कृतमभिविमानैक्यवशतः ।
भिदा तन्वोरेवं न भवति भिदायै तव शिवे
वियद्देशे चण्ड्यां सितमहसि गौर्यां च भवति ॥ २० ॥

तव च्छिन्नं शीर्षं विदुरखिलधाऱ्यागमविदो
मनुष्याणां मस्ते बहुलतपसा यद्विदलिते ।
सुषुम्नायां नाड्यां तनुकरणसम्पर्करहिता
बहिश्शक्त्या युक्ता विगतचिरनिद्रा विलससि ॥ २१ ॥

उताहो तन्वङ्ग्यां भृगुकुलविधाऱ्यां पितृगिरा
तनूजेनच्छिन्ने शिरसि भयलोलाक्षि नलिने ।
न्यधास्तेजो भीमं निजमयि यदज्ञुद्रमनघं
तदाहुस्त्वामम्ब प्रथितचरिते कृत्तशिरसम् ॥ २२ ॥

हुतं धाराज्वालाजटिलचटुले शस्त्रदहने
तपस्विन्याः कायं भगवति यदाऽम्ब त्वमविशः ।
तदा तस्याः कण्ठप्रगलदसृजः कृत्तशिरसः
कबन्धेन प्राप्तो भुवनविनुतः कोऽपि महिमा ॥ २३ ॥

निधेस्त्वत्तो हृत्वा भगवति न लज्जे भुवि सृजन्
रसक्षोणीर्वाणीस्त्वदमलयशस्सौरभजुषः ।
नृपोद्यानात्सूनोत्करमपहरन् भक्तिनटनं
वितन्वानस्तस्मै मुहुरुपहरत्सेवक इव ॥ २४ ॥

दधानास्सन्तोषं मनसि सुकवीनामतितरां
ददानाः प्रत्यग्रं विबुधसदसे भावमलघुम् ।
कुलानामुत्साहं सपदि विदधानाश्शिववधू-
पराणां शोभन्तां जगति शिखरिण्यो गणपतेः ॥ २५ ॥

अष्टाविंशः स्तवकः

अन्तर्वलक्षपरिधिभ्रममादधानो
वक्त्रस्य पूर्णतुहिनद्युतिमण्डलस्य ।
हासः करोतु भवतां परमं प्रमोदं
शुद्धान्तपङ्कजदृशः प्रमथेश्वरस्य ॥ १ ॥

सम्मोहनानि तुहिनांशुकलाधरस्य
सञ्जीवनानि सरसीरुहसायकस्य ।
सन्दीपनानि विनतेषु जनेषु शक्तेः
संहर्षणानि मम सन्तु शिवास्मितानि ॥ २ ॥

पापानि मे हरतु काचन कृत्तशीर्षा
माता पदाम्बुजभुजिष्यवितीर्णहर्षा ।
या भक्तलोकवरदानविधौ विनिद्रा
वासं कमण्डलुधुनीपुलिने करोति ॥ ३ ॥

षष्ठावतारजननावनिरेकवीरा
भीमाधुनोतु दुरितानि गणाधिपस्य ।
या भक्तरक्षणविधावतिजागरूका
पुण्ये कमण्डलुधुनीपुलिने चकास्ति ॥ ४ ॥

छेदाय चेद् गतरजा मुनिरादिदेश
चिच्छेद चेद्बहुगुणस्तनयः सवित्रीम् ।
दाह्यं शरीरमखिलप्रभुरीशशक्तिः
यद्याविवेश च कथा परमाद्भुतेयम् ॥ ५ ॥

पुत्रः प्रियस्तव शिरः सहसा चकर्त
कृत्ता च हर्षभरिता भवती ननर्त ।
नो तस्य पापमपि नो तव काऽपि हानिः
नाशोऽस्य हा भुजभुवामभवद्विपाकः ॥ ६ ॥

अम्बैव सा सुरभिरर्जुनभूपतिर्यां
वीर्याज्जहार स च भार्गव आजहार ।
तस्या हृतेः परगृहस्थितिरेव हेतुः
गन्धर्वदर्शनकथा रिपुकल्पितैव ॥ ७ ॥

छिन्नानि नो कति शरीरभृतां शिरांसि
तत्पूज्यते जगति रेणुकमेव शीर्षम् ।
कृत्ताः कलेवरवतां कति नाभयो न
चेतो धिनोति सुरभिर्मृगनाभिरेकः ॥ ८ ॥

प्राणा वसन्ति शिरसा रहिते शरीरे
लीलासरोजति शिरस्तु करेऽस्य कृत्तम् ।
तन्निघ्नमेतदखिलं च धियैव धीराः
पश्यन्तु नन्दनगरे तदिदं विचित्रम् ॥ ९ ॥

प्राणेश्वरी विधिपुरे लसतः पुरारे-
रङ्गीकरोतु शरणागतिमम्बिका मे ।
लब्धं निपीय यदुरोरुहकुम्भदुग्धं
सम्बन्धमूर्तिरभवत्कविचक्रवर्ती ॥ १० ॥

अप्राप्य लोकरचनावनपातनेषु
यस्यास्त्रयोऽपि पुरुषाः करुणाकटाक्षम् ।
नैवेशते किमपि सा जगदेकमाता
भद्रा परा प्रकृतिरस्त्ववनाशिनी नः ॥ ११ ॥

राका प्रबोधशशिनो हृदयोदयस्य
नौका विपज्जलनिधौ पततां जनानाम् ।
वेदध्वजस्य ललिता त्रिरुचिः पताका
काचिन्ममास्तु शरणं शिवमूलटीका ॥ १२ ॥

मौलौ महेन्द्रसुदृशस्सुमनोनिकाय-
संशोभिते सदसि मान्य इवाभिजातः ।
रेणुश्च मच्चरणभूर्लभतेऽग्रपीठं
त्राणाय सा भवतु भूतपतेर्वधूर्नः ॥ १३ ॥

अम्बावृणोति परितोऽप्ययमन्धकारो
नात्मानमेव मम किं तु कुलं च देशम् ।
शीघ्रं मदीयहृदयोदयपर्वताग्रे
श्रीमानुदेतु तव पादमयूखमाली ॥ १४ ॥

कष्टं धुनोतु मम पर्वतपुत्रिकायाः
प्रत्यग्रपङ्कजरुहबन्धवकान्तिकान्तम् ।

अम्भोरुहासनमुखामरमौलिरत्न-
ज्योतिर्विशेषितगुणं चरणारविन्दम् ॥ १५ ॥

ज्याशिञ्जितानि समरे गिरिशं जिगीषोः
कामस्य हंसनिवहस्य निमन्त्रणानि ।
धुन्वन्तु मे विपदमद्रिकुमारिकायाः
पादरविन्दकटकक्वणितानि तानि ॥ १६ ॥

यः सर्वलोकमथनं महिषं जिगाय
यस्यैव कर्म दमनं च तदन्तकस्य ।
नारीनराकृतिभृतो महसस्तमङ्घ्रिं
मञ्जीरनादमधुरं शरणं व्रजामि ॥ १७ ॥

आपन्महोग्रविषराशिनिमग्नमेतं
दीनं त्वदीयचरणं शरणं प्रपन्नम् ।
उद्धर्तुमम्ब करुणापरिपूर्णचित्ते
वित्तेशमित्रकुलनारि तवैव भारः ॥ १८ ॥

लोकाधिराज्ञि पतितं विपदन्धकूपे
संरुद्धवृष्टिमभितस्तिमिरच्छटाभिः ।
मातः समुद्धर कृपाकलिते मृडानि
पुत्रं करेण जगतामभयङ्करेण ॥ १९ ॥

अस्यं त्वदीयपदपङ्कजकिङ्करस्य
दुर्भाग्यपाकविफलीकृतपौरुषस्य ।
प्राणेश्वरि प्रमथलोकपतेरुपायं
वीक्षस्व तारणविधौ निपुणे त्वमेव ॥ २० ॥

मृत्युञ्जयोरुमणिपीठतटे निषण्णे
ताटङ्ककान्तिबहुलीकृतगण्डशोभे ।
माणिक्यकङ्कणलसत्करवारिजाते
जाते कुलाचलपतेर्जहि पातकं नः ॥ २१ ॥

किं ते वपुर्जननि तप्तसुवर्णगौरं
कामारिमोहिनि किमिन्दुकलावलक्ष्म् ।
पाकारिनीलमणिमेचककान्त्युताहो
बन्धूकपुष्पकलिकारुचि वा स्मरामि ॥ २२ ॥

त्वं सुन्दरी नृपतिजातिजितस्त्वमम्बा
धूमावती त्वमजरे भुवनेश्वरी त्वम् ।
काली त्वमीश्वरि शुकार्भकधारिणी त्वं
तारा त्वमाश्रितविपद्दलनासिधारा ॥ २३ ॥

त्वं भैरवी भगवती बगलामुखी त्वं
रामा च स कमलकाननचारिणी त्वम् ।
कैलासवासिनयनामृतभानुरेखे
को वेद ते जननि जन्मवतां विभूतीः ॥ २४ ॥

धुन्वन्तु सर्वविपदः सुकृतप्रियाणां
धुन्वन्तु चाखिलसुखान्यघलालसानाम् ।
आवर्ज्य भूरिकरुणं पुरजित्तरुण्या-
श्चित्तं वसन्ततिलकाः कविभर्तुरेताः ॥ २५ ॥

एकोनत्रिंशः स्तवकः

आयुष्या भुवनानां चक्षुष्यास्त्रिपुरारेः ।
कुर्वन्तु प्रमदं नः पार्वत्याः स्मितलेशाः ॥ १ ॥

नात्यर्घाणि निरर्थं नेतव्यानि दिनानि ।
अम्बायाश्चरितानि श्रोतव्यान्यनघानि ॥ २ ॥

उद्योगं कुरु जिह्वे संहर्तुं दुरितानि ।
पूतान्यद्रिसुतायाः कीर्त्यन्तां चरितानि ॥ ३ ॥

श्रीसक्तिर्विनिवार्या चिन्ता काऽपि न कार्या ।
नित्यं चेतसि धार्या दीनानां गतिरार्या ॥ ४ ॥

ज्ञातुं या गदितुं या श्रोतुं या श्वसितुं या ।
द्रष्टुं याऽन्तरशक्तिस्तिष्ठात्र स्मृतिरेषा ॥ ५ ॥

विभ्राजीनशताभं बिभ्राणं शिरसीन्दुम् ।
स्मर्तव्यं जनदम्बारूपं वा धुतपापम् ॥ ६ ॥

येषां स्यात्परितप्तं प्रायश्चित्तमघेन ।
रुद्राणीपदसेवा प्रायश्चित्तममीषाम् ॥ ७ ॥

तद्दीप्तं पदयुग्मं सेवे यत्र भवन्ति ।
अङ्गुल्यो दश भानोर्भानूनां शतकानि ॥ ८ ॥

नो चेत्कुप्यसि किञ्चिद् याचे वाचमतीते ।
सेवां मातरुरीकुर्विष्टं मे कुरु मा वा ॥ ९ ॥

शर्वाणीचरणार्चापीठं पीवरकाणाम् ।
वध्यस्थानमिदं स्यादुग्राणां दुरितानाम् ॥ १० ॥

स्कन्दाम्बापदपीठस्पृष्टं चेद्वलमाप्तम् ।
एकैकं सुममंहस्त्वेकैकं कुलिशं स्यात् ॥ ११ ॥

अम्भोजोपममङ्घ्रिं शम्भोः पट्टमहिष्याः ।
अंहस्संहतिमुग्रां संहर्तुं प्रणमामः ॥ १२ ॥

ये कालीपदवेषं नालीकं प्रणमन्ति ।
नैषां किञ्चिदशक्यं नालीकं मम वाक्यम् ॥ १३ ॥

वासस्तेऽत्र समाप्तः पङ्केतो व्रज दूरम् ।
कालीं शङ्करनारीं कालेऽस्मिन् प्रणमामः ॥ १४ ॥

आशा रे तदवस्था भूभागनटतस्ते ।
कामानां क्व नु पारः कामारेर्नम नारीम् ॥ १५ ॥

धन्यास्ते तुहिनाद्रेः कन्यां ये प्रणमन्ति ।
अन्यानुन्नतशीर्षान्मन्ये वन्यलुलायान् ॥ १६ ॥

पादाम्भोजमुमायाः प्राज्ञास्संप्रणमन्तः ।
गृह्णन्ति श्रियमस्मिन् राजन्तीं निजशक्त्या ॥ १७ ॥

मन्दाराद्रिसुताङ्घ्री दातारौ सदृशौ स्तः ।
उत्कण्ठैः फलमाद्यादन्यस्मान्नतकण्ठैः ॥ १८ ॥

कालस्यापि विजेतुः शर्वण्याश्चरणस्य ।
एषोऽहं कविलोकक्ष्मापालोऽस्मि भुजिष्यः ॥ १९ ॥

रक्ते दर्शय रागं रुद्राणीपदपद्मे ।
चेतः पुष्यति शोभां सारस्सारवतोऽग्रे ॥ २० ॥

संशोध्यागमजालं सारांशं प्रवदामः ।
स्कन्दाम्बापदभक्तिर्भुक्त्यै चाथ विमुक्त्यै ॥ २१ ॥

वात्सल्यं गतिहीनेष्वावुष्यं सुकृतस्य ।
भूयोभिः सह सख्यं श्रीहेतुष्विह मुख्यम् ॥ २२ ॥

श्लाघ्यं पुष्यति कामं प्रेमा स्वप्रमदायाम् ।
शर्वाणीपदभक्तिर्नित्याय प्रमदाय ॥ २३ ॥

एकैवं बहुभेदा भिन्नत्वाद्विषयाणाम् ।
रत्याख्या द्युतिरन्तः सा सूते फलभेदान् ॥ २४ ॥

हर्षं कञ्चन मातुर्मत्तो भक्तिभरेण ।
तन्वन्नेष विधत्तां हेरम्बो मदलेखाः ॥ २५ ॥

त्रिंशः स्तबकः

कृतेन सा निसर्गतो घृतेन नित्यमानने ।
सितेन शीतशैलजा स्मितेन शं तनोतु मे ॥ १ ॥

प्रतिक्षणं विनश्वरानये विसृज्य गोचरान् ।
समर्चयेश्वरीं मनो विविच्य विश्वशायिनीम् ॥ २ ॥

विशुद्धदर्पणेन वा विधारिते हृदाऽम्ब मे ।
अयि प्रयच्छ सन्निधिं निजे वपुष्यगात्मजे ॥ ३ ॥

पुरस्य मध्यमाश्रितं सितं यदस्ति पङ्कजम् ।
अजाण्डमूल्यमस्तु ते सुरार्चिते तदासनम् ॥ ४ ॥

अखण्डधारया द्रवन्नवेन्दुशेखरप्रिये ।
मदीयभक्तिजीवनं दधातु तेऽम्ब पाद्यताम् ॥ ५ ॥

विवासनौघमानसप्रसादतोयमम्ब मे ।
समस्तराज्ञि हस्तयोरनर्घमर्घ्यमस्तु ते ॥ ६ ॥

महेन्द्रयोनिचिन्तनाद् भवन्भवस्य वल्लभे ।
महारसो रसस्त्वया निपीयतां विशुद्धये ॥ ७ ॥

सहस्रपत्रपङ्कजद्रवत्सुधाजलेन सा ।
सहस्रपत्रलोचना पिनाकिनोऽभिषिच्यते ॥ ८ ॥

ममार्जितं यदिन्द्रियैः सुखं सुगात्रि पञ्चभिः ।
तदम्ब तुभ्यमर्पितं सुधाख्यपञ्चकायताम् ॥ ९ ॥

वसिष्ठगोत्रजन्मना द्विजेन निर्मितं शिवे ।
इदं शरीरमेव मे तवास्तु दिव्यमंशुकम् ॥ १० ॥

विचित्रसूक्ष्मतन्तुभून्ममेयमात्मनाडिका ।
सुखप्रबोधविग्रहे मखोपवीतमस्तु ते ॥ ११ ॥

महद्विचिन्वतो मम स्वकीयतत्त्वविच्चिजम् ।
इदं तु चित्तसौरभं शिवे तवास्तु चन्दनम् ॥ १२ ॥

महेशनारिनिःइवसँस्तथाऽयमुच्छ्वसँत्सदा ।
तवानिशं समर्चको ममास्तु जीवमारुतः ॥ १३ ॥

विपाककालपावकप्रदीप्तपुण्यगुग्गुलुः ।
सुवासनाख्यधूपभृद् भवत्वयं ममाम्ब ते ॥ १४ ॥

गुहावतारमौनिना मयीश्वरि प्रदीपिता ।
इयं प्रबोधदीपिका प्रमोददायिकाऽस्तु ते ॥ १५ ॥

इमामयि प्रियाप्रियां महारसामहङ्कृतिम् ।
निवेदयामि भूज्यतामियं त्वया निरामये ॥ १६ ॥

सरस्वती सुधायते मनो दधाति पूगताम् ।
हृदेव पत्रमम्बिके त्रयं समेत्य तेऽर्प्यते ॥ १७ ॥

विनीलतोयदान्तरे विराजमानविग्रहा ।
निजा विभूतिरस्तु ते तटिल्लता प्रकाशिका ॥ १८ ॥

स्वरोऽयमन्तरम्बिके द्विरेफवत्स्वरँत्सदा ।
ममाभिमन्त्र्य धीसुमं ददाति देवि तेऽङ्घ्रये ॥ १९ ॥

तवार्चनं निरन्तरं यतो विधातुमस्म्यहम् ।
न विश्वनाथपत्नि ते विसर्जनं विधीयते ॥ २० ॥

वियोग इन्दुधारिणा न चेह विश्वनायिके ।
मदम्ब सोऽत्र राजते तटिल्लताशिखान्तरे ॥ २१ ॥

इदं शरीरमेककं विभाज्य नव्यमन्दिरम् ।
विहारमत्र सेश्वरा भवानि कर्तुमर्हसि ॥ २२ ॥

जडेष्विवालसेष्विव प्रयोजनं न निद्रया ।
विहर्तुमेव याच्यसे हृदीशपद्मराज्ञि मे ॥ २३ ॥

अयं तवाग्रिमः सुतः श्रितो मनुष्यविग्रहम् ।
तनूजवेश्मसौष्ठवं मृडानि पश्य कीदृशम् ॥ २४ ॥

गणेशितुर्महाकवेरसौ प्रमाणिकावली ।
मनोम्बुजे महेश्वरीप्रपूजनेषु शब्द्यताम् ॥ २५ ॥

एकत्रिंशः स्तवकः

दरस्मितश्रीकपटा सुपर्णस्रोतस्विनी पर्वतजास्यजाता ।
पङ्कं मम क्षालयतादशेषं संसारमग्ने हृदये विलग्नम् ॥ १ ॥

हराट्टहासेन समं मिलित्वा पित्रेव पुत्रो गुरुणेव शिष्यः ।
विभ्राजमानो मम शं करोतु हासाङ्कुरः केसरिवाहनायाः ॥ २ ॥

नमश्शिवायै भणत द्विपादो युष्माकमग्र्यां धिषणां दधत्यै ।
आधारचक्रेशितुरम्बिकायै ब्रह्माण्डचक्रस्य विधायिकायै ॥ ३ ॥

नदन्ति गावोऽपि विशिष्टकालेष्वम्बेति यो नाह्वयते स किं ना ।
लक्ष्यं पुनः प्राणवदस्तु सर्वं सर्वस्य चान्तर्हि पराऽस्ति शक्तिः ॥ ४ ॥

आत्मन्युतान्यत्र विधाय लक्ष्यं तां शक्तिमाद्यामखिलेषु सुप्ताम् ।
यावत्प्रबोधं मुहुराह्वयस्व प्रबुध्यते सा यदि किन्वसाध्यम् ॥ ५ ॥

ये नाम शान्तिं परमां वहन्तो नामानि शीताचलपुत्रिकायाः ।
सङ्कीर्तयन्तो विजने वसन्ति जयन्तताताद्पि ते जयन्ति ॥ ६ ॥

नामानि सङ्कीर्तयतां जनानां कारुण्यवत्याः करिवक्त्रमातुः ।
पुनर्जनन्या जठरे निवासादायासवत्ता भवतीति मिथ्या ॥ ७ ॥

पापैस्समन्तात्समभिद्रुतोऽपि विश्वस्य ते विक्रममस्मि धीरः ।
न चेद्रसज्ञे भवती ब्रवीति नामानि शीतांशुभृतो हतोऽहम् ॥ ८ ॥

देहीति सम्पल्लवदर्पितानां द्वारेषु घोषं कुरुषे परेषाम् ।
भवानि भद्रे भुवनाम्ब दुर्गे पाहीति नायाति किमम्ब जिह्वे ॥ ९ ॥

वाक्यानि वक्तुं यदि ते रसज्ञे रसोज्ज्वलानि व्यसनं गरीयः ।
किं वा नमोन्तानि सुधां किरन्ति नामानि नो सन्ति कुमारमातुः ॥ १० ॥

यद् गीयते शैलसुताभिधानं तदेव बोध्यं सुकृतं प्रधानम् ।
अज्ञानिलोकस्य कृते भणन्ति यज्ञादिपुण्यानि पराणि विज्ञाः ॥ ११ ॥

साम्ना प्रयुक्तेन जगद्वशे स्यात् नाम्ना सदोक्तेन जगद्विनेत्री ।
वेदोभयं सम्यगिदं कृती यो भवे भयं तस्य कुतोऽपि न स्यात् ॥ १२ ॥

सङ्कीर्तनात्तुष्यति शर्वयोषा तुष्टा त्वभीष्टं न ददाति नैषा ।
इमं त्वविज्ञाय जगत्युपायं व्रजन्त्यपायं बहुधा मनुष्याः ॥ १३ ॥

भाषे भुजङ्गाभरणप्रियाया नामानि कामानितरान्विहाय ।
अपि प्रपद्यातिघघोरकृत्यं करोतु किं मां तरणेरपत्यम् ॥ १४ ॥

यज्ञेन दानैः कठिनव्रतैर्वा सिद्धिं य इच्छेत्स ग्रहीतुमिच्छेत् ।
मातुः शयानोऽङ्कतले शशाङ्कं महेश्वरीं कीर्तयतस्तु सिद्धिः ॥ १५ ॥

रहस्यतन्त्राणि विविच्य दूरं व्याजं विमुच्य प्रवदामि सारम् ।
नामैव कामारिपुरन्धिकायाः सिद्धेर्निदानं न मखो न दानम् ॥ १६ ॥

पीयूषमीषन्मधुरं भणन्ति ये नाम रामाधरपानलोलाः ।
कामारिरामाह्वयगानलोलाः कवीश्वराः काञ्जिकमालपन्ति ॥ १७ ॥

सुधाघटः कोऽप्यधरो वधूनां कविस्सुधातोयधरोऽभिधेयः ।
अयं सुधावीचिवितानमाली नामप्रणादौ नगकन्यकायाः ॥ १८ ॥

सुरालये भातितरां सुधैका सुधा परा वाचि महाकवीनाम् ।
बिम्बाधरे कञ्जदृशां सुधाऽन्या सुधेतरा नामनि लोकमातुः ॥ १९ ॥

माधुर्यमाभात्यधरे वधूनां चकोरबन्धोः शकले प्रसादः ।
त्रिस्रोतसो वारिणि पावनत्वं त्रयं च नाम्नि त्रिपुराम्बिकायाः ॥ २० ॥

या माधुरी प्रेमभरेण दृष्टे जागर्ति कान्तावरदन्तचेले ।
सा दृश्यते भक्तिभरेण गीते धराधराधीशसुताभिधाने ॥ २१ ॥

यत्ते जगल्लम्पट केऽपि वर्णास्तन्मेऽमृतं नाम नगात्मजायाः ।
लालामयो यो मम तं ब्रवीषि सुधामयं स्त्रीदशनच्छदं त्वम् ॥ २२ ॥

उच्चारयोच्चाटितपातकानि नामानि जिह्वे भुवनस्य मातुः ।
तदा वदामो मधुचूतरम्भारामाधरास्ते रुचये यदि स्युः ॥ २३ ॥

आक्षेपमिक्षोरधिकं विधत्ते पीयूषदोषानभितोऽभिधत्ते ।
कान्ताधरारब्धदुरन्तवादः कपर्दिकान्तावरनामनादः ॥ २४ ॥

विश्वासहीनैस्सुतरामबोध्यं नामानुभावं नगकन्यकायाः ।
जयन्तु सिद्धैरपि गीयमानं गायन्त्य एता उपजातयो नः ॥ २५ ॥

द्वात्रिंशः स्तवकः

विदधातु सम्पदं मे सकलजगन्नाथनयनहारिज्योत्स्नः ।
शीतोऽन्धकारहारी हासशशी कश्चिदङ्करहितो मातुः ॥ १ ॥

करुणारसार्द्रहृदया हृदयान्तरनिर्यदच्छवीचिस्मेरा ।
प्रमथेश्वरप्रियतमा पादप्रेष्यस्य भवतु कल्याणाय ॥ २ ॥

कारणकार्यविभेदाद् रूपद्वितयं तवाम्ब यदपिप्रोक्तम् ।
तत्रैकं भर्तुमिदं विहर्तुमन्यत्तु भूतभर्तुर्ललने ॥ ३ ॥

श्रोतुं स्तोत्रविशेषं भक्तविशेषं च बोद्धुमयमीदृगिति ।
दातुं च वाञ्छितार्थं तव मातश्चन्द्रलोकरूपं भवति ॥ ४ ॥

कीशकिशोरन्यायात् कारणरूपं तवाम्ब योगी धत्ते ।
श्रोतृकिशोरन्यायाद् भक्तं परिपासि कार्यरूपेण त्वम् ॥ ५ ॥

दृढधारणा न चेत्त्वच्च्यवते योगी महेशनयनज्योत्स्ने ।
नायं ममेति भावस्तव यदि सद्यः सवित्रि भक्तं त्यजसि ॥ ६ ॥

शिथिलधृतिर्योगी स्याद् बाह्यैर्विषयैर्नितान्तमाकृष्टो यः ।
स्वीयमतिर्लुप्स्यति ते भक्तेऽहन्ताग्रसारकलुषे मातः ॥ ७ ॥

साहङ्कृतिर्न भक्तिः सबाह्यविषया धृतिर्न सर्वेश्वरि ते ।
श्रावि जानन्तावेतद् भक्तो योगी च नैव सिद्धौ स्याताम् ॥ ८ ॥

व्यक्तित्वादपि यस्य प्रियं त्वदीयं सवित्रि पादाम्भोजम् ।
सोऽद्भुतशक्तिर्भक्तो भगवति किं किं करोति नास्मिन् जगति ॥ ९ ॥

व्यक्तित्वलोभविवशे सिद्धः कामोऽपि भवति समवच्छिन्नः ।
प्राप्तोऽपि सलिलराशिं सलिलानि घटः कियन्ति सङ्गृह्णीयात् ॥ १० ॥

जीवन्नेव नरो यः सायुज्यं ते प्रयाति शम्भोः प्रमदे ।
सर्वे कामास्तस्य प्रयान्ति वशमाशु वीतविविधभ्रान्तेः ॥ ११ ॥

व्यक्तित्वं तुभ्यमिदं मनीषया मे प्रदत्तमधिकारिण्या ।
बहुकालभोगबलतो विवदति देहो मदम्ब किं करवाणि ॥ १२ ॥

स्थूलेन वर्ष्मणा सह सूक्ष्मा कलहं मतिर्न कर्तुं शक्ता ।
सुतरां बलवति मातर्बलाद् गृहाण स्वयं त्वमस्मात्स्वीयम् ॥ १३ ॥

सर्वेषां हृदि यस्मात्त्वमसि प्राणात्मिकाम्ब हेतोस्तस्मात् ।
अखिलप्राण्याराधनमाराधननिर्विशेषमगपुत्रि तव ॥ १४ ॥

जुह्वति केऽपि कृशानौ तस्मात्प्राप्तिस्तवेति सम्पश्यन्तः ।
अपरे प्राणिषु जुह्वति साक्षात्प्राणात्मिकाऽसि तेष्वन्तरिति ॥ १५ ॥

प्राणिष्वपि यः प्राणं भूतादिमनादिमात्मनि स्थितमनवम् ।
सततमुपास्ते योगी तस्मिन् होमेन तेऽम्ब तृप्तिस्सुलभा ॥ १६ ॥

आत्मनि योऽम्ब श्रेष्ठे प्राणे प्राणान् जुहोति दहराभिमुखः ।
चिद्रूपे हतपापे तेन जितं सकलमीशचित्तारामे ॥ १७ ॥

उपसंहृतमखिलेभ्यो विषयेभ्यो निर्निमेषमन्तःकृष्टम् ।
हृदि दृढपदेन चक्षुस्त्वद्रूपे हूयते मदम्ब प्राणे ॥ १८ ॥

अन्तस्स्वरं निगूढं श्रेष्ठप्राणस्य देवि तव भागस्य ।
शृण्वदिव प्रणवाख्यं श्रवणं तत्रैव भवति जगदम्ब हुतम् ॥ १९ ॥

सर्वेषां मन्त्राणां स्तोत्राणां चेशचित्तनाथे प्रकृतौ ।
गूढं सदा स्वरन्त्यां प्राणन्त्यां त्वयि जुहोति मौनी वाचम् ॥ २० ॥

देहे स्खलति मनश्चेत् विषयेषु हुतं दधाति विषयात्मत्वम् ।
आवृत्तं यदि देहाद् सूक्ष्मायां त्वयि हुतं त्वदाकृति भवति ॥ २१ ॥

त्वद्प्रसनघ्राणानामनुभूतीः प्राणशक्तिसात्कुर्वाणः ।
कं नार्पयते भोगं भगवति ते सर्वलोकपार्थिववनिते ॥ २२ ॥

गच्छन्कुर्वन्विसृजन् रममाणश्चाम्ब सकललोकाधीशे ।
यः केवलां क्रियामपि चिन्तयते तेन नित्ययज्ञः क्रियते ॥ २३ ॥

सर्वेषामग्नीनां प्राणाग्निस्तव विभूतिरुक्तः श्रेष्ठः ।
तस्मिन्हुतं तु सुहुतं द्रव्याणि धियः क्रियाश्च मन्त्रः प्रणवः ॥ २४ ॥

आर्यागीतीनामयमधरीकृतमधुसुधादिमाधुर्यरसः ।
वर्गो गणपतिवदनान्निष्क्रान्तो भवतु शर्वसुदृशः प्रीत्यै ॥ २५ ॥

त्रयस्त्रिंशः स्तवकः

सुधां किरन्तोऽखिलतापहारिणीं तमोहरन्तः पटलेन रोचिषाम् ।
भ्रयं दिशन्तो दिशि दिश्यसङ्ख्यां जयन्ति शीताद्रिसुतास्मिताङ्कुराः ॥ १ ॥

कृपाकटाक्षस्तव केन वाऽऽप्यते महेशशुद्धान्तपुरन्ध्रि कर्मणा ।
निरन्तरं मन्त्रजपेन वा मतेर्विशोधनेनोत मनोर्पणेन वा ॥ २ ॥

विशोधनाद्देवि मतेः प्रगृह्यसे मनोर्पणेनेशवधु प्रसीदसि ।
जपेन मन्त्रस्य शुभस्य वर्धसे जगत्त्रयीधात्रि कलेवरान्तरे ॥ ३ ॥

मनःप्रतापस्य भवत्यसंशयं प्रवर्धनं वैदिकमन्त्रचिन्तनम् ।
प्रशस्यते प्राणमहःप्रदीपने दयान्विते तान्त्रिकमन्त्रसेविता ॥ ४ ॥

तवाम्बिके तान्त्रिकमन्त्रमुत्तमं स्तवातिगं यः कनकाङ्गि सेवते ।
विचित्रयन्त्रादिव वैद्युतं महस्ततो विनिर्यद् भुवनं विगाहते ॥ ५ ॥

न तस्य चेतो विकृतेर्वशे भवेन्न तस्य दृष्टिर्विषयैर्विकृष्यते ।
न तस्य रोगैरपकृष्यते वपुः सवित्रि यस्ते भजते महामनुम् ॥ ६ ॥

स्मरन्ति मायां गगनाग्निशान्तिभिः सहाच्छभासा सहिताभिरम्बिके ।
तथा रसज्ञां द्रुहिणाग्निशान्तिभिर्भणन्ति दोरध्रीं तु खषष्ठबिन्दुभिः ॥ ७ ॥

अभण्यताद्या भुवनेश्वरी बुधैरनन्तरा मातरगादि कालिका ।
प्रचण्डचण्डी परिकीर्तितापरा त्रयोऽप्यमी ते मनवो महाफलाः ॥ ८ ॥

उपाधिभूतं शुचि नाभसं रजो दधाति साक्षाद् भुवनेश्वरीपदम् ।
तदाश्रया व्यापकशक्तिरद्भुता मनस्विनी काचन कालिकेरिता ॥ ९ ॥

अमर्त्यसाम्राज्यभृतः प्रवर्तिका विशाललोकत्रयरङ्गनर्तिका ।
पराक्रमाणामधिनायिकोच्यते प्रचण्डचण्डीति कला सवित्रि ते ॥ १० ॥

स्मरन्मनुं रोदिति भक्तिमांस्तव प्रगृह्य पादं मुनिरम्ब लम्बते ।
फलं चिराय प्रथमः समाप्नुयात् परो मरन्दं पद एव विन्दति ॥ ११ ॥
पदं तवान्विष्टमनेकदा मुदा हृदन्तरे स्पृष्टमिवेदमम्बिके ।
पलायतेऽधोऽहमनन्तरं शुचा परात्परे रोदिमि मन्त्रशब्दतः ॥ १२ ॥
भणन्ति सन्तो मरुतां सवित्रि ते महामनुं त्वत्पदभास्करातपम् ।
ततो हि मूलात्स्वर एष निर्गतस्तत्पत्यघौघं जरयन्महोमयः ॥ १३ ॥
सवित्रि साक्षाच्चरणस्य ते प्रभां विधारयँस्तज्जनिमूलमार्गणे ।
मुहुर्मुहुस्सोऽहमजे धृतोद्यमः पथा महर्षी रमणो बभाण यम् ॥ १४ ॥
अहम्पदार्थो यदि चिल्लता तता किमेष दोग्ध्रीमनुभावतोऽपरः ।
अहं यदि प्राणनिनादवैखरी न कूर्च आख्यातुमसेति शक्यते ॥ १५ ॥
परे तु यां चेतनशक्तिमामनन्त्यभाणि सा कुण्डलिनीति तान्त्रिकैः ।
विलक्षणा नाम चमत्कृतिर्जडान् प्रतारयत्यागमसारदूरगान् ॥ १६ ॥
भवत्यखण्डानुभवः प्रबोधिनामतीव सूक्ष्मानुभवश्च योगिनाम् ।
करं गतास्सर्वविधाश्च शेरते महेश्वरीमन्त्रपरस्य सिद्धयः ॥ १७ ॥
सहस्रसङ्ख्यानि जनूंषि वा मम प्रियाणि भक्तिस्तव चेद्भवे भवे ।
तव स्मृतिं चेद् गलयेन्न सम्मदं करोति मोक्षोऽपि ममेशवल्लभे ॥ १८ ॥
विनैव दृष्टिं यदि सत्प्रशिष्यते न सत्तयाऽर्थः फलहीनया तया ।
इदं तु सत् किन्त्वसतो विशिष्यते न तात मुक्तोपलयोस्तदा भिदा ॥ १९ ॥
शुचां निवृत्तिर्यदि मुक्तिरिष्यते सुखप्रवृत्तिर्यदि नात्र विद्यते ।
सदेव चेत्तत्र मतिर्न भासते जडं विमुक्ताद्वयसैव भिद्यते ॥ २० ॥
मतिः पराची व्यवहारकारणं भवेत्प्रतीची परमार्थसम्पदि ।
उभे दिशौ यस्य मतिर्विगाहते पदा च मूर्ध्ना च स सिद्ध इष्यते ॥ २१ ॥
दृढं पदं यस्य मतेः सदाऽन्तरे स नाधियोऽग्रेण बहिश्चरन्नपि ।
सवित्रि मग्नस्त्वयि सम्प्रकीर्त्यते न तस्य भीः संचरतोऽपि संसृतेः ॥ २२ ॥
विचिन्तने चिन्तनशक्तिमद्भुतां विलोकने लोकनशक्तिमुज्ज्वलम् ।
प्रभाषणे भाषणशक्तिमुत्तमां निभालयंस्त्वां विषयैर्न जीयते ॥ २३ ॥
विलोकमानस्य विलोकनं कवेर्विलोक्यमानेषु विहाय सक्तताम् ।
विलोचने सन्निहिता निरन्तरं विधूतभीतिर्विबुधस्तुता शिवा ॥ २४ ॥
अयं भयानां परिमार्जकस्सतां समस्तपापौघनिवारणक्षमः ।
मनोज्ञवंशस्थगणो गणेशितुर्मनो महेशाब्जदृशो धिनोत्वलम् ॥ २५ ॥

चतुस्त्रिंशः स्तवकः

विदितमहिमा विश्वाधानादनेकविधाद्भुतात्
प्रथितचरितः शर्वालोकप्रतापविवर्धनात्।
प्रकटितगुणः पापध्वान्तप्रसारनिरोधनात्
प्रदिशतु शिवाहासो भासां निधिः कुशलानि मे ॥ १ ॥

हृदि करुणया पूर्णा बाह्वोर्बलेन महीयसा
पदकमलयोर्लक्ष्म्या भक्तैर्जनैरुपजीव्यया।
मुखसितकरे लावण्येन त्रिणेत्रदृशां बलं
बहु विदधता काली माताऽवतात्पदसेविनम् ॥ २ ॥

जगदधिपया सिद्धं दोग्ध्र्याऽथवोत रसज्ञया
मुनिजननुतं देवीमन्त्रं जपेद्यदि मानवः।
अमृतजलदीभूतः पूतः प्रयोगविशेषवित्
स इह वसुधालोके धारा गिरामभिवर्षति ॥ ३ ॥

इममभिमुखीभूता शातोदरी कमलालया
हयगजघटापूर्णाऽभ्यर्णं समेत्य निषेवते।
सविबुधमिदं विश्वं तस्य प्रयाति पुनर्वशम्
प्रथितयशसां सिद्धीनां चाप्यमुं भजतेऽष्टकम् ॥ ४ ॥

सुविमलधियस्तस्य क्रोधाद् दृगम्बुधुतद्युती
रिपुजनवधूगण्डाभोगो भवेदुत पाण्डुरः।
सपदि भुवनव्याप्तं चाप्तैः प्रमाणपुरस्सरं
भणितमजरं भद्रं ज्योतिः परं हृदि भासते ॥ ५ ॥

अदयमरिभिः क्रान्ते राष्ट्रे त्वमीश्वरि रक्षिका
सुमशरमुखैर्भूते चित्ते त्वमीश्वरि रक्षिका।
प्रबलदुरितैर्ग्रस्ते वंशे त्वमीश्वरि रक्षिका
ऽप्यसृजति जलं मेघे मोघे त्वमीश्वरि रक्षिका ॥ ६ ॥

भगवति निजौ साक्षात्पुत्रौ बृहस्पतिपावकौ
गणपतिगुहावेतौ वेषान्तरव्यवहारतः।
भरतधरणीखण्डे हेतोः कुतः कृतसम्भवौ
कलकलयुते काले देवि व्यधाः कथय द्रुतम् ॥ ७ ॥

समयमयि ते धृत्वा पादाम्बुजं रमणः सुतो
गिरिवरगुहास्वन्तः शान्तो नयेद्यदि नाद्भुतम् ।
स्थलविरहतः स्वीयस्थाने किमत्र समागतो
न वदसि कुतः कार्यं तस्मै कुलाचलकन्यके ॥ ८ ॥

परिभणति चेच्छिष्यव्यूहे महाद्भुतसङ्गती-
र्जननि रमणो योगीशानस्ततो बहु नो फलम् ।
अमिततमया दृष्टेः शक्त्या कदा सरणिं नये-
दपथपतितं धात्रीलोकं तदेव वदाम्बिके ॥ ९ ॥

अहमिह कुतो हेतोर्जातो विषण्णतमे स्थले
चरणकमलच्छायां मायाधिराज्ञि विहाय ते ।
परमकरुणो घोरः शापः किमेष सवित्रि ते
किमपि भुवि वा कार्यं कर्तुं नियोजितवत्यसि ॥ १० ॥

व्रजति विलयं स्नेहो दूरप्रवासवशादिति
प्रवदति बुधः कश्चित्सत्यं प्रभाति तदम्बिके ।
भगवति निजे कुक्षौ जातं दिवो धरणीगतं
स्मृतिसरणितो दूरे हा हा करोषि रुषा यथा ॥ ११ ॥

मम तु विमला हृद्या विद्या महेश्वरि याऽभव-
न्मनसि च परा चित्रा शक्तिश्चिरन्तनि याऽभवत् ।
वचसि च महद्भाग्यं श्लाघ्यं यदीड्यतमेऽभवत्
तदयि गलितं मत्तो वित्तत्रयं भवतो भुवि ॥ १२ ॥

कृतमयि मया पापं घोरं सुकर्मसु सङ्गिनां
यदहमदयो विघ्नं नृणां मुहुर्मुहुराचरम् ।
अतिकटु फलं तस्याश्नामि श्रितो नरविग्रहं
प्रमथनृपतेर्जाये माये जनन्यव मामिमम् ॥ १३ ॥

न भवसि दृशोर्मार्गे लोकाधिराज्ञि कुतो गिरो
न च बहुकृपे स्वप्ने वा त्वं प्रयच्छसि दर्शनम् ।
अपनयसि नो सन्देहं वा परोक्षकृपावशा-
दपि सुरनृते लग्ना कार्यान्तरे किमुतादया ॥ १४ ॥

निरवधिशिवे माहात्म्यं ते भणन्ति महर्षयो
मनसि करुणा न न्यूना ते यथा प्रथिताः कथाः ।

तदिदमखिलं मिथ्या स्यादित्यसाध्यमुदीरितुं
यदसि विमुखी पुत्रे किंवा भवेदिह कारणम् ॥ १५ ॥

भुवनभरणं नाल्पं कार्यं न देवि तव क्षणो
गुरु च बहुलं कृत्यं नित्यं तवास्ति न तन्मृषा ।
न तव कठिनं मौनं निन्द्यं तथापि न पार्वति
स्मर सकृदिमं दीनं पुत्रं तदेव ममाधिकम् ॥ १६ ॥

न भवति सुधाधारावर्षादयं मुदितस्तनौ
मधुमदमुषां वाचां सर्गान्न चाप्ययमुद्धतः ।
तव पदयुगे निष्ठालाभान्न तृप्यति चाप्ययं
भगवति चिरात् सन्देशं ते सुतः प्रतिवीक्षते ॥ १७ ॥

किमिह भुवने कर्तव्यं मे किमर्थमिहागतो-
ऽस्म्यवनि जगतां कं वोपायं श्रये निजशक्तये ।
किमपि किमपि स्वान्ते ध्वान्ते यथा परिदृश्यते
स्फुटमभयदे वक्तुं किञ्चिच्छ्रमं त्वमुरीकुरु ॥ १८ ॥

न मम परमे मुक्तावाशा न वा विभवाष्टके
न च गजघटापूर्णायां वा महेश्वरि सम्पदि ।
न च मधुमुचां वाचां सर्गे निरर्गलवैभवे
मुनिभुवि कुतो जातः सोऽहं तदेव समीर्यताम् ॥ १९ ॥

प्रथममनघं वाञ्छाम्यन्नं सदारसुतातिथे-
र्भगवति ततः पादद्वन्द्वे तवाविचलां स्थितिम् ।
अथ सुरजगद्वार्ताज्ञानं सवित्रि ततः परं
मुनिभुवि भवे हेतुं ज्ञातुं मृगाक्षि पुरद्विषः ॥ २० ॥

यदि तव कृपा पुत्रे भक्ते पदाम्बुजवन्दिनि
व्रतशतकृशे शीर्षाम्भोजामृतं त्वयि जुह्वति ।
भरतधरणीसेवालोले भवप्रियभामिनि
स्वयमुपदिशामुष्मै योग्यं विधानमनाविलम् ॥ २१ ॥

जननि जगतां स्वल्पे कामेऽप्ययं त्वयि लम्बते
पुरभिदबले मध्ये कामेऽप्ययं त्वयि लम्बते ।
बहुलकरुणे श्रेष्ठे कामेऽप्ययं त्वयि लम्बते
भगवति परे वीते कामेऽप्ययं त्वयि लम्बते ॥ २२ ॥

तनुभुवि मयि प्रीत्या वाऽम्ब त्रिलोकविधायिके
पदयुगरते वात्सल्याद्वा पुरारिपुरन्ध्रिके ।
स्वविमलयशोगानासक्ते कृपावशतोऽथवा
परुषमजरे मौनं त्यक्त्वा स्फुटोकुरु मे गतिम् ॥ २३ ॥

जयतु भरतक्षोणीखण्डं विषादविवर्जितं
जयतु गणपस्तस्य क्षेमं विधातुमना मुनिः ।
जयतु रमणस्तस्याचार्यो महर्षिकुलाचलो
जयतु च तयोर्माता पूता महेशविलासिनी ॥ २४ ॥

गणपतिमुनेरेषा भाषाविदां हृदयङ्गमा
सुकविसुहृदः शब्दैरत्युज्ज्वला हरिणीततिः ।
ललितचतुरैर्भावैर्यान्ती सुरूपवनान्तरं
मदयतु मनः कामारातेर्निशान्तमृगीदृशः ॥ २५ ॥

पञ्चत्रिंशः स्तवकः

अन्धतमसं शशिविभामभिदधाना
कान्तिमलमास्यकमलस्य विदधान ।
अन्धकविरोधिदयितास्मितलवश्री-
र्भातु भुवनस्य सकलस्य कुशलाय ॥ १ ॥

भाहि विविधा कृतिमती द्विजसमूहे
पाहि गतिहीनमखिलेश्वरि कुलं नः ।
देहि बहुकालभजकाय वरमेतं
याहि नगनन्दिनि यशः शशिवलक्षम् ॥ २ ॥

वारयति घोरतरपातकसमूहं
वर्धयति धर्ममपि शर्मकरमन्ते ।
किङ्करजनस्य न किमावहति भव्यं
शङ्करपुरन्ध्रि तव पादपरिचर्या ॥ ३ ॥

यस्य मनुजस्य हृदयेऽस्ति सदये ते
नाकचरसेव्यमयि पादसरसीजम् ।

तं भजति पद्ममुखि पद्मवनवासा
लाभभवने भवतु नामरपुरोधाः ॥ ४ ॥

यद्यखिलमौनिगणगीतगुणजालं
कालभयहारिकरुणारसमरन्दम् ।
अद्रितनयाङ्घ्रिजलजन्म हृदये स्या-
दृष्टमगतोऽपि विदधातु रविजः किम् ॥ ५ ॥

लेखललनाकचसुमैः कृतबलिं ते
यो भजति पादमणिमालिनमनन्ते ।
निस्तरति नूनमयमस्तमितमोहः
शोकतिमिरं सकललोकगणमातः ॥ ६ ॥

शीतकरदर्पहरवक्त्रजलजाते
शीतगिरिनन्दिनी तवाङ्घ्रिजलजातम् ।
यः स्मरति देवि हृदि विस्मरति सोऽयं
विष्टपमशेषमपि कष्टततिमुक्तः ॥ ७ ॥

सक्तिरयि यस्य तव पादसरसीजे
शक्तिधरमातरनलाक्षगृहनाथे ।
पूर्णशशिजैत्रमुखि पुण्यपुरुषोऽसौ
स्वर्णशिखरीव बुधलोकशरणं स्यात् ॥ ८ ॥

वैरिगणनिर्दलनखड्गवरपाणे
वाससि पदोर्दशनवाससि च शोणे ।
नेत्रमिषपावकविशेषितललाटे
पापमखिलं जहि मृगाधिपतिघोटे ॥ ९ ॥

वेदचयवेदिजनवादविषयस्य
प्रीतियुतलोकततिशोकशमनस्य ।
वेतनविवर्जितभटोऽयमहमङ्घ्रेः
शीतकरपोतधरपुण्यवनिते ते ॥ १० ॥

कार्यमयि मे किमपि कार्यपटुबुद्धेः
पादसरसीजयुगलीपरिजनस्य ।
अम्ब वद जम्भरिपुगीतगुणजाले
शुम्भकुलनाशकरि शम्भुकुलयोषे ॥ ११ ॥

त्वं यदि शिलावदयि नो वदसि कृत्यं
नास्ति तव राज्यपटुबुद्धिरिति सत्यम् ।
आदिश यथार्हकरणीयकृतिनित्यं
राज्ञि भुवनस्य चरणाम्बुरुहभृत्यम् ॥ १२ ॥

पञ्चसु विहाय मनसः कमपि सङ्गं
पुत्रधनमित्रजनबान्धववधूषु ।
एष भजते जननि पादजलजं ते
पालय नु मुञ्च नु तवोपरि स भारः ॥ १३ ॥

वज्रधरमुख्यसुरसञ्चयकिरीट-
स्थापितमहार्घमणिरञ्जितनखाय ।
जीवितमदायि जगदीश्वरि मदीयं
पादजलजाय तव पालय नु मा वा ॥ १४ ॥

देहि जगदीश्वरि न वा मदभिलाषं
पाहि करुणावति न वा कुलमिदं नः ।
शूलधरकामिनि सुरासुरनिषेव्यं
पादकमलं तव परे न विजहामि ॥ १५ ॥

पासि किल पादयुगकिङ्करसमूहं
हंसि किल पापततिमापदि नुता त्वम् ।
दन्तिवदनप्रसु वदन्ति मतिमन्तो
नानृतमिदं भवतु नाकिजनवर्ण्ये ॥ १६ ॥

शक्रसुखदेवततिवन्दितविसृष्टे
वक्रघनकेशि चरणे तव लुठन्तम् ।
आपदि निमग्नमिममाश्रितमनाथं
नन्दिहयसुन्दरि न पालयसि केन ॥ १७ ॥

घोषमयम्ब विदधाति पदलग्नो
नावसि पुराणि किमु नारि बधिराऽसि ।
वन्दिसुरवृन्दनुतिभाषितहृतं वा
कर्णयुगलं तव कपालिकुलयोषे ॥ १८ ॥

अम्ब भव बिम्बफलकल्पदचेले
शम्बरसपत्नबलकारिबहुलीले ।

प्रागमृतभानुमुकुटस्य मदयित्री
तं कुरु ततः परमुरीकृतमदर्थम् ॥ १९ ॥

निर्मलसुधाकरकलाकलितमस्ते
धर्मरतपालिनि दयावति नमस्ते ।
एतमव देवि चरणाम्बुरुहबन्धुं
शीतधरणीधरसुते गमय नान्धुम् ॥ २० ॥

अद्रिकुलपालककुलध्वजपताके
भद्रगजगामिनि दरिद्रमयि मत्या ।
क्षुद्रमिव शोच्यमिममङ्घ्रिजलजाप्तं
रुद्रदयिते जननि पाहि न जहीहि ॥ २१ ॥

अस्तु तव पादकमले स्थितिरजस्रं
नास्ति परदुःखविवशे हृदि तु शान्तिः ।
अस्तु करुणोऽयमस्तु मतिलोपः
कष्टमिदमम्ब मम भूरि परिशिष्टम् ॥ २२ ॥

दुःखसुखभेदरहिता न मतिरासीत्
साधुखलभेदरहिता न मतिरासीत् ।
भाग्यमतिमान्यमथवा मम तदेत-
न्मातरिह सङ्गभजने यदवकाशः ॥ २३ ॥
अस्तु मम भेदमतिरस्तु मम पक्षो
यत्नपरताऽस्तु मम मास्तु च विमोक्षः ।

मोक्षमयि वेद्मि कुलकष्टततिमोक्षं
प्रेषय सकृत्तव महेश्वरि कटाक्षम् ॥ २४ ॥
शाकरगणेन मुखरेऽत्र गणनाथे
विष्णुयशसीशवधु जिष्णुमुखवन्द्ये ।
अम्बकरुणां कुरु शिवङ्करि निरङ्क-
स्वच्छकिरणार्भकविभूषितललाटे ॥ २५ ॥

षट्त्रिंशः स्तवकः

उन्नतस्तनस्थलीविलोलहारमौक्तिक-
व्रातदीधितिप्रतानबद्धसौहृदा सदा ।
अन्धकारिकामिनीदरस्मितद्युतिर्धुनो-
त्वन्धकारमन्तरङ्गवासिनं घनं मम ॥ १ ॥

अम्बरस्थले पुरा पुरन्दरो ददर्श यां
यां वदन्ति पर्वतप्रसूतिमैतिहासिकाः ।
सा परा पुरामरेः पुरन्ध्रिकाऽखिलाम्बिका
पुत्रकाय मज्जते ददातु दक्षिणं करम् ॥ २ ॥

पादपङ्कजे धृता नरैरवाह्यभक्तिभिः
पाणिपङ्कजे धृता नवेन्दुखण्डधारिणा ।
चारुहेमहंसका मनोज्ञरत्नकङ्कणा
लोकजालपालिनी पुनातु मां विलासिनी ॥ ३ ॥

उक्षराजवाहनस्य जीविताद् गरीयसी
पक्षिराजवाहनादिवर्ण्यमानवैभवा ।
केकिलोकचक्रवर्तिवाहनेन पुत्रिणी
वारणारिसार्वभौमवाहना गतिर्मम ॥ ४ ॥

बालकुन्दकुट्मलालिकान्तदन्तपङ्क्तिका
कुण्डलानुबिम्बशोभिशुद्धगण्डमण्डला ।
बिभ्रती रतीशवेत्रविभ्रमं भ्रुवोर्युगं
शुभ्रभानुशेखरस्य सुन्दरी प्रणम्यते ॥ ५ ॥

आजिदक्षवाहवैरियातुधानबाधितं
या ररक्ष देवबृन्दमिन्दिरादिवन्दिता ।
सा कटाक्षपातधूतभक्तलोकपातका
पावकाक्षसुन्दरी परात्परा गतिर्मम ॥ ६ ॥

तारकाधिनाथचूडचित्तरङ्गनर्तकी
मन्दहाससुन्दरास्यपङ्कजा नगात्मजा ।
दीनपोषकृत्यनित्यबद्धबुद्धिरव्यया
गृह्यते गणाधिपेन सर्वतो नृणां पदे ॥ ७ ॥

अष्टमीशशाङ्कखण्डदर्पभञ्जनालिका
विष्टपत्रयाधिनाथमानसस्य डोलिका ।
पापपुञ्जनाशकारिपादकञ्जधूलिका
श्रेयसे ममास्तु शैललोकपालबालिका ॥ ८ ॥

सानुमत्कुलाधिनाथबालिकालिकुन्तला
जङ्गमेव काऽपि तप्तहेमसालभञ्जिका ।
भक्तियुक्तलोकशोकवारणाय दीक्षिता
शीतशीतवीक्षिता लघु स्यतादघं मम ॥ ९ ॥

पुण्यनामसंहतिः पुरारिचित्तमोहिनी
पुष्पबाणचापचारुझिल्लिकाऽखिलाम्बिका ।
पुण्यवैरिपुष्टदुष्टदैत्यवंशनाशिनी
पुत्रकस्य रक्षणं पुरातनी करोतु मे ॥ १० ॥

क्षाममध्यमस्थली सुधावटोपमस्तनी
कृष्णसारलोचना कुमुद्वतीप्रियानना ।
भ्रूविलासधूतधैर्यकाञ्चनाद्रिकार्मुका
काचिदिच्छुकार्मुकस्य जीविका जयत्युमा ॥ ११ ॥

लोहिताचलेश्वरस्य लोचनत्रयीहिता
लोहितप्रभानिमज्जदब्जजाण्डकन्दरा ।
हासकान्तिवर्ध्यमानसारसारिमण्डला
वासमत्र मे करोतु मानसे महेश्वरि ॥ १२ ॥

दक्षिणेक्षणप्रभाविजृम्भितास्रुसम्भवा
काममित्रवामनेत्रधामतूसकैरवा ।
एकतः परः पुमान्परा वराङ्गनाऽन्यतः
शुभ्रकीर्तिरेकमूर्तिरादधातु नश्शिवम् ॥ १३ ॥

शुम्भदैत्यमारिणी सुपर्वहर्षकारिणी
शम्भुचित्तहारिणी मुनीन्द्रचित्तचारिणी ।
कामितार्थदायिनी करिप्रकाण्डगामिनी
वीतकल्कमादधातु विघ्नराजमम्बिका ॥ १४ ॥

देवतासपत्नवंशकाननानलच्छटा
वारणारिसार्वभौमवाहना घनालका ।

नन्दिवाहनस्य काऽपि नेत्रनन्दिनी सुधा
नेत्रलांछितालिका सुतं पुनातु कालिका ॥ १५ ॥

राजसुन्दरानना मरालराजगामिनी
राजमौलिवल्लभा मृगाधिराजमध्यमा ।
राजमानविग्रहा विराजमानसद्गुणा
राजते महीधरे मदम्बिका विराजते ॥ १६ ॥

पर्वचन्द्रमण्डलप्रभाविडम्बनानना
पर्वताधिनाथवंशपावनी सनातनी ।
गर्वगन्धनाशिनी विभावरीविचारिणां
शर्वचित्तनायिका करोतु मङ्गलं मम ॥ १७ ॥

ओजसश्च तेजसश्च जन्मभूमिरच्युता
नीलकञ्जबन्धुबद्धमौलिरागमस्तुता ।
वीतरागपाशजालनाशबद्धकङ्कणा
विश्वपालिनी मया महेश्वरी विचिन्त्यते ॥ १८ ॥

अण्डमण्डलं यया निरन्तरं च पच्यते
संस्फुरत्यशेषभूतहार्दपीठिकासु या ।
श्वासदृष्टिसंविदूष्मनादवारिवर्ममि-
र्यामुपासते विदो नमामि तां परात्पराम् ॥ १९ ॥

पञ्चयुग्मवेषभृत्परात्परा सुरार्चिता
पञ्चवक्त्रवक्त्रपद्मचञ्चरीकलोचना ।
वज्रकान्तरङ्गशत्रुसञ्चयप्रणाशिनी
प्रेतमञ्चशायिनी कुलं चिराय पातु मे ॥ २० ॥

कर्मणा यथाविधि द्विजातयो यजन्ति यां
ब्रह्मणा यथाश्रुतं स्तुवन्ति यामधीतिनः ।
चेतसा यथागुरूक्ति चिन्तयन्ति यां विदः
सा परा जगत्त्रयीजनन्यजा जयत्युमा ॥ २१ ॥

वासुदेवजायया विनम्रया निषेवितां
वामदेवचाटुचित्रवाक्यबन्धलालिता ।
वासवादिदेवताजयप्रणादहर्षिता
वारयत्वघानि मे वसुन्धराभृतस्सुता ॥ २२ ॥

पूर्णिमासुधामरीचिसुन्दरास्यमण्डला
फुल्लपद्मपत्रदीर्घसम्प्रसन्ननेत्रना ।
पुण्यभूनिषेवणाय पुत्रमेतमुद्यतं
पूर्णकाममादधातु पादलग्नमम्बिका ॥ २३ ॥

लालयन्ति बालकं वतंसशीतदीधितिं
शीलयन्ति सूक्ष्मतां मनांसि योगिनामिव ।
कालयन्तु पापिनां कुलानि संहतीस्सतां
पालयन्तु च स्मितानि योषितः पुरद्विषः ॥ २४ ॥

पादसेविनः कवेर्मनोहरातिशक्वरी-
वर्ग एष नाट्यकारिनिर्जरीगणो यथा ।
लोकजालचक्रवर्तिपुण्ययोषितो मन-
स्सम्मदाय साधुकष्टवारणाय कल्पताम् ॥ २५ ॥

सप्तत्रिंशः स्तवकः

उद्दीपयतु नश्शक्तिमादिशक्तेर्दरस्मितम् ।
तत्त्वं यस्य महस्सूक्ष्ममानन्दो वेति संशयः ॥ १ ॥

पूर्णं प्रज्ञातृ सद्ब्रह्म तस्य ज्ञानं महेश्वरी ।
महिमा तेज आहोस्विच्छक्तिर्वा प्राण एव वा ॥ २ ॥

प्रचक्षते चिदात्मत्वं ज्ञातुर्ज्ञानस्य चोभयोः ।
प्रदीपस्य प्रभायाश्च ज्योतिराकृतितां यथा ॥ ३ ॥

चित एकपदार्थत्वाच्चिच्चिता न विशिष्यते ।
तस्माद् गुणत्वं ज्ञानस्य शङ्करेण निराकृतम् ॥ ४ ॥

ज्ञातुर्ज्ञानं स्वरूपं स्यान्न गुणो नापि च क्रिया ।
यदि स्वस्य स्वरूपेण वैशिष्ट्यमनवस्थितिः ॥ ५ ॥

वाचैव शक्यते कर्तुं विभागस्स्वस्वरूपयोः ।
नानुभूत्या ततो द्वैतं सच्छक्त्योर्व्यावहारिकम् ॥ ६ ॥

ब्रह्मज्ञानस्य पूर्णस्य विषयो द्यौरुदीर्यते ।
सा ब्रह्मणो व्यापकत्वाद्वस्तुतो नातिरिच्यते ॥ ७ ॥

विकासादपि सङ्कोचात् सर्गप्रलययोर्द्वयोः ।
प्रज्ञानस्य बुधैरुक्तौ जन्मनाशावुभौ दिवः ॥ ८ ॥

धर्मभूतं परस्येदं न कार्यं परमं नभः ।
अखण्डत्वान्न विकृतिर्विश्वस्मिन्नप्रकृतित्वतः ॥ ९ ॥

आकाशे परमे दीप्यत् प्रज्ञानं परमात्मनः ।
एकाग्रत्वात्प्रवृद्धोष्मगभीरमभवन्महः ॥ १० ॥

त्रिधैवं धर्मभूतस्य ज्ञानस्य विकृतिं विना ।
शुद्धत्वविषयत्वाभ्यां महत्त्वाच्च दशात्रयम् ॥ ११ ॥

विज्ञाने भाति ये भान्ति भावा द्रव्यगुणादयः ।
न किञ्चिदनुभूयन्ते विज्ञानोपरमे तु ते ॥ १२ ॥

एवं स्वतः प्रकाशत्वं विषयाणां न दृश्यते ।
सिद्धिश्च परतो न स्यात् सम्बन्धं कञ्चिदन्तरा ॥ १३ ॥

दृश्यते विषयाकारा ग्रहणे स्मरणे च धीः ।
प्रज्ञाविषयतादात्म्यमेवं साक्षात्प्रदृश्यते ॥ १४ ॥

न चेत्समष्टिविज्ञानविभूतिरखिलं जगत् ।
विषयव्यष्टिविज्ञानतादात्म्यं नोपपद्यते ॥ १५ ॥

यथाऽस्मदादिविज्ञाने ध्येयं बुद्धिरिति द्वयम् ।
पूर्णे समष्टिविज्ञाने विकृतिः प्रकृतिस्तथा ॥ १६ ॥

परिणामो यथा स्वप्नः सूक्ष्मस्य स्थूलरूपतः ।
जाग्रत्प्रपञ्च एष स्यात्तथेश्वरमहार्चितः ॥ १७ ॥

विकृतिस्सर्वभूतानि प्रकृतिः परदेवता ।
सतः पादस्त्रयोराद्या त्रिपादी गीयते परा ॥ १८ ॥

कबलीकृत्य सङ्कल्पानेकाऽपि स्याद्यथा मतिः ।
भूतानि कबलीकृत्य देवताऽपि तथा परा ॥ १९ ॥

भूतानामात्मनस्सर्गे संहृतौ च तथाऽऽत्मनि ।
प्रभवेद्देवता श्रेष्ठा सङ्कल्पानां यथा मतिः ॥ २० ॥

अनुभूत्यात्मिका सेयमीशशक्तिः परात्परा ।
आधारचक्रे पिण्डेषु विराजति विभिन्नवत् ॥ २१ ॥

सूक्ष्मस्थूले ततः शाखे विद्युच्छक्तिसमीरवत् ।
तत्राद्या ज्ञानशक्तिस्स्यात् क्रियाशक्तिरनन्तरा ॥ २२ ॥

ज्ञानेन्द्रियाणि प्रथमा विभूतिर्मनसा सह ।
कर्मेन्द्रियाणि त्वपरा विभूतिस्सहसा सह ॥ २३ ॥

क्रियामूलमुत ज्ञानमूलं किमिति चिन्तयन् ।
आत्मशक्तिमितो विद्वानमृतत्वाय कल्पते ॥ २४ ॥

गभीरास्सुतरामेताः कालिकातत्त्वकारिकाः ।
धियो भासो गणपतेर्भवन्तु विदुषां मुदे ॥ २५ ॥

अष्टत्रिंशः स्तवकः

दूरीकुरुताद् दुःखं निखिलं दुर्गायास्तदरहसितं नः ।
रचितस्याम्भोमृद्स्यां यदभूल्लेपनममलं ब्रह्माण्डस्य ॥ १ ॥

जन्तौ जन्तौ भुवि खेलन्ती भूते भूते नभसि लसन्ती ।
देवे देवे दिवि दीप्यन्ती पृथगिव पूर्णा संविज्जयति ॥ २ ॥

दहरसरोजाद् द्विदलसरोजं द्विदलसरोजाद्दशशतपत्रम् ।
दशशतपत्राद्देहं देहात् सकलं विषयं संविद् व्रजति ॥ ३ ॥

वह्निज्वाला समिधमिवैषा सकलं देहं संवित्प्राप्ता ।
पृथगिव भूता व्यपगतवीर्या भवति सधूमा संसाराय ॥ ४ ॥

अत्रानुभवस्सुखदुःखानामत्राहङ्कृतिरनृता भवति ।
अत्रैवेदं सकलं भिन्नं प्रतिभासेत प्रज्ञास्खलने ॥ ५ ॥

दशशतपत्राद् द्विदलशरोजं द्विदलसरोजाद्दहरसरोजम् ।
अवतरतीशा येषामेषा तेषामन्तर्नित्या निष्ठा ॥ ६ ॥

अथवा देहादावृत्तस्सन्नन्यतमस्यामासु स्थल्याम् ।
आधारस्थे कुलकुण्डे वा स्थितधीर्नित्यां निष्ठां लभते ॥ ७ ॥

दशशतपत्रे शक्तिर्ललिता वज्रवती सा द्विदलसरोजे ।
दहराम्बुरुहे भद्रा काली मूलाधारे भैरवव्याख्या ॥ ८ ॥

खेलति ललिता द्रवति स्थाने छिन्नग्रन्थिनि राजत्येन्द्री ।
बद्धकवाटे भद्रा काली तपसा ज्वलिते भैरवव्याख्या ॥ ९ ॥

यद्यपि कालीवज्रेश्वर्यौ स्यातां भिन्ने इव पिण्डेषु ।
ओजस्त्वस्यैक्यादण्डे न द्वौ शक्तेर्भेदौ भवतः ॥ १० ॥

एवमभेदो यद्यपि कर्मद्वैधात् द्वैधं तत्रापि स्यात् ।
सैव पचन्ती भुवनं काली सैव दहन्ती शत्रूनैन्द्री ॥ ११ ॥

पिण्डे चाण्डे जङ्गमसारः शुद्धा प्रज्ञा सुन्दर्युक्ता ।
विषयदशायां देशीभूता सेयं भुवनेश्वर्याख्याता ॥ १२ ॥

शून्यप्रख्या या चिल्लीना प्रलये ब्रह्मणि जन्मिषु सुप्तौ ।
कवलितसकलब्रह्माण्डां तां कवयः श्रेष्ठां ज्येष्ठामाहुः ॥ १३ ॥

निद्राविस्मृतिमोहालस्यप्रविभेदैस्सा भवमग्नेषु ।
एषैव स्याद्ज्ञानेषु ध्वस्तविकल्पः कोऽपि समाधिः ॥ १४ ॥

ऐन्द्री शक्तिर्व्यक्तबला चेद् भिन्ने स्यातां शीर्षकपाले ।
तस्मादेतां चतुरवचस्का परिभाषन्ते छिन्नशिरस्काम् ॥ १५ ॥

भवति परा वाग्भैरवव्याख्या पश्यन्ती सा कथिता तारा ।
रसनिधिमाषा जिह्वारङ्गं मातङ्गीति प्रथिता सेयम् ॥ १६ ॥

पिण्डे चाण्डे स्तम्भनशक्तिर्बगला मातस्तव महिमैकः ।
सर्वे व्यक्ताः किरणाः कमला बाह्यो महिमा भुवनाम्ब तव ॥ १७ ॥

बोधे बोधे बोद्धुश्शक्तिं सङ्कल्पानां पश्चाज्ज्ञान्तीम् ।
अविमुञ्चन्यो मनुते धीरो यत्किञ्चिद्वा ललिताऽवति तम् ॥ १८ ॥

दृष्टौ दृष्टौ द्रष्टुश्शक्तिं लोचनमण्डलमध्ये भान्तीम् ।
अविमुञ्चन्यः पश्यति धीरो यत्किञ्चिद्वा तमवत्येन्द्री ॥ १९ ॥

प्राणसमीरं विद्धानमिमं नित्या यात्रामत्र शरीरे ।
चरणे चरणे परिशीलयति स्थिरदृष्टिर्यस्त्वमवति काली ॥ २० ॥

स्थूलविकारान्परिमुञ्चन्त्या निर्मलनभसि स्थितया दृष्ट्या ।
मज्जन्त्या वा दहराकाशे लोकेश्वर्याः करुणां लभते ॥ २१ ॥

सर्वविकल्पान्परिभूयान्तर्विमलं मौनं महदवलम्ब्य ।
केवलमेकस्तिष्ठति योऽन्तस्तं सा ज्येष्ठा कुरुते मुक्तम् ॥ २२ ॥

मूले स्थित्वा भैरवव्याख्यां तारां देवीमुद्गीथेन ।
सेवतार्यो विदितरहस्यो मातङ्गीं तां गुणगानेन ॥ २३ ॥

स्रासनबन्धादचलो भूत्वा रुद्धप्राणो बगलां भजते ।
स्रभितो व्याप्तं व्यक्तं तेजः कलयन्कमलाकरुणां लभते ॥ २४ ॥

एकविधादौ बहुभेदाऽथो शक्तिरनन्ता परमेशस्य ।
सभजनमार्गं गणपतिमुनिना पादाकुलकैरेवं विवृता ॥ २५ ॥



एकोनचत्वारिंशः स्तवकः

व्याप्येदमिन्दोर्भुवनं य एव प्रायेण तस्यामलचन्द्रिकाऽभूत् ।
मन्दस्तवार्तिं स धुनोतु हासो निःशेषलोकेश्वरवल्लभायाः ॥ १ ॥

पूर्णे वियत्येकतटिज्ज्वलन्ती लोकानशेषाननिशं पचन्ती ।
मेघे कदाचिन्महसा स्फुरन्ती चण्डी प्रचण्डा हरतादघं नः ॥ २ ॥

गोलानि कान्यप्यधुनोद्भवन्ति जीर्यन्ति कान्यप्यखिलेशकान्ते ।
यान्त्यम्बिके कान्यपि वृद्धिमत्र पाके भवत्याः परितः प्रवृत्ते ॥ ३ ॥

भासां विनेत्रा महता ग्रहैश्च भूरिप्रमाणैर्युतमीशकान्ते ।
एकैकमण्डं तव लोमवच्चेत्कस्ते महद्भाग्यमिह ब्रवीतु ॥ ४ ॥

नाथस्य ते रूपमणोरणीयो मातस्त्वदीय महतो महीयः ।
जानाति यो देवि रहस्यमेतद् व्याख्यातुमेष प्रभवत्यशेषम् ॥ ५ ॥

यद् गर्जितं वारिदघर्षणेषु शब्दस्तवायं सुगभीरघोषः ।
यल्लोकराज्ञि स्फुरितं तदेतदुज्जृम्भितं किञ्चन कान्तिवीचेः ॥ ६ ॥

इन्द्रस्य वज्रं ज्वलितं कृशानोर्ज्योतिस्सहस्रच्छदबान्धवस्य ।
पीयूषभानोर्हसितं विसारि जीवस्य चक्षुर्मम तात दैवम् ॥ ७ ॥

यस्यैव तेजः प्रविभक्तमर्कविद्युच्छशाङ्कानललोचनेषु ।
गूढं तदाकाशगृहे समस्तादन्तानभिज्ञं प्रणमामि दैवम् ॥ ८ ॥

जाग्रत्सु बुद्धिर्निमिषत्सु निद्रा शुष्केषु पक्तिस्तरुणेषु वृद्धिः ।
धीरेषु निष्ठा चपलेषु चेष्टा देवी ममापत्तिमपाकरोतु ॥ ९ ॥

विद्यावतो वादविधानशक्तिर्वीरस्य सङ्ग्रामविधानशक्तिः ।
नारीमणेर्मोहविधानशक्तिर्लेशत्रयं किञ्चिदपारशक्तेः ॥ १० ॥

उत्साहयन्ती तपतां मनांसि सञ्चोदयन्ती च महाक्रियासु ।
सङ्क्षोभयन्ती हृदयं खलानां सम्मोहयन्ती च पराऽवतान्नः ॥ ११ ॥

सञ्चालयन्ती सकलस्य देहं व्यानस्य शक्त्या परितो लसन्त्या ।
जेतुः प्रतापेऽस्ति पलायनेऽस्ति भीतस्य चेयं निखिलेशशक्तिः ॥ १२ ॥

एकं स्वरूपं बहुचित्रयोगात् सन्दर्शयन्ती विविधं जनेभ्यः ।
सम्यग्दृशे स्वं विभुमर्पयन्ती सर्वादिमायैव महेशजाया ॥ १३ ॥

यस्संश्रयेताखिलसङ्गतिस्त्वां ध्यानेन मन्त्रेण गुणस्तवैर्वा ।
त्रैलोक्यसाम्राज्यधुरन्धरस्य शुद्धान्तकान्ते स कृती मनुष्यः ॥ १४ ॥

मूलाग्निमुद्दीप्य शिरश्शशाङ्कं सन्द्राव्य यस्तर्पयते कृती त्वाम् ।
तस्मिन्नगाधीश्वरकन्यके त्वं प्रादुर्भवन्ती न किमादधासि ॥ १५ ॥

यस्त्वां सहस्रारसरोजमध्ये सोमस्वरूपां भजतेऽम्ब योगी ।
तस्यान्तरः शान्तिमुपैति तापो बाह्यस्य का नाम कथाऽल्पकस्य ॥ १६ ॥

दण्डेन योऽन्तर्दहरेऽवतीर्णः प्राणेन वाचा महसा धिया वा ।
प्राप्नोति सोऽयं पुरमद्वितीयं यत्र त्वमीशा सह चित्रलीला ॥ १७ ॥

तन्त्रोदितं विश्वविनेत्रि मन्त्रं यस्ते नरः संयमवानुपास्ते ।
रुद्राणि सान्द्राम्बुदकेशपाशे पाशैर्विमुक्तः स जयत्यशेषम् ॥ १८ ॥

पद्मासनो द्वादशवर्णशान्ती दम्भोलिपाणिर्भुवनाधिनाथा ।
गीर्वाणमार्गो भृगुरब्जयोनिरन्ते तथाग्रे च हलां विराजी ॥ १९ ॥

जम्भस्य हन्ताऽनलशान्तिचन्द्रैः संयुक्त ऊष्मा गलदेशजन्मा ।
दन्तस्थलीसम्भव ऊष्मवर्णो वाणीपतिर्वज्रधरश्च लज्जा ॥ २० ॥

विद्या त्वियं पञ्चदशाक्षराढ्या साक्षान्महामौनगुरूपदिष्टा ।
गोप्यासु गोप्या सुकृतैरवाप्या श्रेष्ठा विनुत्या परमेष्ठिनाऽपि ॥ २१ ॥

देहेष्वियं कुण्डलिनी त्यगादि भूतेषु विद्युद् भुवनेषु चाभ्रम् ।
देवाङ्गनामस्तकलालिताङ्घ्रिर्देवी भवानी खलु देवतासु ॥ २२ ॥

चक्षुर्विधायाचलमन्तरेण प्राणं प्रपश्यन् मनुवर्णरूपम् ।
संसेवते चेत्सकलस्य धात्रीं सर्वेष्टलाभो विदुषः करस्थः ॥ २३ ॥

एकाक्षरीः पञ्चदशाक्षरीं वा विद्याः प्रकृष्टाः सकलेशशक्तेः ।
यो भक्तियुक्तः प्रजपेदमुष्य प्राणो वशे तिस्तुलसिद्धियोनिः ॥ २४ ॥

एताः कवीनां पदकिङ्करस्य पूताः प्रमोदं परमावहन्तु ।
गीतास्सभक्तिद्रवमिन्द्रवक्त्राः श्वेताचलाधीश्वरवल्लभायाः ॥ २५ ॥

चत्वारिंशः स्तवकः

शमयतु पापं दमयतु दुःखं हरतु विमोहं स्फुटयतु बोधम् ।
प्रथयतु शक्तिं मन्दं हसितं मनसिजशासनकुलसुदृशो नः ॥ १ ॥

आर्द्रा दयया पूर्णा शक्त्या दृष्टिवशंवदविष्टपराजा ।
अखिलपुरन्ध्रीपूज्या नारी मम निश्शेषां विपदं हरतु ॥ २ ॥

शुद्धब्रह्मणि मादो दैवं तत्र सिसृक्षति कामो दैवम् ।
सृजति पदार्थान्दृष्टिर्दैवम् तान्बिभ्राणं महिमा दैवम् ॥ ३ ॥

विकृतौ विकृतौ प्रकृतिर्दैवं विषये विषये सत्ता दैवम् ।
दृष्टौ दृष्टौ प्रमितिर्दैवं ध्याने ध्याने निष्ठा दैवम् ॥ ४ ॥

स्फूर्तौ स्फूर्तौ माया दैवं चलने चलने शक्तिर्दैवम् ।
तेजसि तेजसि चक्षुर्दैवं शब्दे शब्दे वाणी दैवम् ॥ ५ ॥

हृदये हृदये जीवर्दैवं शीर्षे शीर्षे ध्यायर्दैवम् ।
चक्षुषि चक्षुषि राजर्दैवं मूले मूले प्रतपर्दैवम् ॥ ६ ॥

अभितो गगने प्रसरद्दैवं पृथिवीलोके रोहद्दैवम् ।
दिनकरबिम्बे दीप्यद्दैवं सितकरबिम्बे सिञ्चद्दैवम् ॥ ७ ॥

श्रावंश्रावं वेद्यं दैवं नामंनामं राध्यं दैवम् ।
स्मारंस्मारं धार्यं दैवं वारंवारं स्तुत्यं दैवम् ॥ ८ ॥

श्रुतिषु वटूनां ग्राह्यं दैवं गृहिणामग्नौ तर्प्यं दैवम् ।
तपतां शीर्षे पुष्टं दैवं यतिनां हृदये शिष्टं दैवम् ॥ ९ ॥

नमता पुष्पैः पूज्यं दैवं कविना पद्याराध्यं दैवम् ।
मुनिना मनसा ध्येयं दैवं यतिना स्वात्मनि शोध्यं दैवम् ॥ १० ॥

स्तुवतां वाचो विदधद्दैवं स्मरतां चेतः स्फुटयद्दैवम् ।
जपतां शक्तिं प्रथयद्दैवं नमतां दुरितं दमयद्दैवम् ॥ ११ ॥

वाचो विनयद्वह्नौ दैवं प्राणान्विनयद्विद्युति दैवम् ।
कामान्विनयच्चन्द्रे दैवं बुद्धीर्विनयत्सूर्ये दैवम् ॥ १२ ॥

हृदये निवसद् गुह्यद्दैवं वस्तौ निवसद्विसृजद्दैवम् ।
कण्ठे निवसत्प्रवदद्दैवं कुक्षौ निवसत्प्रपचद्दैवम् ॥ १३ ॥

देहे निवसद्विचलद्दैवं पञ्चप्राणाकारं दैवम् ।
भागि समस्तस्यान्ने दैवं स्वाहाकारे तृप्यद्दैवम् ॥ १४ ॥

बिभ्रन्नारीवेषं दैवं शुभ्रदरस्मितविभ्राड् दैवम् ।
ऋभ्रमदापहचिकुरं दैवं विभ्रमवासस्थानं दैवम् ॥ १५ ॥

शीतज्योतिर्वदनं दैवं रुचिबिन्दूपमरदनं दैवम् ।
लावण्यामृतसदनं दैवं स्मररिपुलोचनमदनं दैवम् ॥ १६ ॥

लक्ष्मीवीचिमदलिकं दैवं प्रज्ञावीचिमदीक्षं दैवम् ।
तेजोवीचिमदधरं दैवं सम्मदवीचिमदास्यं दैवम् ॥ १७ ॥

करुणोल्लोलितनेत्रं दैवं श्रीकाराभश्रोत्रं दैवम् ।
कुसुमसुकोमलगात्रं दैवं कविवाग्वैभवपात्रं दैवम् ॥ १८ ॥

हिमवति शैले व्यक्तं दैवं सितगिरिशिखरे क्रीडद्दैवम् ।
तुम्बुरुनारदगीतं दैवं सुरमुनिसिद्धध्यातं दैवम् ॥ १९ ॥

क्वचिदपि रतिशतललितं दैवं क्वचिदपि सुतरां चण्डं दैवम् ।
भक्तमनोनुगवेषं दैवं योगिमनोनुगविभवं दैवम् ॥ २० ॥

चरिते मधुरं स्तुवतां दैवं चरणे मधुरं नमतां दैवम् ।
अधरे मधुरं शम्भोर्दैवं मम तु स्तन्ये मधुरं दैवम् ॥ २१ ॥

भुजभृतविष्टपभारं दैवं पदधृतसम्पत्सारं दैवम् ।
लालितनिर्जरवीरं दैवं रक्षितसात्त्विकधीरं दैवम् ॥ २२ ॥

चिच्छक्त्यात्मकमधितनु दैवं तटिदाकृत्यधिभूतं दैवम् ।
श्रुतिषु शिवेति प्रथितं दैवं जयति जगत्त्रयविनुतं दैवम् ॥ २३ ॥

रमणमहर्षेरन्तेवासी मध्यमपुत्रो नरसिंहस्य ।
वासिष्ठोऽयं मरुतां मातुर्गणपतिरङ्घ्रि शरणमुपैति ॥ २४ ॥

त्रिभुवनभर्तुः परमा शक्तिस्सकलसवित्री गौरी जयति ।
तन्नुतिरेषा गणपतिरचिता पादाकुलकप्रान्ता जयति ॥ २५ ॥

इति श्रीमहर्षिरमणभगवत्पादान्तेवासिना वासिष्ठेन नरसिंहसूनुना
गणपतिमुनिना प्रणीतमुमासहस्रं समाप्तम् ॥

मातृतत्त्वप्रकाशिका

सुबोधिन्याख्यया टीकया समलंकृता

प्रथमः पटलः

वृत्तं मदलेखा

वन्दे श्रीरमणर्षेराचार्यस्य पदाब्जम् ।
योमेऽदर्शयदीशं भान्तं ध्वान्तमतीत्य ॥ १ ॥

यः मे मह्यं ध्वान्तम् अतीत्य भान्तं (अविद्यामयं कोशत्रयमत्र तिमिरत्वेन रूप्यते) ईशम् अदर्शयत् अन्वभावयत् । न केवलमुपदेष्टा अपि त्वनुभावयिता चेति गुरोर्महिमोच्यते । तस्य आचार्यस्य श्रीरमणर्षेः पदाब्जं वन्दे ॥ १ ॥

व्याचख्यावरविन्दो यद्धीमानृषिरांग्ले-
गोप्यं विष्टपमातुस्तत्त्वं विश्वहितैषी ॥ २ ॥

तत्पद्यैरनवद्यैर्गैर्वाण्या वरवाण्या ।
तात्पर्यं परिगृह्णन्वासिष्ठो विवृणोतु ॥ ३ ॥

ऋषिः अलौकिकार्थदर्शी उन्मीलितविज्ञानचक्षुरित्यर्थः । एतेन ग्रन्थस्याविपर्यस्य ज्ञानमूलकत्वं प्रदर्शितं भवति । धीमान् अरविन्दः विश्वहितैषी सन् विष्टपमातुः गोप्यं यत्तत्त्वम् आंग्ले आंग्लभाषायां व्याचख्यौ ॥ २ ॥ तत् वासिष्ठः (एतदनुवादग्रन्थकृतो गोत्रकृतं नामेदम्) तात्पर्यं परिगृह्णन् न प्रतिपदपरिवर्तनद्वारेत्यर्थः । एतेन तात्पर्यस्याविरोधेन मूलादधिकं व्यूनं वोक्तमनुवादग्रन्थेऽस्मिन्बुधैः क्षन्तव्यमिति ध्वनितम् । गैर्वाण्या वरवाण्या श्रेष्ठसंस्कृतभाषया अनवद्यैः पद्यैः विवृणोति ॥ ३ ॥

योगीन्द्रांग्लवचोभ्यः पुष्पेभ्यो मधु नीत्वा ।
संगृह्णाति गणेशो गैर्वाणीपटलेषु ॥ ४ ॥

योगीन्द्रांग्लवचोभ्यः पुष्पेभ्य इति व्यस्तरूपकम् । योगीन्द्रोऽरविन्दः मधु नील गैर्वाणीपटलेषु गैर्वाण्याः पटलाः ग्रन्थपरिच्छेदा एव पटलाः क्षौद्रपटला इति

श्लिष्टरूपकम्। तेषु गणेशः संगृह्णाति। अत्र गणेशस्य मधुकरत्वं व्यङ्ग्यमिति यथा वाच्यार्थमेकदेशवर्ति रूपकं भवति। एतदनुवादग्रन्थकृतो गणपतेः पर्यायपदं गणेश इति। यद्यपि संज्ञापदानां पर्यायपदैर्व्यवहरणं न युक्तं तथापि तदर्थभूत-देवतात्मतेजोंशावेशानुभूतिमतो ग्रन्थकृतो नैतन्न संगच्छते ॥ ४ ॥

भव्यं दर्शनमेतन्नव्यं वित्तसखायः।
अद्राक्षीन्मुनिनाथो यच्छ्रीमानरविन्दः ॥ ५ ॥

मुनिनाथः श्रीमानरविन्दः यदद्राक्षीत् तदेतत् भव्यं मङ्गलं पुरुषार्थप्रदत्वात्पर्यालोचनकृतां नव्यं प्राचीनानां षण्णां पूरकं सप्तममिति भावः। दर्शनं वित्त जानीत हे सखायः। इदं च विषयसंबन्धमनुसृत्य शक्तिदर्शनं वैशेषिक-दर्शनवत्। द्रष्टृसंबन्धमनुसृत्यारविन्ददर्शनं कणाददर्शनवत् ॥ ५ ॥

पर्याप्तो मुखबन्धो ज्ञातुं ग्रन्थगुरुत्वम्।
एतावानथ सम्प्रत्यायामो विषयाय ॥ ६ ॥

ग्रन्थगुरुत्वं ज्ञातुम् एतावान् मुखबन्धः उपोद्घातः पर्याप्तः। अथ सम्प्रति विषयाय अनुवदिष्यमाणग्रन्थविषयाय आयामः आगच्छामः ॥ ६ ॥

इत्यनुवादग्रन्थकृत उपोद्घातः

चतुर्व्यूहप्रस्तावः

मातुः शक्तिविशेषाश्चत्वारो महनीयाः।
दिव्यव्यक्तिविशेषाश्चत्वारो गणनीयाः ॥ ७ ॥

मातुः महनीयाः प्राधान्येन प्रविभागोऽयं न साकल्येनेति सूचयितुं तदिदं विशेषणम्। चत्वारः शक्तिविशेषाः गणनीयाः गणयितुं योग्याः प्रामुख्येन स्थिता इत्यर्थः। चत्वारो दिव्यव्यक्तिविशेषाः,, (भवन्ति) अत्र मातुः शक्तीरनूद्य दिव्यव्यक्तित्वं विधीयते,, विश्वव्यापारकारिण्यो महत्यः शक्तयो नान्धाः अपितु दिव्यव्यक्तित्वविशिष्टा इति भावः। व्यक्तित्वं च ज्ञानवत्त्वम् "एतेन मूलशक्तेश्च व्यक्तित्वविशिष्टता ध्वनिता भवति "अङ्गिन्यचेतने कथमङ्गान्यचेतनानि भवेयुः,, तस्मात्तस्यां प्रयुक्तं मातृपदं न केवलं सर्वसर्गप्रकृतित्वद्योतकम् अपितु सर्वेषु भूतेष्वपत्यवात्सल्यवत्त्वव्यञ्जकं च भवतीत्यवगन्तव्यम् ॥ ७ ॥

ये देव्याः सुमहान्तश्चत्वारस्तनुबन्धाः ।
उच्यन्ते च महद्भिश्चत्वारोंशविशेषाः ॥ ८ ॥

ये दिव्यव्यक्तिविशेषाः देव्याः' दिव्यत्वविशिष्टायाः मातुः सुमहान्तः विभवः विभुत्वं च सर्वत्र गतिमत्सामर्थ्यम् अस्मदादिशरीरबन्धापेक्षया वैलक्षण्यं द्योतयितुमिदं विशेषणम्। चत्वारः तनुबन्धाः ये देव्यास्तनुबन्धास्त एव दिव्यव्यक्तिविशेषा इति सामानाधिकरण्यमेवात्र विवक्षितम्। देवीमूर्तीनां विज्ञानमयत्वात्ता एव स्वतो ज्ञानवत्यो भवन्तीति सङ्गतिः ॥ किंच ये देव्याः चत्वारोंशविशेषाः महद्भिरुच्यन्ते ॥ उच्यन्ते महद्भिरित्यनेनास्मिन्विषये प्राचीनर्षिसम्मतिं च स्मारयत्यनुवादकारः ॥ "मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा । श्रीः कैटभारिहृदयैककृताधिवासा गौरि त्वमेव शशिमौलिकृतप्रतिष्ठा ॥" इति दुर्गासप्तशत्यां शक्रादिस्तुतौ भगवत्याश्चत्वारोंशा एव हि प्राधान्येन परिकीर्तिताः ॥ ८ ॥

यैरेषाऽखिलभर्तुर्योषा दुर्विदवेषा ।
सर्वेषु प्रसरन्ती स्वीयप्राणिगणेषु ॥ ९ ॥

यैर्द्वारा अखिलभर्तुरीश्वरस्य योषा जाया एषा श्रीमाता शक्तीश्वरयोर्दाम्पत्यं नैसर्गिकं नास्मदादिवत्कृत्रिममित्यवगन्तव्यम्। दुर्विदवेषा सती प्रत्यक्षं सर्वत्र चरन्त्यपि लोकैरविज्ञातेत्यर्थः । सर्वेषु स्वीयप्राणिगणेषु प्रसरन्ती स्वीयत्वं च प्राणिगणानां स्वपरिणामत्वाद्द्वैतिपक्षानुसारेण । सर्वं जगद्ब्रह्मणो विवर्तं मायायाश्च परिणामं वदन्ति ह्यद्वैतिनः। माया चादिशक्तेर्नातिरिच्यते । स्यान्नाम तन्निरूपणप्रकारो भिन्नः परीक्षकाणाम् । अयमेव पक्षो भगवतोऽरविन्दमुनेरभिप्रेत इति विज्ञायते । यदयं सैवाखिलमित्युत्तरत्र वक्ष्यति ॥ ९ ॥

विश्वस्मिन्निजसर्गान्मार्गे चालयमाना ।
सङ्गत्याहितकार्यान्कुर्वाणाविरोधम् ॥ १० ॥

विश्वस्मिन् निजसर्गान् सृष्टाः पदार्था एवात्र सर्गशब्देनोच्यन्ते मार्गे चालयमाना विनयन्तीत्यर्थः । वि विरोधं संगत्या हितकार्यान् सामरस्येन कार्यकारिणः कुर्वाणा समरसीकुर्वाणेति समुदायार्थः ॥ १० ॥

प्राज्ञश्लाघ्यमजस्रं स्वीयं शक्तिसहस्रम् ।
तत्तच्छक्त्यनुरूप- व्यापारेष्वनुशास्ति ॥ ११ ॥

स्वीयं स्वांशभूतं चतसृणामिवान्यासां च शक्तीनां देव्यंशभूतत्वात् प्राज्ञश्लाघ्यं शक्तिसहस्रम् अजस्रं सदा तत्तच्छक्त्यनुरूपव्यापारेषु अनुशास्तीति यच्छब्दवाक्यपरिसमाप्तिः ॥ ११ ॥

सैका यद्यपि माता भिन्नैरेव तथापि ।
अंशैर्दर्शयतीयं स्वात्मानं पुरतो नः ॥ १२ ॥

यद्यपि सा माता एका समष्टिदृष्ट्याम् । तथापि नः पुरतः भिन्नैरेवांशैः व्यष्टिदृष्ट्यामस्माकं परिचितायाम् इयं स्वात्मानं दर्शयति ॥ १२ ॥

कः संख्यातुजनन्याः शक्तिव्यक्तिविभूतिः ।
संभूतीरपि विश्वव्यापारं विदधानाः ॥ १३ ॥

जनन्याः विश्वव्यापारं विदधानाः शक्तिव्यक्तिविभूतीः । संभूतीरपि प्रादुर्भावानपि अवतारानिति यावत् कः संख्यातु । न कोपि संख्यातुं शक्त इत्यर्थः । एकैकस्मिन्नंशे वस्तुतो विभक्तुमशक्यानामपि शक्तिव्यक्तिविभूतीनां गुणतो विभक्तुं शक्यत्वात्पार्थक्येन निर्देशः ॥ १३ ॥

यां मातेति भजामः सा चित्काचिदपारा ।
एतेषां भुवनानां सर्वेषां च धरित्री ॥ १४ ॥

यां मातेति वयं भजामः साधकेभ्यो मातृस्वरूपमुपदेष्टुम् ईदृश आरम्भः सा काचिदपारा चिदचिच्छक्तिरूपा चिदेव विशेष्यते सर्वेषां चैतेषां भुवनानां धरित्रीति ॥ १४ ॥

हन्तैकाप्यमितांशा नालं यामनुगन्तुम् ।
तीव्रारुद्धविशालाप्यस्माकं मतिरेषा ॥ १५ ॥

ईदृशी चिद्रूपा माता एकापि अमितांशा । अमितांशत्वमेव वर्णयत्युत्तरया त्रिपाद्या । यामनुगन्तुं तीव्रा च अरुद्धा च विशाला च तीव्रारुद्धविशाला अस्माकमेषा मतिः नालं न प्रभवति । एतावदंशा मातेति विज्ञातुं न शक्नोतीत्यर्थः । यैः स्वीयं शक्तिसहस्रम् अनुशास्तीति प्रागुपन्यस्तत्वाच्छ्रीमातुर्विनेतारोऽशाश्चत्वारो न्येतद्विनेया इत्यवगन्तव्यम् । अत एव चतुर्व्यूहनाम श्रीमातुः शक्तिगणस्य युक्तं भवति । विनेतृशक्तिनाम्ना तत्तद्व्यूहो व्यवहार्यः । महेश्वरीव्यूहो महाकालीव्यूहो महालक्ष्मीव्यूहो महासरस्वतीव्यूह इति ॥ १५ ॥

मातृस्वरूपस्थानकथनम्

श्रीमाता परमस्य प्रज्ञाशक्तिरपीयम् ।
स्वीयायाः सकलायाः सृष्टेर्भाति परस्तात् ॥ १६ ॥

इयं श्रीमाता परमस्य परमात्मनः प्रज्ञाशक्तिरपि भवति । मातुः स्वरूपलक्षणमिदम् । ननु प्रज्ञाशक्तिश्च किंभिन्ने उताहो अभिन्ने । यदि भिन्ने मातुः

स्वरूपद्वितयं प्रसज्येत । यद्यभिन्ने लक्षणेऽन्यतरस्य वैयर्थ्यम् । नैष दोषः । वस्तुतः प्रज्ञाशक्त्योरभेदेपि कार्यभेदाद्भेदेन निर्देशस्योपपत्तेः । स्वयं प्रजानन्त्येव सा परमस्य प्रज्ञा भवति । स्वयं शक्नुवन्त्येव सा परमस्य शक्तिर्भवति । अन्यथा तस्याः पार्थक्येन व्यक्तित्वविशिष्टता न सिध्येत् । ईदृशी माता स्वीया याः सकलायाः सृष्टेः परस्तात् त्रिपादस्यामृतं दिवीति निगमप्रसिद्धायां दिवीत्यर्थः । भाति प्रकाशते ॥ १६ ॥

मातुर्ग्राह्यत्वकथनम्

एवं सातिदविष्ठाप्यस्माकं धिषणायाः ।
ख्यातैर्मूर्तिविशेषैर्भास्वत्पावनवेषैः ॥ १७ ॥

सा माता एवमस्माकं धिषणाया अतिदविष्ठापि भास्वत्पावनवेषैः ख्यातैः शास्त्रप्रसिद्धैः मूर्तिविशेषैः महेश्वर्यादिमूर्तिविशेषैरित्यर्थः ॥ १७ ॥

किञ्चास्मिन्नरलोके तत्त्वं दर्शयितुं स्वम् ।
स्वाङ्गीकारमितानां दिव्यप्राभवभाजाम् ॥ १८ ॥

किंच अस्मिन्नरलोके स्वं तत्त्वं दर्शयितुं स्वाङ्गीकारमितानाम् अवतरणपात्रभूतत्वेन निर्धारितानामित्यर्थः । अनन्तरं स्वावतरणाद्दिव्यप्राभवमाज़ामिति सङ्गतिः ॥ १८ ॥

रूपाणामनघानां व्याप्याभ्यां सुविदाभ्याम् ।
सत्कर्मप्रकृतिभ्यां किञ्चिद्ग्राह्यगतिः स्यात् ॥ १९ ॥

अनघानां रूपाणां व्याप्याभ्यां परिच्छिन्नाभ्यां सुविदाभ्यां सुष्ठु वेत्तुं शक्याभ्यां सत्कर्मप्रकृतिभ्यां सदितिकर्मप्रकृत्योरुभयोश्च विशेषणं ग्राह्यगतिः ग्राह्यप्रकारा स्यात् । मातुर्नित्यविभूतयो महेश्वर्यादयः तत्तेजोंशाविष्टा अवतारास्तु नैमित्तिकविभूतयो भवन्ति । तदुभयद्वारा मातुर्दविष्ठाया अपि ग्राह्यत्वमिति तात्पर्यम् ॥ १९ ॥

मातुस्त्रिविधत्वम्

विश्वातीतमथाधिब्रह्माण्डं रममाणम् ।
शारीरं च परस्यास्त्रेधारूपमुष्याः ॥ २० ॥

विश्वातीतं सर्वदृश्यप्रपञ्चातीतं त्रिपाद्विभूतिस्थाने दिवि विराजमानम् आधिदैविकमिति यावत् । अधिब्रह्माण्डं रममाणम् आधिभौतिकमित्यर्थः । विश्वस्य भूतेभ्योऽव्यतिरेकात् । अत एव "पादोऽस्य विश्वा भूतानीति" निगमः संगच्छते । शारीरं जीवमयम् आध्यात्मिकमिति भावः । इति त्रेधारूपमुष्याः परस्याः ॥२०॥

विश्वस्तान्यनयाचैक्यं स्यादनुभूतम् ।
चिच्छक्त्या भुवनानां जीवानां च धरित्र्या ॥ २१ ॥

भुवनानां जीवानां च धरित्र्या अनया चिच्छक्त्या ऐक्यम् अनुभूतं स्याच्चेत् तानि त्रीणि रूपाणि वयं विद्मः । स्वात्मशक्तेः श्रीमातृरूपत्वादैक्यानुभवः साध्यः स्यात् ॥ २१ ॥

विश्वातीतशक्तिः

राजन्त्यस्य परस्तात्संधत्ते परशक्तिः ।
नित्या व्यक्तरहस्ये नेशस्याखिलसर्गम् ॥ २२ ॥

अस्य जगतः परस्ताद्राजन्ती विश्वातीतेत्यर्थः । परा च सा शक्तिश्च परशक्तिः ईशस्य नित्यमव्यक्तं च यद्रहस्यं तेन अखिलसर्गं संधत्ते ॥ २२ ॥

अधिलोकशक्तिः

शक्तिर्भान्त्यधिलोकं सर्वं वस्तु सृजन्ती ।
बिभ्राणा पुनरन्तस्तस्यानु प्रविशन्ती ॥ २३ ॥

अधिलोकं भान्ती शक्तिः सर्वं वस्तु सृजन्ती बिभ्राणा पुनस्तस्य वस्तुनः अन्तः प्रविशन्ती ॥ २३ ॥

सम्यक्चालयतीशा व्यापारं दधतीनाम् ।
शक्तीनां सरणीनामप्यम्बा नियुतानि ॥ २४ ॥

व्यापारं दधतीनां शक्तीनां सरणीनां पद्धतीनामपि नियुतानि सम्यक् चालयति प्रवर्तयति । ईशेत्यम्बेति च शक्तेर्विशेषणे ॥ २४ ॥

जीवमयी शक्तिः

सामर्थ्यस्य महत्योः शक्त्योरस्य युगस्य ।
मूर्तिः कापि भवन्ती शक्तिर्जीवमयीयम् ॥ २५ ॥

अस्य महत्योः शक्त्योर्युगस्य प्रागुक्तरूपद्वयस्येति भावः । सामर्थ्यस्य कापि मूर्तिर्भवन्ती इयं जीवमयी शक्तिः ॥ २५ ॥

अस्माकं द्वितयं तन्नेदिष्ठं विदधाना ।
दिव्यत्वस्य च मर्त्यव्यक्तेर्मध्यगतास्ते ॥ २६ ॥

तद्विषयं प्रागुक्तमाधिदैविकाधिभौतिकशक्तिद्वयम्। अस्माकं नेदिष्ठं विदधाना साक्षात्कारयोग्यं कुर्वाणेत्यर्थः। दिव्यत्वस्य देवभावस्य मर्त्यव्यक्तेः अशुद्धाहंकार-मध्याश्च मध्यगता आस्ते। 'य एतां वेद' तस्यैव विश्वातीता विश्वाधिष्ठात्री च महाशक्ती नेदिष्ठे स्यातामित्यवगन्तव्यम्॥ २६॥

मातुः कार्याणि

विश्वस्यास्य परस्ताद्भान्तीसादिममाता।
नित्ये ब्रह्मपरं स्वप्रज्ञाने निदधाति॥ २७॥

अस्य विश्वस्य परस्ताद्भान्ती सा आदिममाता विश्वातीतेति प्रागुक्ता परं ब्रह्म नित्ये स्वप्रज्ञाने निदधाति॥ २७॥

सैका वासधरित्री सीमातीतबलस्य।
सान्निध्यस्य च सूरि व्याख्या नान्यतिभातः॥ २८॥

सीमातीतबलस्य अपरिमेयवीर्यस्य सूरिव्याख्यानानि अतिभातः अतिक्रम्य विराजमानस्य वर्णयितुमशक्यस्येति यावत्। सान्निध्यस्य समन्तादपरिहार्य आवृण्वंश्च सन्निकर्षः सान्निध्यमित्युच्यते तस्य च सैकावास धरित्री वासभूमिः॥२८॥

सा बिभ्रत्यजराभिव्यक्त्यर्हाणि ऋतानि।
आहोस्वित्प्रथयन्ती संलीना निरहस्ये॥ २९॥

अजरा सा माता अभिव्यक्त्यर्हाणि अभिव्यक्तियोग्यानि रहस्ये संलीनानि असत्कार्यनिरासार्थमियमुक्तिः ऋतानि सत्यरूपाणि बिभ्रती काले प्रकटयितुम् आहोस्वित् प्रथयन्ती प्रकटयन्ती अभिव्यञ्जयन्तीतियावत्। व्यवस्थितविकल्पोऽयम्। कानिचिदभिव्यञ्जयितुमात्मनि बिभ्रती कानिचिदभिव्यञ्जयन्तीति॥ २९॥

शक्त्यात्यन्तमनन्तप्राणैषा खलु तानि।
स्वात्माखण्डविराजच्चित्तेजस्यवतार्य॥ ३०॥

अत्यन्तं शक्ता अनन्तप्राणा एषा माता तानि खलु तान्येव सत्यरूपाणि स्वात्माखण्डमहाचित्तेजसि औचित्याद्विश्वांशव्याप्ते अवतार्य॥ ३०॥

तेभ्यो यच्छति लोके शक्तित्वं च शरीरम्।
येषामत्र विकासाः कुर्युर्नूत्नयुगानि॥ ३१॥

लोके तेभ्यः शक्तित्वं शरीरं च यच्छति ददाति। शरीरमत्र विज्ञानज्योतिर्मयं प्रकरणात्। येषां सत्यरूपाणां विकासाः अभिव्यक्तयः अत्र नूत्नयुगानि कुर्युः॥३१॥

अस्यां वस्तु परं तत्स्पष्टीभूय विभाति ।
सच्चित्सम्मदरूपेणाच्छन्नेन सदापि ॥ ३२ ॥

अस्यां श्रीमातरि तत्परं वस्तु सदाप्यच्छन्नेन नित्यमनावरणेन सच्चित्सम्मद-रूपेण सच्चिदानन्दरूपेण स्पष्टीभूय विभाति ॥ ३२ ॥

पञ्च गीतयः

ईश्वरशक्तिद्वैताद्वैतज्ञानात्मनातयाव्यक्तम् ।
तत्सत्पुरुषप्रकृतिद्वैतनिसर्गात्मना च भुवनेषु ॥ ३३ ॥

तत् प्रागुक्तं सत्परं वस्तु तया मात्रा द्वारा ईश्वरशक्तिद्वैताद्वैतज्ञानात्मना पुरुषप्रकृतिद्वैतनिसर्गात्मना च व्यक्तम् । ईश्वरशक्तिद्वैतज्ञानं तयोः पार्थक्येन व्यक्तिमत्त्वात् । अद्वैतज्ञानं तयोः स्वरूपेणाभेदात् चिदेव ह्यभयोः स्वरूपम् । धर्मिभूताचिटीश्वरः धर्मभूता शक्तिरिति । पुरुषप्रकृतिद्वैतनिसर्गस्तु चेतन-जडविभागमूलकः ॥ ३३ ॥

इति श्रीवासिष्ठगणपतिमुनिकृतं श्रीअरविन्दमहर्षिसिद्धान्तदर्शनम् ।

अथ जैमिनीयतर्कवार्तिकम्

१—अग्नये ज्योतिषे नम इंद्राय ज्योतिषे नमः सूर्याय ज्योतिषे नमः ।

२—अथातो जैमिनीये तंत्रे तर्कपादं व्याख्यास्यामः ।

३—तत्रादौ तंत्रारंभाधिकरणम् ।

सू०—अथातो धर्मजिज्ञासा ।

पू० ४—स्वाध्यायाध्ययनादनंतरमधीतः स्वाध्यायोऽनर्थको माभूदिति हेतोर्गुरुकुलादसमावृत्तेन धर्मविचारः कर्तव्य इत्येकेषां व्याख्यानम् ।

५—पूर्ववृत्तस्वाध्यायाध्ययनमथशब्देनाक्षिप्तं स्यात् ।

६—तदात्मना हेत्वर्थे समन्वित भवेत् ।

७—अध्ययनादनंतरं धर्मविचारस्य सिद्धत्वात्तत्समाप्तिपर्यंतं गुरुकुलादसमावर्तनं सिद्धं स्यात् ।

८—अध्ययनविधेरेव धर्मविचारस्य तदानंतर्यसिद्धिः ।

९—धर्मविचारमंतराध्ययनस्य निष्फलत्वापत्तेः ।

१०—तस्यादृष्टार्थत्वान्नेति चेद्दृष्टे प्रयोजनेनादृष्टकल्पनं न्याय्यम् ।

११—तच्च दृष्टं प्रयोजनमर्थग्रहणम् ।

१२—वेदार्थश्च धर्मान्नातिरिच्यते ।

१३—स च विचारं विना यथावन्न गृहीतो भवेत् ।

ख० १४—नैवं तु स्याद्विचारमंतरा विज्ञातुर्गुरोर्यथावदर्थग्रहणस्य संभवात् ।

१५—न च धर्ममात्रं वेदार्थो ब्रह्म तद्विभूतीनां च यदर्थत्वात् ।

१६—धर्ममात्रं वेदार्थ इति पूर्वतंत्रसिद्धांत इति चेन्नायं जैमिनीयो नय उत्तरतंत्रे तत्र तत्र प्रदर्शितस्य तन्मतस्यानेवंविधत्वात् ।

१७—न च न्याय्यः क्रियाविधिवद्वस्तुविधानामपि पर्यवसन्न-वाक्यार्थत्वात् ।

१८—स्वाध्यायाध्ययनविधेर्मंत्रमात्रविश्रांतत्वान्मंत्राणां च प्रायो ब्रह्म तद्विभूत्यनंतरपरत्वाच्च नूतेनविचारपूर्वकधर्मग्रहणाक्षेप इत्यपि वक्तुं शक्यम् ।

१९—अर्थज्ञानं च स्वाध्यायस्य प्रयोजनं नाध्ययनरूपसंस्कारस्य ।

२०—अध्ययनप्रयोजनं तु संस्कृतद्रव्याणामिव संस्कृतमंत्राणां कर्मसु विनियोगार्हत्वम् ।

२१—योग्यत्वं च जपपारायणयोः ।

२२—मन्यंते हि गुरुमुखाद्गृहीतानामेव मंत्राणां जपादि-योग्यत्वं शिष्टाः ।

२३—अर्थज्ञानस्य दृष्टफलात्मकत्वान्नासंस्कृतस्वाध्यायस्य तद्भवतीति वक्तुमशक्यम् ।

२४—संसनादौ शब्दार्थोभयप्राधान्यं स्वविधिभिरेव सिद्धये गुणादि-स्मरणं विना शंसनाद्यसिद्धेः ।

२५—एतेनाध्ययनविधिः स्वाध्यायाध्ययनधर्मविचारयोः पौर्वापर्य-मनुगृह्णातीति वादो निःसार इत्युक्तं भवति ।

२६—नन्वेवमपि विधिग्राह्यविषयस्य स्वाध्यायस्य च फलवत्त्वाय कुतो न स्वाध्यायाध्ययनधर्मविचारयोः पौर्वापर्यं कल्पनीयमिति चेत्तस्मिन्कल्पितेपि न त्वभिमतसिद्धिः ।

२७—ततो हि लेशत एव धर्मज्ञानावकाशः प्रायो ब्रह्म तद्विभूत्य-न्यतरपरत्वात्स्वाध्यायस्य ।

२८—ब्राह्मणानां संग्राह्यत्वपक्षे वा तादृश्येव दुरवस्था ।

२९—यतः सर्ववेदशाखामंत्रब्राह्मणापेक्षी धर्मविचारः स्वाध्यायाध्ययन-विधिस्तु शाखाध्ययनमात्रेण तुष्येत् ।

३०—ऋषि च यावदक्षरग्रहणानंतरमेव तदर्थग्रहणमिति वैधस्य युक्तिसिद्धस्य वा नियमस्याभावान्न स्वाध्यायाध्ययनधर्मविचारयोः पौर्वापर्यसिद्धिः ।

३१—तत्तद्वाक्याक्षरग्रहणानंतरमपि तत्तद्वाक्यार्थग्रहणे दोषाभावात् ।

३२—उक्तं प्रागेव विचारादर्थग्रहणमन्यदिति ।

३३—वस्तुतस्तु स्वाध्यायाध्ययनविधिर्ब्रह्मयज्ञपरो नाक्षरग्रहणपरः ।

३४—तथाह्युपक्रमोपसंहारौ ।

३५—अथ यत्र संभवस्तत्र सामान्यतो वेदाध्ययनादनंतरं धर्मविचारं कार्यमाचार्य उपदिशतीति चेन्न प्रकरणविरोधात् ।

३६—कस्मादनंतरं धर्मजिज्ञासा कर्तव्येति प्रश्न एव हि भवत्या-नंतर्यमर्थश्चेत् ।

३७—न वेदाध्ययनादनंतरं किं कर्तव्यमिति ।

३८—पूर्ववृत्तस्यैवाध्याहार्यत्वात् ।

३९—उद्दिष्टश्च प्रकृतत्वेन धर्मविचारो न वेदाध्ययनानंतर-कर्तव्यविशेषः ।

४०—तस्माद्यदि धर्मविचारान्नियमेन पूर्वभाव्यमस्ति तस्यैवाक्षेपो न नियतस्य ।

४१—स्वार्थान्यथानुपपत्या यत्किञ्चित्पूर्ववृत्तमुचितमाक्षिपेदिति चेदथ-शब्दस्याधिकारार्थेपि वृत्तेस्तत्संगतेश्च न स्वार्थान्यथानुपपत्तिः ।

४२—एकदेशार्थं च सूत्रमापद्येतानधीतवेदस्यावारितत्वेन तस्यापि धर्मविचाराधिकारितया स्थितत्वात् ।

४३—तस्मान्नास्ति सौत्रस्याथशब्दस्यानंतर्यार्थकत्वम् ।

सि० ४४—अधिक्रियतेऽत्र धर्मविचार इति व्याख्यातव्यमृजुना पथा ।

४५—इदमाबुद्धिस्थग्रंथनिर्देशः ।

४६—तसिलःसप्तम्यर्थत्वं सार्वविभक्तिकत्वात् ।

४७—ज्ञातुमिच्छया फलपर्यंतया विचारो लक्ष्यते यथा परेषां नये ।

इति प्रथममधिकरणम् ॥ ४७ ॥

१—अथधर्मलक्षणाधिकरणम् ।

२. सू०—चोदनालक्षणोऽर्थो धर्मः ।

२—वेदप्रमाणकः प्रयोजनवान्धर्म इत्येकं व्याख्यानम् ।

३—अत्रार्थस्यार्थवतिलक्षणा ।

४—इष्टसाधनत्वमर्थवत्त्वम् ।

५—अनर्थमिश्रेर्थवति बलतोऽन्यतरनिर्णयः ।

६—प्रवर्तकवैदिकवाक्यनिरूपितः पदार्थो धर्म इत्परं व्याख्यानम् ।

७—प्रवर्तकत्वं साक्षादन्यथा वा ।

८—अनयोः पक्षयोः शुभापूर्वहेतुषु द्रव्यगुणकर्मसु धर्मपदार्थ-विश्रांतिः ।

९—प्रवर्तकवैदिकवाक्यनिरूपितोऽर्थो धर्म इति परं व्याख्यानम् ।

१०—अत्रापि प्रवर्तकत्व साक्षादन्यथा वा ।

११—अर्थश्चेह प्रयोजनपर्यायः ।

१२—साधनस्य प्रयोजनत्वानुपपत्तिरिति चेत्धर्मस्यात्मसंस्काररूपत्व-मेव न तदुपकारकद्रव्यादिरूपत्वमिति तस्य प्रयोजनं चाविरुद्धम् ।

१३—अत एव धर्मं पुमर्थेषु गणयंति ।

१४—केवलसाधनस्य कथं पुमर्थत्वम् ।

१५—तावता कर्मशक्त्युपरतेर्न स्वर्गादिफलमिति चेन्न धर्मस्य तत्प्रयोजकत्वात् ।

१६—शुद्धस्यालेपस्यात्मनः कथं संस्कारोपपत्तिरिति चेन्मनःप्राणान्यतरसंस्कारस्य तस्मिन्नुपचारः ।

१७—प्राणः श्रेष्ठ इह ग्राह्यः ।

१८—वृत्तेन मनसः संस्कारः ।

१९—कर्मभिः प्राणस्य ।

२०—साक्षाद्विभूतद्वारावेश्वरोपासनेनोभयोः ।

२०—कर्मवृत्तयोरविशेष इति चेन्नाथ ते कर्मविचिकित्सा वृत्तविचिकित्सा वा स्यादिति भेदकश्रुतिलिंगात् ।

२२—विद्याकर्मणोरविशेष इति चेन्न तं विद्याकर्मणीसमन्वारंभं ते पूर्वप्रज्ञा चेति भेदकश्रुतिलिंगात् ।

२३—उपासनपर्याय एवात्र विद्याशब्दो न प्रज्ञामात्रपर्यायः कर्मणा सह पाठात्पूर्वप्रज्ञायाः पृथगभिधानाच्च ।

२४—कर्मवृत्तोपासनानामन्यतमस्मिन्नपि धर्मत्वप्रत्ययस्तदारब्धत्वात्संस्कारस्य ।

२५—पुमर्थं प्रथमं धर्मपदेनैव व्यवहरंति प्राधान्यतो नादृष्टसंस्कारादिपदैर्जातुचिदिति तत्रैव धर्मपदस्य लाक्षणिकत्वमिति वक्तुमशक्यम् !

२६—प्रयोजनं प्रयोजनवानपि धर्मो धनवत् ।

२७—सौत्रेण विशेषणेन धनादिस्वर्गादिवारणम् ।

२८—विशेष्येण कर्मादेर्धर्मस्वरूपत्वस्य वारणम् ।

२९—व्यवहारेषु धर्मस्यारंभककर्मादित्रिकसामान्येन ।

३०—तत्र लक्षणा रूढिर्भवति ।

३१—सुचरितलक्षणस्य वृत्तस्य लोकतः सिद्धत्वेपि वेदेषु निर्वृत्तविधयस्ततो धर्मनिष्पत्त्यवबोधनार्थाः ।

३२—अन्यथा नास्तिकानां मत इव वृत्तस्य लोकसंतोषमात्रविभ्रंतत्वेन दृष्टफलत्वमेव प्रसज्येत ।

३३—अहिंसादेर्वृत्तत्वमपापमात्रत्वं च यथाप्रयोगम् ।

३४—भूतदयादिपरत्वे वृत्तत्वम् ।

३५—अपापमात्रमन्यदा ।

३६—धर्मलक्षणेनाधर्मलक्षणं व्याख्यातम् ।

३७—निवर्तकवाक्यनिरूपितोऽनर्थोऽधर्म इति ।

३८—भिद्येत वाक्यमिति चेन्न सूत्रेषु वाक्यभेददोषः ।

३९—अधर्मस्यांतरमालिन्यरूपत्वादनर्थत्वम् ।

४०—पूर्वयोः पक्षयोरपूर्वस्येवात्र संस्कारस्योभयविधस्यचोदना-बोध्यत्वम् ।

॥ इतिद्वितीयमधिकरणम् ॥ ८७ ॥

१—अथ निमित्तपरीक्षाधिकरणम् ।

३. सू०—तस्य निमित्तपराप्तिः ।

२—धर्मस्य निमित्तपरीक्षाक्रियत इति ।

॥ इति तृतीयमधिकरणम् ॥ ८९ ॥

१—अथ प्रत्यक्षाद्यनिमित्तत्वाधिकरणम् ।

४. सू०—सत्संप्रयोगेपुरुषस्येंद्रियाणां बुद्धिजन्म-तत्प्रत्यक्षमनिमित्तं विद्यमानोपलंभनत्वात् ।

२—द्रव्यगुणकर्मणां सन्निकर्षे पुरुषस्येंद्रियाणां बुद्धिजन्मतत्प्रत्यक्ष-प्रमाणं धर्मावबोधं प्रत्यनिमित्तं स्याद्विद्यमानोपलंभनत्वादिति ।

३—संनिकृष्टद्रव्यगुणकर्मणामेव प्रत्ययो विद्यमानशब्दात् ।

४—प्रत्यक्षनिराकरणात्तन्मूलकानां प्रमाणांतराणामपि निराकरणं भवति ।

५—प्रत्यक्षदृष्टानुवादस्यागमवाक्यस्यापि निराकरणं प्रसज्येतेति चेत्तदिष्टम् ।

६—अतींद्रियत्वात्धर्मो विलक्षणः ।

॥ इति चतुर्थमधिकरणम् ॥ ९५ ॥

१—अथ वेदप्रमामाण्याधिकरणम् ।

५. सू०—औत्पत्तिकस्तुशब्दस्यार्थेन संबंधस्य ज्ञान-मुपदेशोऽव्यतिरेकश्चार्थेनुपलब्धेतत्प्रमाणं बादरायणस्यानपेक्षत्वात् ।

१—शब्दस्यार्थेन संबंधः सहजस्तु भवति तस्य सहजार्थसंबंधस्य शब्दस्योपदेशो वेदापरपर्यायो ज्ञानं भवति तच्च ज्ञानविपर्य-स्तमिंद्रियागोचरेऽर्थे धर्मदेवतास्वर्गादौ तत्प्रत्यक्षाद्यनपेक्षदिव्य-ज्ञानत्वात्प्रमाणं भवति पूज्यस्य बादरायणस्याचार्यस्य मतेनेति ।

३—देवभाषाशब्दजातस्यैवात्र ग्रहणं प्रकरणादन्वयाच्च ।

४—तद्भाषाव्याकरणस्यैव हि स्मृतित्वम् ॥

५—भाषांतरेषु नानादित्वप्रत्ययः ॥

६—अतींन्द्रियस्य दिव्येन चक्षुषादृष्टस्य प्रकटनमुपदेशः ।

७—इंद्रियग्राह्येष्वपि दिव्यचक्षुषोगतेरप्रतिषेधस्तदनुवादानामुपदेशे ।

८—समष्टिकरणं दिव्यचक्षुरुच्यते ।

९—समष्टेः करणं व्यष्टेः स्यात्स्वंतपोबलाद्यथापरायत्नाद्योग-निद्रायां लोके ।

१०—मध्यमावैखर्योर्यस्य शब्दात्मकत्वं तस्यैव परापश्यंत्योर्ज्ञानात्वक-त्वमिति ज्ञानोपदेशयोस्तादात्म्येन सामानाधिकरण्योक्तिः ।

११—तानींद्रिदर्शिन उपदेष्टृनृषीनाहुः ।

१२—अविपर्यस्तज्ञानमयत्वात्तदुपदेशस्य वेदाख्या ।

१३—अपरतंत्रशब्दत्वाच्छब्दाख्या ।

॥ इति पंचममधिकरणम् ॥ १०८ ॥

१—अथशब्दनित्यत्वाधिकरणम् ।

२—सामान्यतो वर्णात्मकस्य ।

३—वर्णानां नित्यत्वेपि तत्कर्मार्थसंबंधस्य कृतिमत्वसंभवात्सुर-भाषाशब्दानां तन्निवारणाय पूर्वस्मिन्नधिकरणे शब्दार्थसंबंधस्यो-त्पत्तिकत्वमुक्तम् ।

४—वर्णानामनित्यत्वे सर्वशब्दार्थसंबंधस्य कृत्रिमत्वप्रसक्तेरिद-मधिकरणं तन्नित्यत्वसाधनाय ।

५—तत्रादौ षड्भिः सूत्रैः पूर्वः पक्षः ।

६. सू०—कर्मैके तत्रदर्शनात् ।

६—वर्णात्मकशब्दं कार्यमेके प्राहुरुच्चारणरूपकार्ये तस्य दर्शनादिति ।

७. सू०—अस्थानात् ।

७—अस्थितिपर्यायाद्विनाशात्कार्यस्वभावाच्चेति ।

८. सू०—करोतिशब्दात् ।

८—व्यवहारे शब्दकर्मकात्करोतिशब्दाच्चेति ।

९. सू०—सत्वांतरे च यौगपद्यात् ।

९—एकेनोच्चरितस्य शब्दस्यान्यस्मिन्नपि जने तत्काल एवोच्चारणतो दर्शनाच्चेति ।

१०—नित्यश्चेदेकः कथमनेकत्र युगपत् ।

१०. सू०–प्रकृतिविकृत्योश्च ।

११—प्रत्ययोत्तरधातुप्रातिपदिकान्यतरप्रकृतौ पदात्मकविकृतौ च दर्शनाच्चेति ।

१२—पदपाठात्मकप्रकृतौ संहितापाठात्मकविकृतौ च दर्शनाच्चेति वा।

१३—संस्कृतात्मकप्रकृतौ प्राकृताद्यात्मकविकृतौ दर्शनाच्चेति वा ।

१४—कार्यस्यैव हि विकारसंभवः ।

११. सू०–वृद्धिश्च कर्तृभूम्नास्य ।

१५—कर्तृबाहुल्यादस्य शब्दस्य वृद्धिश्चेति ।

१६—नित्यस्य वृद्धिर्हिनोपपद्यते ।

१७—अथ षड्भिः सूत्रैः परिहरति ॥

१२. सू०–समंततत्रदर्शनम ।

१८—पुरुषप्रयत्नमूलके कर्मणि दर्शनमभिव्यक्तिजननयोः समं तु स्यादिति ।

१९—तस्मादेतेन न शब्दजननं साध्येत हेतोरनैकांतिकत्वात् ।

२०—व्यंजनचालनादिकर्मणि पवनादिप्रादुर्भावोऽभिव्यक्तेरुदाहरणम् ।

१३. सू०–सतः परमदर्शनं विषयानागमात् ।

२१—इंद्रियसन्निकर्षानागमात्सत एवाननुभवः सोऽयं योऽनंतरः पूर्वपक्षहेतुरस्थानापरपर्यो विनाश इति ।

१४. सू०–प्रयोगस्य परम् ।

२२—करोतेः शब्दकर्मकत्वं प्रयोगस्य संबंधान्न कृतेः संबंधादिति ।

१५. सू०–आदित्यवद्योगपद्यम् ।

२३—आदित्यवच्छब्दस्य युगपदनेककर्तृकं दर्शनमिति ।

२४—विलोकनप्रयोगयोर्विलक्षणत्वाद्विषमो दृष्टांत इति चेत् ।

२५—न तयोः साम्यमुपदिष्टमस्माभिः ।

२६—अपितु विलोकनश्रवणयोः ।

२७—प्रयोक्ता च शृण्वन्नेवशब्दं प्रतिपद्यते न वाग्विंद्रियव्यापारमात्रात् ।

२८—अभिमुखीभाव आदित्यस्य दर्शनायैव वाग्विंद्रियव्यापारः शब्दस्य श्रवणाय निमित्तं स्यात् ।

२९—एकस्य दर्शनाय बहूनामभिमुखीभाव इवैकस्य श्रवणाय बहूनां वाग्विंद्रियव्यापारो नानुपपन्नः ।

३०—अभिमुखीभाववाग्विंद्रियव्यापारयोर्यत्नमूलकत्वसाधारण्येन साम्यम् ।

३१—प्रादुर्भावतिरोधानसाधारण्येनादित्यशब्दयोः ।

३२—अनयोऽपि शृणोतीत्यत्र स्वभावविशेषः ।

१६. सू०—वर्णांतरमविकारः ।

३३—न पदसंहिताप्राकृतादयो विकृतयोऽपि तु वर्णांतरभूता इति ।

१७. सू०—नादवृद्धिपरा ।

३४—कर्तृबाहुल्याद्यावृद्धिः सा नादवृद्धिरिति ।

३५—तेजोरूपे इवशब्दनादौ भिन्नौ स्याताम् ।

३६—शब्दस्य द्रव्यत्वापत्तिरिति चेत्तदिष्टम् ।

३७—गतिक्रियावत्त्वाच्च तस्य द्रव्यत्वसिद्धिः ।

३८—शब्दनादयोर्व्यवहारसंकरस्तेजोरूपयोरिव भाक्तः ।

३९—अंतरिक्षविद्युत इवाभिव्यक्तिसमकालिकं तिरोधानमस्य ।

४०—क्वचिदचिरस्थितिरपि निमित्तसातत्यात् ।

४१—अथषड्भिः सूत्रैः सिद्धांतः ।

१८. सू०—नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ।

४२—दर्शनस्यार्थप्रत्यायनार्थत्वाच्छब्दो नित्यस्तु स्यादिति ।

४३—दर्शनमत्रोच्चारणेनेंद्रियगोचरीभावः ।

४४—प्रयोक्ता हि तस्य नार्थसंबंधं करोति ।

४५—तत्पूर्वसंबंधश्च तत्कालजस्य न स्यात् ।

आ० ४६—ननु भास्तु पूर्वापरेषां गोशब्दानां व्यक्तिन ऐक्यं ते सजातित्वादेकार्थबोधकास्तस्मादयमहेतुः ।

४७—शब्दजातिभिरर्थस्य संबंधो न शब्दव्यक्तिभिः ।

४८—व्यक्ता जातिः समर्पिता स्यादर्थप्रत्यायनाय ।

४९—कर्मात्मसुचेष्टासु चैवमर्थप्रत्यायकत्वं दृश्यत इति चेत् ।

स० ५०—अक्षिव्यक्तितो गोचराणां शब्दानामस्तु रंगवल्लानात्वसजातित्वव्यवहारो यस्येते स एकः समुद्रवन्नित्यश्च ।

५१—एक एवानेकनादो निमित्तभेदादनेकवच्चोपाधिभेदादित्युक्तं भवति ।

५२—उपाधिसजातित्वमेव शब्दसजातित्वव्यवहारहेतुर्नशब्दो नानातस्य वस्तुत एकत्वात् ।

आ० ५३—ननु सिद्धं भवत्यजैमिनीयं तु स्यात् ।

५४—स हि बह्वीः शब्दव्यक्तीर्मन्यते नित्याः ।

५५—तासामेव परार्थत्वादिति चेत् ।

५६—नित्यशब्दस्येवतत्तद्रूपतया प्रादुर्भाव इति न जैमिनिविरोधः ।

आ० ५७—ननु प्रतिज्ञाविरोधं एवं तव स्यात् ।

५८—त्वया हि प्रतिज्ञातं वर्णात्मकः शब्दो नित्य इति ।

५९—वर्णश्चनाखंडः शब्द इति चेत् ।

स० ६०—न वर्ण व्यष्ट्योऽस्माभिरुद्दिष्टाः ।

६१—समष्टिवर्णपरैरेवास्माकं प्रतिज्ञा ।

६२—यत्याक्षराख्या प्रणवाख्या च वेदेषु प्रसिद्धे ।

६३—तत्र विभूतयोऽन्ये वर्णा प्रादुर्भावे निमित्तोपाधिसापेक्षाः ।

आ० ६४—स प्रणवश्चेत्पुनः परिच्छिन्नत्वमायातमितिचेत् ।

६५—मैवमोंकारस्य प्रणवानुकरणमात्रत्वात् ।

६६—अखंड एव वस्तुतः प्रणवः ।

६७—अनुकरणेनानुकार्यस्याभिधानं भाक्तं शास्त्रेषु ।

१९. सू०—सर्वत्र यौगपद्यात् ।

६८—कालत्रयवर्तिन्यर्थे युगपत्प्रवृत्तेश्चेति ।

६९—इदं पदानामाकृतिवाचकत्वात्सिध्येत् ।

७०—तदभिप्रेतं जैमिनेर्यथोत्तरत्र वक्ष्यति ।

२०. सू०—संख्याऽभावात् ।

७१—त्रिर्गोशब्द उच्चारितेऽत्र योगः शब्द इति संख्या प्रत्ययस्य शब्दविषयत्वेनाभावाच्चेति ।

७२—योऽस्ति स उच्चारणविषयः ।

७३—अस्ति व्यवहारः क्वचिदिति चेत्तत्रोक्तम् ।

२१. सू०—अनपेक्षत्वात् ।

७४—उच्चारणानपेक्षत्वादर्थप्रत्यायन इति ।

७५—स्मृतस्याप्यर्थबोधकत्वात् ।

७६—लिपौ भावितस्य च ।

२२. सू०—प्राख्याभावाच्च योगस्य ।

७७—र्थसंबंधस्य प्रसिद्धसद्भावाच्चेति ।

७८—अर्थमालोक्य यच्छब्दं स्मरति सा संबंधप्रसिद्धिः ।

२३. सू०—लिंगदर्शनाच्च ।

७९—वाचाविरूपनित्यतेति मांत्रवर्णिकस्य लिंगस्य दर्शनाच्चेति ।

८०—भूतार्थानुवादो लिंगमित्येकं व्याख्यानम् ।

८१—अन्यपरे वाक्येऽन्यपर एक देश इत्यन्यत् ।

८२—अभिधानसामर्थ्यमित्यपरम् ।

८३—त्रिविधं च लिंगं भवति ।

सि० चो० ८४—सर्वस्य शब्दस्य नित्यत्वं साध्यत इति चेल्लौकिकवैदिकयोर-विशेषः ।

८५—वैकस्येवेतिचेल्लौकिकस्य कार्यत्वात्तद्भिन्नत्वमापद्येत ।

८६—ततो वैदिकलौकिकयोरग्निशब्दयोरेकत्वप्रत्ययो न स्यात् ।

८७—तदभावेनैकार्थप्रत्यायनाभावः ।

८८—परार्थत्वानां हेतूनामुभयत्र तुल्यत्वादन्यतरस्य नित्यत्वमन्य-तरस्यानित्यत्वं चेत्यनुपपन्नम् ।

उ० ८९—तस्मादविशिष्टं प्रदर्शनम् ।

पू० ९०—ननु सर्वशब्दनित्यत्वसाधनमेकदेशिमतम् ।

९१—अंत्येन सिद्धांतो वैदकः शब्द एव नित्यो लिंगदर्शनादिति ।

९२—लौकिकस्य परिशेषात्तदनुवादत्वमतत्कालिकसादिशब्दत्वं वा यथा संभवमिति चेत् ।

ख० ९३—मैवं समुच्चयेन सूत्रस्य पूर्वगामित्वात् ।

९४—अध्याहारक्लेशात् ।

९५—उभयोः स्वभाववैलक्षण्याभावात् ।

९६—उभयत्र वर्णात्मकत्वस्य तुल्यत्वात् ।

९७—वर्णक्रमस्योभयत्र च तुल्यं प्रयोक्तृसापेक्षत्वात् ।

९८—उभयत्राभिव्यक्तेस्तुल्यत्वात् ।

९९—तिरोधानस्य च ।

१००—वैलक्षण्येन कथने प्रयोजनाभावाच्च ।

पू० उ० १०१—अस्ति नित्यत्वेन प्रामाण्यसिद्धिः प्रयोजनमिति चेत् ।

ख० १०२—नित्यत्वप्रमाणत्वयोरितरेतराश्रयः स्यात् ।

१०३—नित्यत्वायत्तं हि लिंगप्रामाण्यं लिंगप्रामाण्यत्वं हि नित्यत्वम् ।

पू० उ० १०४—प्रामाण्यप्रतिबंधकाभावायैव नित्यत्वमर्थप्रत्यायनादेव प्रामाण्य-मिति चेत् ।

ख० १०५—एवमपि नित्यत्वप्रतिबंधकाभावप्रमाणत्वानामितरेतराश्रयत्व-भ्रमणाच्चक्रकम् ।

१०६—लौकिकस्यापि प्रामाण्यं प्रसज्येत तत्कालिकमात्रेणापि प्रतिबंध-कस्य निवारणात् ।

सि० १०७—तस्मान्नास्ति विशेषो वैदिकलौकिकयोः ।

पू० १०८—ननु वैदिकलौकिकानि पदान्यविशिष्टानि भवंतु ।

१०९—वाक्यानि तु पूर्वाणि नित्यानि स्युरुत्तराणि तु पौरुषेयाणि ।

११०—वैदिकवाक्यानां नित्यत्वं च कर्त्रनुपलब्धेः ।

१११—रूपयतीतिरूपः कर्ता तद्विरूपापदं विकर्तृकापरम् ।

११२—विरूपनित्यमेति विशेषणोभयपदसमासः ।

११३—सूत्रं च न सामान्यतः शब्दनित्यत्वसाधनायैव ।

११४—अपितु वैदिकपदानुपूर्व्या अकृतकत्वसाधनाय च ।

११५—लिंगे विशेषणेनोत्तरेण पूर्वं साध्यते ।

११६—पूर्वेणोत्तरम् ।

११७—सूत्रेषु वाक्यभेददोषाभावादुभयोरर्थयोश्च प्रतीतिः ।

११८—शब्दस्यनित्यत्वेपि वैदिकेषु शब्देषु लौकिकवदानुपूर्व्याः कृतकत्वात्पुरुषबुद्धिदोषसंभवादप्रामाण्यशंकायामुत्तरेणार्थेन परिहारः संगत इति चेत् ।

ख० ११९—एवमप्यानुपूर्वीनित्यत्वप्रमाणत्वयोरितरेतराश्रयः ।

१२०—लिंगप्रामाण्यायत्तं ह्यानुपूर्वीनित्यत्वानुपूर्वी नित्यत्वायत्तं हि लिंगप्रामाण्यम् ।

१२१—अपि चर्षेरात्मनः संबुधिर्विरूपेति न वाचोविशेषणं विशेषणांतरसमस्तं तत् ।

१२२—तथापृथक्पदपाठात् ।

१२३—आंगिरसोविरूपस्तस्य मंत्रस्यर्षिः प्रसिद्धः ।

१२४—वसिष्ठनोधोवैयश्वादिवन्मंत्रद्रष्टुरात्मसंबोधे नोपपत्तिर्मंत्रे ।

अन्यपू० १२५—लिंगदर्शनादित्यत्रकर्त्रनुपलब्धिरूपानुमापकहेतोरित्युत्तरार्थे संगतिरिति चेत् ।

ख० १२६—ऋषिदर्शनाच्च हेतुप्रतिष्ठा ।

१२७—मंत्रकृद्भय इति ब्राह्मणलिंगात् ।

१२८—पाणिनेर्मंत्रकृत्पादव्युत्पादनात् ।

१२९—मंत्रकाररूपासद्धये मंत्रकररूपप्रतिषेधात् ।

१३०—मंत्रस्थस्यास्मच्छब्दार्थस्य ऋषिभिरेवान्वितत्वात् ।

१३१—स्पष्टादात्मकृतिख्यानाच्च बहूनामृषीणां मंत्रेषु ।

१३२—यावदेकर्षिभाषागतिसादृश्यात् ।

१३३—तद्भेदे तद्भेदात् ।

१३४—वक्तृभेदपरिहार्येभ्यः पुनरुक्तिदोषेभ्यः ।

१३५—पाठप्रवचनादृषिनामसंबंध इति परिहारमात्रं कारणांतरेण चेत्सिध्यति नित्यत्वम् ।

१३६—नित्यत्वाख्यागौणत्वकर्त्रनुपलब्धीनामितरेतराश्रयणाच्चक्रकम् ।

१३७—परिहारो वा कर्तुमशक्यो मांत्रवर्णिकास्मदर्थादिप्रातिकूल्यात् ।

१३८—तस्माद्वैदिकवाक्यबंध आर्ष इत्यभ्युपगंतव्यम् ।

१३९—उक्तः समष्टिकरणानुग्रहस्तेषाम् ।

१४०—वेदाविर्भावे समष्टेः शक्तिर्व्यष्टेर्व्युत्पत्तिश्च कारणे इत्युक्तं भवति ।

१४१—वेदाः काव्यानि वेधस उच्यंते करणस्य तदीयत्वात् ।

१४२—ऋषीणां व्युत्पत्तेस्तदीयत्वात् ।

१४३—उभयं च व्यष्टेर्लौकिकेषु वाक्येष्विति विशेषः ।

१४४—एतेन पदानुपूर्वीरचनं लोके वेदे च पुरुषयत्नसापेक्षमित्युक्तं भवति ।

१४५—यत्नभेदस्तु महानस्ति ।

१४६—तस्मात्सूत्रं सामान्यतः शब्दनित्यत्वस्यैवंहेतुं समुच्चिनोतीति वक्तव्यम् ।

१४७—पूर्वतत्पूर्वस्यैव हेतवोऽयं साक्षान्नित्यत्वस्येति विशेषः ।

१४८—व्यतिरेकेण पूर्वं हेतवो वा कार्यस्य प्रतिद्वंद्वित्वात् ।

१४९—अन्वयतोऽयं हेतुः साक्षात्साधकत्वात् ।

१५०—कथं साधयतीति चेदुपदेशप्रामाण्यात् ।

१५१—तवापीतरेतराश्रय इति चेन्न प्रामाण्यस्यास्माकं नित्यत्वानायत्तत्वात् ।

१५१—अर्थसंबंधस्य कृत्रिमत्वे वा बोधकत्वव्याव्याहतत्वान्नेतराक्षेपाः ।

इति षष्ठमधिकरणम् ॥ २६० ॥

१—अथ वेदवाचकत्वाधिकरणम् ।

२—तत्रैकेनादौ पूर्वपक्षः ।

२४. सू०—उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्निमित्तत्वात् ।

३—शब्दस्यार्थेन संबंधस्यौत्पत्तिकत्वे वा वैदिकाः शब्दाः अवाचकाः स्युरर्थस्य तन्निमित्तत्वाभावादिति ।

४—वैदिकशब्दार्थत्वेनाभिमतस्य धर्मादेर्हि—वैदिकशब्दनिमित्तत्वं न पश्यामः ।

५—अर्थः खलुशब्दस्य प्रवृत्तौ निमित्तं भवति ।

६—अदृष्टो धर्मस्वर्गदेवतादिरूपोऽर्थः ।

७—तत्र कथं धर्मादिपदप्रवृत्तिः ।

८—दृष्टेषु खल्वर्थेषु शब्दाः प्रवर्त्तेरन् ।

९—धर्मस्य क्रियावैलक्षण्येनादृष्टत्वमुक्तं भवति ।

१०—तस्य क्रियात्मकत्वाभ्युपगमे वा तस्य धर्मत्वमप्रत्यक्षम् ।

११—अथैकेन सूत्रेणैतमाक्षेपं परिहरंसिद्धान्तमाह ।

२५. सू०—तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ।

१२—तस्मिन्नर्थे वृत्तानां शब्दानां कर्मप्रयोजनेन हेतुनोप— ?

१३—तदा तदा भगवद्भिर्महर्षिभिरिन्द्रियनिरपेक्षेण दिव्यज्ञानेन दृष्टेष्वेवार्थेषु स्वर्गादिशब्दाः प्रवृत्ताः ।

१४—तत्साधनत्वेन दृष्ट एवेतिन्द्रियेर्थे धर्मशब्दः प्रवृत्तः ।

१५—तस्मादस्त्यर्थस्य तन्निमित्तत्वम् ।

१६—दिव्यज्ञानदृष्टानां चार्थानां लोके कर्मप्रवर्तनायोपदेशः ।

१७—लोकेपि पुरोनवस्थितस्वपूर्वप्रत्यक्षानुवादेषु गतचारित्रकीर्तनेषु चैवैव रीतिर्दृश्यते ।

अ० म० १८—व्यक्तिजातिरूपार्थाश्रयणेन पूर्वपक्षसिद्धान्तावित्यन्ये ।

आ० १९—नन्वाकृतिवादे गगनादीनामर्थानामसंग्रहस्तेषामजातित्वात् ।

२०—इन्द्रादीनां चेतिचेत् ।

स० २१—तत्रापि देशपरिच्छेदेन कालपरिच्छेदेन च विषयीभावानुसारेण व्यक्तित्वं सर्वदेशकालस्थोद्देशेन जातित्वं चेत्यविरोधः ।

स्व० म० २२—यद्यप्युभावपि पक्षौ न्यायतः सम्मतौ तथाप्यत्र प्रथम एव ज्यायान्प्रकरणात् ।

२३—सर्वत्र यौगपद्यादित्यत्रैव गतार्थः परः ।

२४—सम्बन्धश्चात्योत्तरसूत्रे न दविष्ठः ।

२५—लोकवेदयोरुभयोरपि तुल्यत्वादाकृतिवादस्य ।

३०. म० २६—पदार्थानामवाक्यार्थत्ववाक्यार्थत्वे आश्रित्य पूर्वपक्षसिद्धान्ता-वितीतरे ।

स्व० २७—वैदिकानां लौकिकानां च पदानां नित्यत्वे तुल्येपि लौकिकाः कृत्रिमाः पदसङ्घाता न त्वेवं वैदिका इति स्थापयितुमेष यत्नोऽ-नृजुना पथा ।

२८—पदार्थेभ्यो वाक्यार्थस्य भिन्नत्वे पदसङ्घातापेक्षा तस्य ।

२९—सङ्घाताङ्गीकारे वेदाश्च पौरुषेयाः स्युः पुरुषयत्नसापेक्षात् सङ्घातस्य ।

३०—पदार्थानां वाक्यार्थत्वांङ्गीकारे वा सङ्घातनिराकरणमशक्यमिति तु ब्रूमः ।

३१—अस्तु पदार्था एव वाक्यार्थस्तथापि संहता एवेति वक्तव्यम् ।

३२—पदार्थानां सङ्घातश्चाकाङ्क्षादिबलाद्योगः ।

३३—असंहतानां पृथक्पृथग्वर्तिनां पदार्थानामवाक्यार्थत्वात् ।

३४—पदार्थसङ्घातस्य च पदसङ्घातो हेतुर्वक्तव्यः ।

० स० ३५—पदसङ्घाताभावेपि पृथक्पृथग्वर्तिभ्य एव पदेभ्यः पदार्थाः स एव वाक्यार्थ इति चेत् ।

३६—वेदे यत्र क्वचिद्विद्यमानानामपि पदानामर्थाः प्रकरणाद्यनपेक्षाः कुतो वाक्यार्थो न स्यात् ।

३७—अग्निहोत्रं जुहुयात्स्वर्गकाम इति त्रीणि पदानि ।

३८—योऽग्निमुद्वासयेदिति त्रीणि ।

३९—तेषु चाग्निहोत्रमुद्वासयेत्स्वर्गकाम इति यदि कश्चिद्वदेत्स कथं प्रत्याख्यातव्यः ।

४०—तस्यापि वैदिकपदार्था एव वाक्यार्थः ।

४१—तस्यापि वाक्यार्थस्याकाङ्क्षोपशमः ।

पू० आ० ४२—पाठक्रमभङ्ग इति चेत् ।

४३—केनायं नित्यानां पदानां क्रमो निबद्धः ।

४४—त्वन्मते कर्तुरभावात्पाठकानामुपरि स भारो निक्षेपः ।

४५—तत्र कस्यचित्कश्चित्क्रमश्चदपरस्या परः कुतो न स्यात् ।

पू० स० ४६—आद्यपाठकक्रमोनुसर्तव्य इति चेत् ।

ख० ४७—स स्वबुद्ध्यनुसारेण नित्यानां पदानां कमपि क्रमं निबन्धेति पौरुषेयत्वं पुनरायातम् ।

४८—लोके च कवयो नित्यानामेव पदानां निबध्नन्ति कमपि क्रमम् ।

४९—एकस्य पदस्य बहुषु स्थलेष्वावृत्तिश्च पदसङ्घातवादानुकूला ।

उप० ५०—तस्मात्पदार्था एव वाक्यार्थ इति वादो न साधकः पदसङ्घात-निराकरणस्य ।

५१—न वा बाधको वाक्यार्थः पदार्थेभ्यो भिन्न इति वादो वेद-प्रामाण्यस्य ।

५२—तस्य नित्यत्वानायत्तत्वात् ।

५३—अथैकेन लोके वेदाङ्गेदं दर्शयति ।

२६. सू०–लोके सन्नियमात्प्रयोगे सन्निकर्षः स्यात् ।

५४—लोके विद्यमानेषु दृष्टेषु द्रव्यगुणकर्मस्वेव नियमात्प्रयोगस्येंद्रिय-सन्निकृष्टार्थवर्तित्वं स्यादिति ।

५५—सत्संप्रयोग इत्यत्रेवात्रापिसच्छब्दार्थो बोध्यः ।

५६—अतींद्रियपदार्थेषु लोके प्रयोगो नास्तीत्युक्तं भवति ।

५७—वेदे तु नैष नियमो दिव्यचक्षुषां महर्षिणामतींद्रियेष्वपि प्रयोगोपपत्तेः ।

५८—गतचारित्रानुकीर्तनेषु लोकेपि नैष नियमोऽस्तीति चेन्न तत्र प्रथमप्रयोगे नियमसद्भावात् ।

इति सप्तममधिकरणम् ॥

१—अथ षड्भिर्वेदासन्निकर्षाधिकरणम् ।

२—तत्रादौ द्वाभ्यां पूर्वः पक्षः ।

२७. सू०–वेदांश्चैके सन्निकर्षं पुरुषाख्याः ।

३—एके वेदांश्चपुरुषाख्या इति कृत्वा लोकवदिंद्रियसन्निकृष्टार्थ-प्रयोगान्मन्यंत इति ।

४—पुरुषाख्या प्रसिद्धिश्च माधुच्छंदसादिव्यवहरणात् ।

५—कालिदासादय इव मधुच्छन्दःप्रभृतयः कुत इन्द्रियसन्नि-कृष्टार्थप्रयोत्कारो न स्युः ।

२८. सू०–अनित्यदर्शनाच्च ।

६—अनित्यानां लौकिकानां दर्शनाच्च वेदानेके सन्निकर्षं मन्यंत इति ।

७—वेदे हि बहुलाः कथा अनित्यानधिकृत्य श्रूयंते ।

८—ताश्च लोककथानिर्विशेषाः ।

९—ऋषेरिंद्रियप्रत्यक्षास्तदुपजीव्यपरप्रत्यक्षा वाताः स्युरिति वक्तुं युक्तम् ।

१०—अथ चतुर्भिः परिहरति ।

२९. सू०–उक्तं तु शब्दपूर्वकत्वम् ।

११—सर्वस्यापि ज्ञानस्य दिव्यस्य लौकिकस्य च शब्दपूर्वत्वं शब्द-पुरःसरत्वमुक्तं प्राक्तस्माच्छब्दसाम्यमात्रेण ज्ञानसाम्यं न वक्तव्यमिति ।

३०. सू०–आख्याप्रवचनात् ।

१२—प्रवचनादृष्ट्याख्येति ।

१३—प्रवचनं च द्विव्यदर्शनप्रकटनम् ।

१४—यद्यपि दिव्येषु ज्ञानेषु दर्शनं समष्टेस्तत्करणमूलकत्वात्तथापि तस्य प्रवचनं व्यष्टेरिति तत्प्रोक्तत्वात्तदाख्येत्युक्तं भवति ।

३१. सू०–परंतु श्रुतिसामान्यमात्रम् ।

१५—परमनित्ययोगित्वं श्रुतिसाधारण्यमात्रं दिव्यज्ञानानुवादानां सहलौकिकज्ञानानुवादैः ।

१६—अनित्यानां दिव्यचक्षुरविषयत्वमिति न नियमः ।

१७—चर्मचक्षुषेव दिव्यचक्षुषा पश्यन्नपि देवदत्तं देवदत्त इत्येव ब्रूयात् ।

१८—उभयत्र श्रुतिसाधारण्यं श्रोतुः ।

पू० वो० १९—अथ किं प्रयोजनमनित्यानामुपदेशस्येति चेत् ।

३२. सू०–कृते वा विनियोगः स्यात्कर्मणः संबंधात् ।

स० २०—कृतेऽनित्येऽर्थे वा विनियोगः प्रयोजनं स्यात् कर्मणः संबंधात्तस्यार्थस्येति ।

२१—अनित्यार्थोपदेशः कर्मसंबंधादित्युक्तं भवति ।

२२—तात्पर्येण कर्मस्तवार्थत्वात्तस्य ।

अ० म० २३—इदं सूत्रमधिकरणांतरमेकेषां वनस्पतयः सत्रमासतेत्यादिषु विरोधपरिहारार्थम् ।

ख० २४—तस्योत्तरत्र करिष्यमाणत्वादत्र पुनरनवसरः ।

अ० म० २५—वेदासन्निकर्षाधिकरणे वेदानामनित्यत्वनित्यत्वे पूर्वपक्षसिद्धांतावित्येके ।

ख० २६—सवादः प्रागेव प्रत्युक्तः ।

२७—नास्ति च सन्निकर्षशब्दस्यानित्यत्वं वक्तुं सामर्थ्यम् ।

२८—न च लक्षणा प्राक्प्रयुक्तानुप्रयोगस्य स्पष्टत्वाच्चकारतः ।

२९—प्राक्प्रयुक्ते हि लक्षणा ।

उप० ३०—तस्माद्यथाद्याख्यातमनवद्यं यथाव्याख्यातमनवद्यम् ।

॥ इत्यष्टममधिकरणम् ॥

इति श्रीभगवन्महर्षिरमणांतेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः कृतिर्जैमिनीयतर्कवार्तिकं समाप्तम् ।

अथ प्रमाणपरीक्षा (सूत्रग्रंथः)

प्रथमः खंडः

१—अथातः प्रमाणपरीक्षा ।

२—अक्षजं व्यष्टिज्ञानं प्रत्यक्षं तदेकं प्रमाणम् ।

३—अत्र ज्ञाता साक्षी ।

४—तदक्षभेदात्पंचविधम् ।

५—स्पर्शरसगंधानामनुभूतिकाले केवलम् ।

६—अनुवादे स्मरणे च शब्दरूपम् ।

७—रूपस्यानुभूतौ स्मरणे च ।

८—त्रिष्वपि शब्दस्यैकरूपम् ।

९—शब्दोऽत्र नादपर्यायो न नादवत्पर्यायः ।

१०—बलवदुत्तरमन्यथाज्ञानं पूर्वज्ञानप्रामाण्यस्यापवादः ।

११—अपोदितप्रामाण्यं ज्ञानं भ्रमः ।

१२—संशयेन कस्यचित्प्रामाण्यमनिर्धारितत्वात् ।

१३—पूर्वोत्तरयोस्तुल्यबलत्वे संशयवत् ।

द्वितीयः खंडः

१—प्रत्यक्षेण लिंगेनेतरस्य प्रत्ययोऽनुमानं तदन्यत्प्रमाणम् ।

२—नियमेन तदेकसहवासिद्रव्यं द्रव्यांतरस्य लिंगम् ।

३—एवंगुणो गुणांतरस्य ।

४—कर्मणश्च ।

५—कर्मगुणस्य ।

६—नियतकारणं कार्यं कारणस्य ।

७—नियतोत्तरावस्थापूर्वस्याः ।

८—भूतकारणावस्था प्रत्ययाभ्यां भाविकार्यावस्था प्रत्ययौ व्याख्यातौ ।

९—कस्यचिद्विप्रकर्षोऽन्यस्य नियमेन दूरीकर्तुः ।

१०—विप्रकर्षश्च देशतः कालतो वा ।

११—अनुभूतस्य सन्निकर्ष इव व्यावृत्तस्य विप्रकर्षश्च प्रत्यक्षः

१२—प्रमितेः प्रागभिलषितस्यैव व्यावृत्तिः ।

१३—कस्यचित्सन्निकर्षोऽन्यस्य नियमेन बाध्यस्य भूतस्य ।

१४—चेष्टानियतानिमित्ता निमित्तस्य ।

१५—एवंलिंगांतराण्यप्यूह्यानि । २८

तृतीयः खंडः

१—श्रद्धेयस्य साक्षिणोऽनुवादकं वाक्यमाप्तवाक्यम् ।

२—तदन्यत्प्रमाणमेकेषाम् ।

३—उपजीव्ये वा तस्य संग्रहः ।

४—तदपवादोऽन्यथा साक्षात्प्रत्यक्षं लिंगं च ।

५—यथोक्तसाक्षिविप्रतिषेधे संशयवत् ।

६—ऐतिह्यमाप्तवाक्यान्नातिरिच्यते ।

७—तथापि तत्राप्तस्याज्ञातत्वात्तदन्यत्प्रमाणमेकेषाम् ।

८—यथा तात्पर्यं तस्य प्रामाण्यं न यथाश्रुतमिति वासिष्ठः ।

९—सादृश्यं स्मृतोपमेयसदृशत्वेन प्रसिद्धस्य लिंगं तदुपमानमन्यत् प्रमाणमेकेषाम् ।

१०—अनुमानविशेषो वा ।

११—पीनो देवदत्तो दिवा न भुंक्त इत्यादौ रात्रौ भुंक्त इत्यादिप्रतीत्यर्थापत्तिस्तदन्यत्प्रमाणमेकेषाम् ।

१२—अनुमानविशे·····

१३—अनुपलब्धिरभावे प्रमाणमित्येके ।

१४—प्रमितमभिलषितादन्यदित्येव तत् ॥ ४२ ॥

चतुर्थः खंडः

१—दिव्यदृष्टिजं ज्ञानमपरोक्षं तदितरत्प्रमाणम् ।

१—प्रत्यक्षन्नातिरिच्यत इत्येके ।

३—अन्यद्विलक्षणत्वाद्वासिष्ठस्य ।

४—वेद आप्तवाक्यादन्यः ।

५—स ह्यपरोक्षस्यानुवादः ।

६—तत्र समष्टेः शक्तिर्व्यष्टेर्व्युत्पत्तिश्चेति प्रादुर्भावनिमित्तम् ।

७—अतस्तस्य पारमेश्वरत्वमार्षत्वं च ।

८—तमागमप्रमाणमाहुरागमप्रमाणमाहुः ॥ ५० ॥

अथाभावपरीक्षा (सूत्रग्रंथः)

पू० १—अभावश्च तत्त्वं प्रतीतेः ।

२—वाच्यत्वं सामान्यात् ।

३—अधिकरण·····भिधायकत्वात् ।

४—·····

५—प्राक्सतिजननस्यासिद्धेः ।

६—पश्चाद्विनाशस्य ।

७—अन्यत्रान्यत्वेभेदा···स्य ।

८—अविद्यायाः प्रतिष्ठित्यै ।

९—अहिंसादेर्धर्मस्य ।

१०—तमसश्च ।

ख० ११—न ह्यवस्तुत्वादवस्तुधर्मत्वाच्च ।

१२—वैषम्याच्च ।

१३—यदस्ति तत्तत्त्वं हि ।

१४—प्रतीतिस्तु प्रतियोगिसापेक्षा ।

१५—तच्च नासत् ।

१६—स्मृत्यारूढं सदेव देशतः कालतो वा विप्रकृष्टमसद्वत्प्रतीयते ।

१७—अपि च नेन्द्रियं गृह्णात्यभावम् ।

१८—विप्रकृष्टाभिलषितविषयेऽधिकरणे तस्य व्यापारमात्रम् ।

१९—.....

२०—घटस्य सन्निकृष्टभूतलव्याप्तिरेव न साधिता स्यात् ।

२१—अस्त्वेवऽत्र सोऽन्यत्रेति नास्मिन् ।

२२—मास्तु तस्य व्यापकत्वं देशकालाभ्यामपरिच्छिन्नम् ।

२३—व्याप्यत्वमन्वयतः सत्ताभित्त्योरंतः ।

२४—बहिरसत्ताव्यतिरेकतः ।

२५—व्यतिरेकेण व्यवहारो न वस्तु वस्तुधर्मं वा साधयेदन्यार्थत्वात् ।

सि० २६—तस्मात्तत्तद्भावस्य तत्तद्व्याप्यत्वं वस्तुतोऽर्थो वक्तव्यः ।

२७—अतोऽन्योऽर्थो भाक्तः ।

परि० शो० २८—अन्याभावादधिकरणे न कश्चन विशेषः ।

२९—स एव नास्ति योऽन्यसंसर्गात् ।

३०—ब्रह्मणस्पतेर्जगद्धर्मस्य पूर्वप्रकृतत्वान्मांत्रवर्णिकमसदविकृत-
मनीदृशं जगत् ।

३१—प्राक्सत एव विलक्षणनवावस्थापरिग्रहो जननम् ।

३२—स्वयं सत एव पूर्वावस्थात्यागो नाशः ।

३३—स्वत्वाद्विलक्षणाद्भेदो नान्यत्वाभावात् ।

३४—भूतले घटो नास्तीति प्रतीत्या घटत्वं नास्तीति व्याख्याता ।

३५—विपरीतज्ञानमविद्या ।

३६—अनुपलब्धाभिलषितविषयं वा ।

३७—अकार्यत्वधीपुरःसराहिंसादेर्निवृत्तिरहिंसादिर्नाभावः ।

३८—इन्द्रियनियामकवृत्तित्वात् ।

३९—छायात्वात्तमः ।

उप० ४०—तत्प्रातिपदिका व्यावहारिकी प्रतीतिर्व्यावहारिकी प्रतीतिः ।

समवायपरीक्षा (सूत्रग्रंथः)

प्रा० म० १—कार्ये कारणस्यानुगतिं समवायमाहुः ।

२—द्रव्यगुणयोर्द्रव्यकर्मणोर्द्रव्यजात्योर्गुणजात्योः कर्मजात्योश्च संसर्गः ।

३—अयुतसिद्धत्वात्संयोगादर्थांतरम् ।

४—गुणेषु नांतर्भवति गुणधर्मत्वात् ।

५—कर्मसु कर्मधर्मत्वात् ।

वा० भ० ६—वासिष्टस्त्वन्यथा मन्यते ।

७—केवलवस्तुपरीक्षायां कार्यकारणयोरभेद एव न संबंधः ।

८—विशिष्टे कार्ये कारणस्यानुगतिर्नामांतरापन्नविशेषरूपतयैव स्यात् ।

९—गुणादेस्तु समवायः संयोगवन्न कश्चिद्व्यापार इति न वस्तुतो भावः ।

१०—अयुतसिद्धेर्नातिरिच्यते ।

११—अयुतस्यैवाश्रये स्वभावतः सिद्धिरयुतसिद्धिः ।

१२—तामपृथक्सिद्धिमाहुर्व्यतिरेकतः ।

१३—सैव समवायाख्यं भावांतरमस्त्विति चेन्न तस्याः परीक्षकव्याख्यान-मात्रत्वात् ।

१४—अपृथक्सिद्धिसमवाययोरेकार्थत्वं त्विष्टमेकार्थत्वं त्विष्टम् ।

ईश्वरीमीमांसा (सूत्रग्रंथः)

प्रथमोऽध्यायः प्रथममाह्निकम्

१—आत्मा परमो विश्वस्यांतरे ।

२—अणोरणीयान्वस्तुतः ।

३—महतो महीयान् निजया शक्त्या ।

४—तमेव सत्यं लोकमाहुः ।

५—स एव परं ब्रह्मोच्यते ।

६—तस्य शक्तिः समंततः प्रसरंती विश्वस्य सर्गायाभवदिति तद्विदां दर्शनम् ।

७—सृष्टस्य सृष्टस्य पुनरंतरो भवति परमो यत्र यत्र प्राणः ।

८—स जीव उच्यते ।

९—स एव विश्वोपाधिक ईश्वरः ।

१०—परमप्येतत्पदम् ।

११—प्रसरंत्याः शक्तेः प्रांतेष्वेवैते जीवलोकाः ।

१२—जीवलोकानां सत्यश्च परमात्मनश्च मध्ये शुद्धामहती परमात्मशक्तिरेव ज्वलंती भवति ।

१३—तां शुद्धां तपोलोकमाहुः परमस्य हि तत्तपः ।

१४—आत्मशक्तिं विजृंभयितुं संकोचयितुं च परमः प्रभवति ।

१५—तस्माद्विश्वसर्गप्रलयौ तदधीनौ ।

द्वितीयमाह्निकम्

आ० १—विश्वांतरस्य परमात्मस्थानत्वे तस्य रूपं वक्तव्यम् ।

२—परमात्मनोऽनर्थांतरमिति चेत्सप्तमी नोपपद्यते ।

स० ३—बुध्यपेक्ष एकस्यैवाधाराधेयत्वेन निर्देश इत्यदोषः ।

४—हृदि ह्येष आत्मेतिवत् ।

५—हृदेव खल्वात्मायं यथा मनंति हृदयशब्दार्थनिरूपणे छंदोगाः ।

आ० ६—प्रलये विश्वस्योपसंहारात्तत्काले परमस्य विश्वांतरत्वानुपपत्तिरिति चेत् ।

स० ७—सर्गकालिकविवक्षातो न दोषः ।

आ० ८—आलोक्यत्वात्परमात्मनो लोकत्वानुपपत्तिरिति चेत् ।

स० ९—लोककत्वादर्थसंगतिः ।

१०—उभयार्थकत्वमन्नशब्दवतः ।

११—एतेन शक्तेर्लोकत्वं च व्याख्यातम् ।

पू० १२—परमस्य स्वरूपतो जीवत्वमिति चेद्देकस्यानेकांतरत्वानुपपत्तिः ।

१३—आकाशवदनेकांतरत्वमुपाधिवशादिति चेदणोरणीयस्त्वं न सिध्येत ।

१४—अव्यक्तत्वेन प्रतिबिंबनानुपपत्तिः ।

१५—तस्मादन्य एव भावो जीव इति चेत् ।

सि० १६—प्रतिबिंब एव भवति ।

१७—अव्यक्तस्य व्यक्तत्वेन न प्रतिबिंबनं नाव्यक्तत्वेनापि ।

१८—स्वप्नदृष्टव्यक्तिष्वात्मप्रतिबिंबनवत्तदुपपत्तिः ।

प्र० १९—परमस्य निजशक्तिप्रसारणोपसंहरणसंगतिः कथमितिचेत् ।

उ० २०—इच्छावत्त्वात् ।

२१—अस्माकमिच्छातपसी इव परमस्येच्छातपसी परमस्येच्छातपसी ।

द्वितीयोऽध्यायः प्रथममाह्निकम्

१—स परमात्मा प्राणिति प्राणेन विना ।
२—तेन प्राणिति सर्वः प्राणोपि ।
३—तस्मात्तं प्राणानां प्राणमाहुः ।
४—स मनुस्ते मनसा विना ।
५—तेन मनुते मनः सर्वमपि ।
६—तस्मात्तं मनसां मन आहुः ।
७—इच्छत्यहंकारं विना ।
८—तेनेच्छति सर्वो जीवः ।
९—तस्मात्तं चेतनानां चेतनमाहुः ।
१०—स पश्यति चक्षुषा विना ।
११—तेन पश्यति चक्षुः सर्वमपि ।
१२—तस्मात्तं चक्षुषां चक्षुराहुः ।
१३—स शृणोति श्रोत्रेण विना ।
१४—तेन शृणोति सर्वमपि श्रोत्रम् ।
१५—तस्मात्तं श्रोत्राणां श्रोत्रमाहुः ।
१६—स वदति वाचा विना ।
१७—तेन वदति वाक् सर्वापि ।
१८—तस्मात्तं वाचां वाचमाहुः ।
१९—एतेन तस्यान्यानि ज्ञानानि कर्माणि च व्याख्यातानि ।
२०—इतरेषां ज्ञानकर्मणां च तदधीनत्वात् । ५६

द्वितीयमाह्निकम्

आ० १—तदायत्तानि सर्वाणि ज्ञानानि कर्माण्यपि चेत्सर्वो दुष्कृतकार्यमपराधः स्यात् ।
२—श्लाघापात्रं च न स्यात्सर्वः सुकृतकारी ।
३—नरकनाकप्राप्त्योरन्याय्यत्वनिष्कारणत्वे च प्राप्नुयाताम् ।
४—प्रत्युत परमस्य क्वचिद्दुष्कृतकारित्वं च प्रसज्येतेति चेत् ।
स० ५—ज्ञातुं कर्तुं च शक्तिरेव परमाधीना न ज्ञानकर्मविशेषा इति नैते दोषाः ।
आ० ६—एवं चेन्मनःप्रभृतीनामेवापराधेन जीवस्य कष्टं प्रसज्येत ।
स० ७—नैवमिच्छापूर्वकत्वाद्धीकर्मणाम् ।

आ० ८—इच्छा च परमायत्तेति चेत् ।

स० ९—इषितुं शक्तिरेव परमायत्तानेच्छाविशेषा इत्यदोषो नेच्छा-विशेषा इत्यदोषः ।

क्रियाशक्तिमीमांसा

प्रथमः खंडः

१—यया प्राणिति परमः सा तस्य क्रियाशक्तिः ।

२—तस्या एव बलाख्या ।

३—सा व्याप्नोति भुवनं तपनशक्तिरिव सूर्यस्य ।

४—पचति च ।

५—तामेव विद्युच्छक्तिमाहुः ।

६—कालयतीति सा काली ।

७—तच्च कालनमव्यक्तस्वरद्वारा ।

८—पुमाख्ययाकालः ।

९—तारयतीति तारा ।

१०—तच्च तारणमव्यक्तस्वरद्वारा ।

११—पुमाख्ययातारः ।

१२—तारः प्रवण इत्यनर्थांतरम् ।

१३—संहरतीति प्रचंडचंडी ।

१४—तच्च संहरणमव्यक्तज्योतिद्वारा ।

१५—नपुंसकाख्ययावज्रम् ।

१६—शचीशचधात्वर्थानुगमात् ।

द्वितायः खंडः

आ० १—प्राणनं क्रियाशक्तेरन्यच्चेत्क्रियायाः क्रियांतरमापद्येत ।

२—अनन्यच्चेत्क्रियाशक्तेस्तत्र करणत्वानुपपत्तिः ।

स० ३—शक्तेः क्रियातो भेदाददोषः ।

आ० ४—विद्युच्छक्तिस्तेजोविशेषश्चेच्छक्तिर्द्रव्यं स्यात् ।

५—तेजोविशेषशक्तिश्चेत्परमत्व न स्यात् ।

६—सा तेजोविशेषोपाधिनिरपेक्षैवात्रोदितेति न दोषः ।

आ० ७—शक्तिः कालश्चेद्द्रव्यं स्यात् ।

स० ८—कालो द्रव्यमिति वैशेषिकसंकेतमात्रमिति नैतच्चोद्यं नैतच्चोद्यम् ।

सृष्टिसूत्रम्

१—एकः प्राणशरीर आत्माग्रे सुप्तेरुत्थित ऐक्षत ।

२—सा प्रथमेक्षानंतो देशः ।

३—प्रकृतिरेव न विकृतिः ।

४—शुद्धादाकाशान्नातिरिच्यते ।

५—अंबिकाविश्वजन्मक्षेत्रत्वात् ।

६—आप्रलयं निर्विरामानंतरेक्षाधारा कालः ।

७—प्रकृतिरेव न विकृतिः ।

८—तपोध्यानाव्यतिरेकात् ।

९—मातरिश्वा प्राणनानव्यत्वात् ।

१०—ईक्षते ध्यायति प्राणितीति न पृथक्क्रियासमष्टौ ।

११—व्यष्टौ च स्थितप्रज्ञदशायाम् ।

१२—अखंडधारात्वान्न नाना ।

१३—कालपाकजं द्रव्यं तेजोगूढव्यापकविद्युद्रूपम् ।

१४—प्रकृतिश्च विकृतिश्च ।

१५—तेजः पाकद्रव्यमापोगूढव्यापकरसरूपः ।

१६—प्रकृतिश्च विकृतिश्च ।

१७—अप्पाकजं द्रव्यमन्नं गूढव्यापकपृथिवीरूपम् ।

१८—प्रकृतिश्च विकृतिश्च ।

१९—एषा प्रथमा सृष्टिः ।

२०—तेजोबन्नानां पाकवशादविभाज्यः संश्लेषः ।

२१—इयमेव त्रिगुणा प्रकृतिर्बादरायणस्य ।

२२—सर्वस्य दृश्यस्य मूलसामग्री ।

२३—आत्मातदंतरोऽभूत् ।

२४—तमिंद्रमाहुः प्राचः ।

२५—ईश्वरं नव्याः ।

२६—द्वितीया सृष्टिरेषा ।

२७—त्रिगुणायाः प्रकृतेः पाकवशादंडानामुद्भवः ।

२८—आत्मा तेषामंतरोभूत् ।

२९—ते देवा उच्यंते ।

३०—अंडेषु पाकवशात्पिंडानामुद्भवः ।

३१—आत्मा तेषामंतरोभूत् ।

३२–ताः प्रजा उच्यंते ।

३३–इयं तृतीया व्यक्तजगत्सृष्टिर्व्यक्त-जगत्सृष्टिः ।

इंद्रेश्वराभेदसूत्रम्

१–इंद्रः शिवश्च न द्वौ ।

२–इंद्राणी रुद्राणी च न द्वे भवतः ।

३–इंद्रेश्वरयोरेकार्थत्वादिंद्रेश्वराभेदः ।

४–पुरांभिदुरिंद्रः पुराभिदीश्वरो हि ।

५–देवराजो इंद्रो महादेव ईश्वरो हि ।

६–महेंद्रमहेश्वरशब्दावपि हि आ० तुल्यार्थौ ।

७–रुद्रसंक्रंदनशब्दौ च ।

८–उग्रशब्दो ह्युभयत्र प्रयुज्यते ।

९–ईशानशब्दश्च ।

१०–भीमशब्दश्च ।

११–उभयोरप्यधिभूतं वैद्युततेजो-रूपत्वात् ।

१२–मरुदीश एको भूतेशोऽपरो हि ।

१३–भूताश्च रुद्राः ।

१४–रुद्राश्च मरुद्भयो नातिरिच्यंते ।

१५–उभावपि दुष्टसंहाराय हि प्रेर्येते ।

१६–उभयोरप्यपारः पराक्रमो वर्ण्यते हि ।

१७–मृत्युं जयत्वं च ।

१८–शिववाहनभूतो वृषो वर्षकत्व-व्युत्पत्तेरिंद्रवाहनभूतान्मेघान्ना-तिरिच्यते ।

१९–स वृष्टया सर्वानंकरत्वान्नंदी ।

२०–सेचकत्वादुक्षा ।

२१–जलात्मकत्वाद्गौः ।

२२–अत एव बहिर्नील इव दृश्य-मानोपि श्वेतो वर्ण्यते ।

२३–आपो हि श्वेताः ।

२४–एवं चेदिंद्रेश्वरयोर्द्वैधा-व्यवहारःकुत इति चेत् । स०

२५–रुद्रो महान्प्राणः ।

२६–सोधिदैवतमिंद्रः ।

२७–मध्यमस्याध्यात्मिकं नामरुद्र इति ।

२८–आधिदैविकं नामेश्वर इति ।

२९–ततो रुद्राणी प्राणशक्तिरिंद्राणी देवताख्यीरूपा चेत्युक्तं भवति ।

३०–रुद्र इंद्रस्य तत्वम् ।

३१–इंद्रो रुद्रस्याभिमानी ।

३२–रुद्राणींद्रस्यास्तत्वम् ।

३३–इंद्राणी रुद्राण्या अभिमानिनी ।

३४–रुद्राणी रुद्रश्च योगिभिरुपास्येते ते ह्यध्यात्मचिंतकाः ।

३५–इंद्राणींद्रश्च वैदिकैः स्वाध्यायेन संस्तूयेते ते ह्यधिदैवत-परास्तेह्यधिदैवतपराः ।

रुद्रकुटुंबसूत्रम्

१–ज्योतिरिदमासीदवेकृतं व्यापकं चिद्रूपम् ।

२–तस्य सदिति ब्रह्मेत्यात्मेत्यन्यानि नामानि भवंति ।

३–तस्येयं प्रथमेक्षायदात्मानं व्याप्तं प्राजानात् ।

४–साधौः समपद्यत ।

५–अनंतराणां विज्ञानानां भित्तिः ।

६–इमामेवानंतं देशमाहुः ।
७–अदितिरखंड्यत्वात् ।
८–अथ ज्योतिर्दिवमभ्यतपत् ।
९–अव्यक्तशब्दरूपता तदा तस्य ।
१०–स दिवमभितप्तपुमानासीत् ।
११–सर्गाय क्रियावत्त्वमत्र पुंस्त्वम् ।
१२–सर्गाय क्रिया च तपः ।
१३–सपुमान्रुद्रो नाम ।
१४–अभितप्यमाना द्यौर्योषासीत् ।
१५–सर्गक्षेत्रत्वमत्र योषात्वम् ।
१६–सा रुद्राणी नाम ।
१७–तौ दंपती भवतः ।
१८–विश्वस्य मातापितरौ ।
१९–अत एव रुद्राण्यंबिकोच्यते ।
२०–रुद्रस्त्र्यंबकः ।
२१–भुवनस्यपिता च ।
२२–तयोर्व्यक्तः शब्द आद्यः पुत्र आसीत् ।
२३–स एव ब्रह्मणस्पतिः ।
२४–गणपतिस्तांत्रिकाणाम् ।
२५–अयं च व्यक्तः शब्दःकर्णविधान-कालानुभूतकल्पो नित्यमाकाशे ।
२६–रुद्रः सब्दां दिवं पुनरभ्यतपत् ।
२७–वायुरजायत ।
२८–स द्वितीयः पुत्रः ।
२९–भैरवस्तांत्रिकाणां भाषायाम् ।
३०–तं रुद्रो न्वभवत् ।
३१–स स्पर्शः ।
३२–तत्र द्यौः शरीरायते ।
३३–तरंगवत्त्वशाद्भानात्व्यव्यहारश्च वायोः ।
३४–तदावायवोरुद्रसूनवोमरुत उच्यंते ।
३५–रुद्रः स स्पर्शवायुशब्दो दवं पुनरभ्यतपत् ।
३६–व्यक्तं जोऽजायत ।
३७–स तृतीयः पुत्रः ।
३८–सोऽग्निः ।
३९–गुहस्तांत्रिकाणां भाषायाम् ।
४०–स एव रुद्रकुटुंबस्तत्वतो व्याख्या-तस्तत्वतो व्याख्यातः ।

इति श्रीभगवन्महर्षिरमणांतेवासिनो वासिष्ठस्य नरसिंह-सूनोर्गणपतेः कृतौ रुद्रकुटुंभसूत्रं समाप्तम् ।

शिवस्तवराजः

राशिवदनावर्गः १

अमृतमयूखं मुकुटमनर्घम् । जयति दधानो जगदधिराजः ॥ १ ॥
सकलबुधौघे विफलविधाने । असति शरण्ये मतिमतिगण्ये ॥ २ ॥
दुरित विसार प्रतमसि लोके । ऋषिकुलजानां सदसि सशोके ॥ ३ ॥
अतिदुरदृष्टान्नरनियुतेषु । अपि मति मत्तुं धनरहितेषु ॥ ४ ॥
उदितविरोधा स्वयुतभिदासु । चतसृषु जातिष्वबलतमासु ॥ ५ ॥
मुहुरपि लोले क्षिति सुरशीले । अजगणकल्पे भुजभवसङ्घे ॥ ६ ॥
चतुर विरोधि व्रजहृतसाराम् । अविरतनेत्र स्रुतजलधाराम् ॥ ७ ॥
भरतधरित्रीं भुवन नृपालः । अवतु दयालुः सितगिरिशालः ॥ ८ ॥
अरुणधरित्री धरहरदूनाम् । भरतधरित्रीमव शिव दीनाम् ॥ ९ ॥
स तुहिनरोचिः शकलकमस्ते । सकरुणगौरो रमण नमस्ते ॥ १० ॥
हरभरतक्ष्मा जनवरदूतम् । कुरु चरितार्थं गणपतिमेतम् ॥ ११ ॥
असि सितशैले हरहृतगात्री । तव किमु दृष्ट्यां न भरतधात्री ॥ १२ ॥
पुरजित ईड्यं विलसति गुर्व्याम् । सितगिरिनामस्थलमिदमुर्व्याम् ॥ १३ ॥
स्थलमिदमच्छक्षितिधररूपम् । हृदयमिलाया अपहृतपापम् ॥ १४ ॥
हृदिव नराणां सितनगनाम । हृदपि धरायास्तव शिव धाम ॥ १५ ॥
क्षिति हृदये वा विलसति नित्यः । त्रिभुवनमध्ये शिव इति सत्यः ॥ १६ ॥
प्रभुमिह सन्तः प्रतिखगगोलम् । विदुरिममन्तर्विरचितशालम् ॥ १७ ॥
इयमखिलाक्ष्यो बहुतरलीला । नरहृदयाख्या हर तव शाला ॥ १८ ॥

मुकुलवर्गः २

उद्दीप्यत्किरणं चित्रं श्रीशरणम् । कामारेश्चरणं भूयान्नः शरणम् ॥ १ ॥
सत्यः कोऽपि शिवो नित्यः पालयिता । मध्ये यो जगतां स ध्येयः सततम् ॥ २ ॥
नास्त्येतस्य तनुर्वस्त्ये क्वापि न सः । मत्याऽभाणि पुनः सत्याधारपदम् ॥ ३ ॥
उक्तं सूक्ष्मतमं द्वेधैकं परमम् । रूपं रूपतया किञ्चस्थानतया ॥ ४ ॥

सोऽणुः स्यादणुतो धातैषां जगताम् । तच्छक्तिर्महतो विज्ञेया महती ॥ ५ ॥
गत्वा तिष्ठति ना यत्स्वं हार्दपदम् । अग्राह्यस्य विभोस्तस्य ध्यानमिदम् ॥ ६ ॥
दृष्ट्वाऽसौ भुवनं सृष्ट्वा शास्तुमिदम् । हैमं दिव्यवपुर्जग्राहेति विदुः ॥ ७ ॥
सूक्ष्मं स्यादगुणं हैमं स्यात्सगुणम् । देवस्यादिविभोरेवं द्वे वपुषी ॥ ८ ॥
भाषामात्रवपुः पूर्वं स्यादवपुः । अन्यद्भक्तिमतां बुद्धिग्राह्यवपुः ॥ ९ ॥
बिभ्रद्भाति जगत्साम्राज्यं गगने । हैमोऽसौ पुरुषः सिद्धानां भुवने ॥ १० ॥
वाचा नव्यविदा मध्यक्षः सपरः । इन्द्रः पूर्वविदामस्माकं तु हरः ॥ ११ ॥
प्रत्युष्णांशुतया तन्वा बिम्बितया । प्रत्यण्डं प्रभुतां धत्ते सोऽद्भुतया ॥ १२ ॥
अभ्रे राजतियो बिभ्राणे भुवनम् । शुभ्रागे च विभुः सम्राजिष्णुयशाः ॥ १३ ॥
गौरोऽयं गगने शुक्लः शुभ्रनगे । एके यन्तु भिदा मायारूपकृता ॥ १४ ॥
हैमं भूतपते शुक्लं वा शिव ते । रूपं यः स्मरति प्राज्ञोऽसौ जयति ॥ १५ ॥
अभ्रे ये मरुतः शुभ्रे भूभृति ते । क्लेशानां दमना ईशानः प्रमथाः ॥ १६ ॥
दासोऽहं मरुतः पातारो जगतः । भूता वा भवतां स्तोता पापहृताम् ॥ १७ ॥
स्तूयन्तां सुहृदः सर्वे सर्वविदः । ईशानानुचराः सर्वाभीष्टकराः ।१८+१८=३६।

तनुमध्यावर्गः ३

हर्ता दुरितानां धर्ता जगतां नः । भर्ता गुहमातुः कर्तास्तु शुभस्य ॥ १ ॥
पाता भुवनानां धाता च विधाता । नेता प्रमथानां त्राता भवताद्वः ॥ २ ॥
कर्ता भुवनानां भर्तापि च हर्ता । ख्यातोऽवतु देवस्तातो मरुतां नः ॥ ३ ॥
कर्तुं स्वरतीदं भर्तुं प्रविभांते । हर्तुं य उदास्ते तर्तुं प्रणुमस्तम् ॥ ४ ॥
कर्तुं भुवनं वाग्भर्तुं भवभाते । हर्तुं खलु भद्रा योगामलनिद्रा ॥ ५ ॥
कार्यं त्रिकमेतत्कर्तुं बहवो नो । एकस्य तु कार्यैर्नामानि बहूनि ॥ ६ ॥
क्ष्मार्केन्दुपतिभ्यः खिभ्यः पुरुषेभ्यः । सर्गस्थितिभंगख्यातिः खलु भाक्ता ॥ ७ ॥
तेष्वन्यतमं यत्कार्यत्रिकहेतुम् । केचिद्ब्रूते सा भाक्ता नकिमुक्तिः ॥ ८ ॥
अध्यक्षपरोऽयं साक्षादिव वादः । एका यदहंता तस्यापि परस्य ॥ ९ ॥
मेयः शिव सर्वो गोलात्मकलोकः । सीमारहितोऽसा बकस्तवनाकः ॥ १० ॥
लक्ष्मीपतिसंख्या यावद्भविलोकम् । गौरीपतिरेको राजत्यधिनाकम् ॥ ११ ॥
एकैक इ नः स्यात्प्रत्यब्जभवाण्डम् । सर्वाण्डगमेकं प्राहुः खमखण्डम् ॥ १२ ॥
आत्मानमुताहो तातं खचराणाम् । आहोस्विदधीशं ध्यायामि सुराणाम् ॥ १३ ॥
तं व्योमचराणां जीवं पवमानम् । तातं शिवमाहुर्नाथं मघवानम् ॥ १४ ॥
यद्यप्यखिलानामात्मा गुरुरीशः । उक्तो मरुतां तु प्राथम्यत एषः ॥ १५ ॥
अभ्रे विचरन्तं भान्तं निनदन्तम् । अस्मत्पितरं तं वन्दे भगवन्तम् ॥ १६ ॥

यान्तं पवमानं भान्तं मघवानम् ।
नाके निनदन्तं गायन्ति शिवं तम् ॥ १७ ॥

भातो गगनाग्नेर्यातः पवनस्य ।
तारस्य च रूपं नानेकमपापम् ॥ १८+३६=५४॥

वसुमतीवर्गः ४

नित्यं स्वरति यो व्याप्याभ्रमखिलम् ।
गायन्ति कवयस्तं तारममलम् ॥ १ ॥

ताराह्वयवपुः शंभोरभयदम् ।
भानोः किरणवद्भैभूतिकमिदम् ॥ २ ॥

तं पुष्करगुणं गायन्तु बहवः ।
स त्वग्निरजरो दिव्यः शिवरवः ॥ ३ ॥

यद्रोदिति वियद्देशेऽनवरतम् ।
भद्रं बुधगणो रुद्रं भणति तम् ॥ ४ ॥
संघर्षणवशाद्राजत्यलमयम् ।
पानीयमुचितं प्राहुर्हरिहयम् ॥ ५ ॥

तारः सगगने न त्वेव मरुताम् ।
सर्वत्र च महान् प्राणो जनिमताम् ॥ ६ ॥

तस्यैव गगने प्राणस्य चरतः ।
भंगाः पुनरिमे वाताः कुर्मभितः ॥ ७ ॥

रुद्रः स निनदन् राजन् स मघवा ।
वातः स विचरन् नित्यं दिवि युवा ॥ ८ ॥

एवं गुणवशादेकस्य बहुता ।
तारात्मकवपुर्दृष्ट्या निगदिता ॥ ९ ॥

केचित्पशुपतिं शक्रं च पवनम् ।
देवत्रयमिति प्राहुर्गुणवशात् ॥ १० ॥

व्याप्तो दिवि सतश्चिद्वह्निरतुलः ।
नामान्तरवशात्तारान्निरमलः ॥ ११ ॥

आक्रम्य सकलं भान्तं बहुबलम् ।
गायामि विमलं चिद्बह्मिमतुलम् ॥ १२ ॥

मित्रं मम शिवो बन्धुर्मम शिवः ।
तातो मम शिवो माता मम शिवः ॥ १३ ॥

नेता मम शिवस्त्राता मम शिवः ।
राजा मम शिवो दैवं मम शिवः ॥ १४ ॥

चक्षुर्मम शिवः श्रोत्रं मम शिवः ।
स्वांतं मम शिवो बुद्धिर्मम शिवः ॥ १५ ॥

वाणी मम शिवः प्राणो मम शिवः ।
आत्मा मम शिवः सर्वं मम शिवः ॥ १६ ॥

अन्यप्रसृदितं स्वदेशं मवितुम् ।
वीर्यं मम धियः संवर्धय विभो ॥ १७ ॥

गायत्रमनघस्तोत्रं गणपतेः ।
एतच्छ्रृणु दयायुक्तः पशुपते ॥ १८+५४=७२ ॥

इति श्री भगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नृसिंहसूनोर्गणपतेः
कृतः शिवस्तवराजः समाप्तः

तन्त्रहृदयम्

अभिध्यानपटलः प्रथमः

श्रीकण्ठः केशवोऽकोरो निवृत्तिरलिकस्थली ।
प्रतिष्ठावृत्तमाकारोऽनन्तो नारायणोऽहिराट् ॥ १ ॥
इकारो माधवः सूक्ष्मो विद्या दक्षिणलोचनम् ।
शान्तिस्त्रिमूर्तिर्गोविन्द ईकारो वामलोचनम् ॥ २ ॥
अमरेशो विष्णुरुः स्यादिन्धिका दक्षिणश्रुतिः ।
षष्ठोऽधीशः श्रुतिर्वामा दीपिका मधुसूदनः ॥ ३ ॥
ऋकारो देविकानासा भारभूतिस्त्रिविक्रमः ।
ॠकारो वामनासा स्यान्मोचिका वामनोऽतिथिः ॥ ४ ॥
ऌकारः श्रीधरः स्थाणुः परा दक्षिणगण्डगः ।
सूक्ष्मा हरो हृषीकेशो दशमो वामगण्डगः ॥ ५ ॥
सूक्ष्मामृता पद्मनाभौ जिह्वष्टीशोष्ठभगा अयि ।
दामोदरोऽधरो ज्ञानामृतैकारस्तु भौतिकः ॥ ६ ॥
ओकाराप्यायनी सद्यो जाताः सङ्कर्षणो द्विजः ।
अथो द्विजो वासुदेव आविद्याप्यिन्यनुग्रहः ॥ ७ ॥
प्रद्युम्नो बिन्दुरक्रूरो व्योमरूपा बिलँशशी ।
सर्गो निरुद्धोऽनन्ताऽऽस्यम्महासेनो विसर्गकः ॥ ८ ॥
चक्री क्रोधीश्वरो ब्रह्मा कः सृष्टिर्दक्षिणो भुजः ।
दक्षिणः कूर्परः खः स्यादद्धिश्चण्डीश्वरो गदी ॥ ९ ॥
हेरम्बो मणिबन्धो गः शार्ङ्गी पञ्चातकः स्मृतिः ।
दक्षिणाङ्गुलिमूलं घः खड्गी मेधाशिवोत्तमः ॥ १० ॥
संज्ञैकरुद्रः शङ्खी स्यादङ्गुल्यग्रं ङकारकः ।
कूर्मश्चलो वामबाहुश्चोहन्ती स्वर्णदेवता ॥ ११ ॥
छः शनिः कूर्परो वामो मुसलीद्युतिरेकदृक् ।
जस्तु शूली स्थिरा वाममणिबन्धश्चतुर्मुखः ॥ १२ ॥
स्थितिर्वामाङ्गुलीमूलम्पाश्यजेशो झकारकः ।
यमः सर्वोङ्कुशी सिद्धिर्वामाङ्गुल्यग्रगश्च ञः ॥ १३ ॥

स्कन्दो मुकुन्दः सोमेशो दक्षिणोरुर्जरा च टः ।
नन्दजः पालिनी दक्षजानु-लांङ्गुलिनौ च ठे ॥ १४ ॥
क्षान्तिश्च क्षालको नन्दो डकारो दक्षगुल्मगः ।
ढोऽर्धयोषो नरः पादाङ्गुलीमूलग ऐश्वरी ॥ १५ ॥
उमेशो णो नरकजित्पादाङ्गुल्यग्रगो रतिः ।
तीव्रन्तकार आषाढी वामोरुः कामिका हरिः ॥ १६ ॥
कृष्णो दण्डी विशालाक्षी वामजानु थकारकः ।
अत्रीशोल्हादिनी सत्यो दः शैलो वामगुल्मगः ॥ १७ ॥
सव्यपादाङ्गुलीमूल-मध्येमीनप्रीतिसात्वताः ।
ये वामाङ्घ्र्यङ्गुलीभृङ्गनादिनीमेषशौरयः ॥ १८ ॥
लोहितो दक्षिणं पार्श्वं शूरस्तीक्ष्णनृपश्च पे ।
फकारे तु शिखीद रौद्री वामपार्श्वं जनार्दनः ॥ १९ ॥
अभयाभूधरः पृष्ठच्छगलाण्डो बकारकः ।
विश्वमूर्तिर्द्विरण्डेशो नाभिर्निद्रा भकारके ॥ २० ॥
मे महाकालवैकुण्ठतन्द्रोदरदिवाकराः ।
ये यामुनो रो वायुत्वग्वालिच्चुत्पुरुषोत्तमाः ॥ २१ ॥
दक्षिणं विग्रहस्यार्धं क्रोधिनी रुचिरो बलः ।
रक्तमग्निर्भुजङ्गेशो रेफस्तन्त्रेषु गीयते ॥ २२ ॥
पिनार्काशः ककुद्देशः क्रियाशक्तो बलानुजः ।
मांसधातुर्वसुमतीलकारः परिकीर्तितः ॥ २३ ॥
वामं कलेवरस्यार्धमुत्कारी यादसां पतिः ।
बालः खड्गीश्वरो मेदः सलिलं च वकारकः ॥ २४ ॥
हृदादिदक्षपाण्यन्तो वृषघ्नोऽस्थिबकेश्वरः ।
शङ्कुकर्णः सुखं मृत्युः शवर्णः परिकीर्तितः ॥ २५ ॥
हृदादिवामपाण्यन्तो मज्जाश्वेतेश्वरो वृषः ।
परुषश्च हरिद्राभाषकारः परिकीर्तितः ॥ २६ ॥
हृदादिदक्षपादान्तः शुक्रँ हँसाह्वयो भृगुः ।
समयः सङ्गतिश्चेति सकारः परिकीर्तितः ॥ २७ ॥
हृदादिवामपादान्तो वराहो न कुलीश्वरः ।
अरुणा गगनं प्राणो हकारः परिकीर्तितः ॥ २८ ॥
हृदयाद्युदरं श्यामा वकारो विमलः शिवः ।
संवर्तको हृदाद्यास्यं क्षे वक्त्रा नृहरिर्गृहम् ॥ २९ ॥

यत्राङ्गान्यविशिष्टानि संज्ञायामुत्तरत्र वा ।
भागो दक्षिण ऊर्ध्वो वा तत्र ग्राह्यो विचक्षणैः ॥ ३० ॥
संख्येयेन क्वचित्संज्ञाः सङ्ख्याभिरपि कुत्रचित् ।
क्वचिद्रूपेण योगेन क्वचिदाकृतितो लिपीः ॥ ३१ ॥
सद्योजातश्चन्द्रचूडस्त्रिमात्रस्त्रिवृदुच्यते ।
तारको ब्रह्मवेदादिस्तारश्च प्रणवो ध्रुवः ॥ ३२ ॥
चक्रीधराशान्तिरनुष्णभानुः श्लिष्टाः प्रसूनायुधबीजमुक्तम् ।
क्रोधीश्वरः कृष्णगतिस्त्रिमूर्तिः शशीमिलन्तोरसना च काली ३३
क्रोधीश्वरस्थानगते वराहे काव्येन गौरीगिरिजात्रपा च ।
लोकस्य राज्ञी हृदयस्य लेखा लोकश्च माया गिरिशस्य जाया ३४
वक्रे तु बीजं कमलासना या दामोदरश्चन्द्रयुतस्तु वाणी ।
प्राणोऽर्धिनाथामृतरश्मियुक्तः क्रोधस्य कूर्चस्य च बीजमुक्तम् ३५
अनुग्रहेशेन्दुयुतं वराहं प्रासादबीजं कथयन्ति सन्तः ।
नारायणश्चन्द्रयुतस्तु पाशः करेफतारा सहिता सृणिः स्यात् ३६
कालस्तु शक्तिः स चतुर्दशास्यो वधूः स तीव्रानलशान्तिचन्द्रः ।
यशस्विनी शापविवर्जिता सा तारैव तारागमविद्भिरुक्ता ॥३७॥
नादिनी कमलिनीप्रियसर्गैः पल्लवं तु हृदयस्य वदन्ति ।
संयुताः समयवारुणरोषाः शेषयुक् च नकुलीशिरसस्तु ॥३८॥
उद्वयं भणितमग्निकलत्रं पल्लवं तदिदमागमविद्भिः ।
वार्वृषोऽस्वरगुहश्च शिखायाः सेन्धिकेन्दुगगनं कवचस्य ॥३९॥
वार्यधोरदयुतं धवलेशो निःस्वरः शरभवो नयनानाम् ।
अस्त्रपल्लवमुदाहृतमार्यैः पान्त्यमस्वरचमूपतिचूडम् ॥४०॥

इति श्रीभगवद्रमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोः गणपतेः कृतौ तन्त्रहृदये वर्णबीजपल्लवाभिधानं नाम प्रथमः पटलः ॥

कालीपटलो द्वितीयः

शक्तेर्विभूतिभेदेन विद्याभेदाः प्रकीर्तिताः ।
तन्त्रेषु पूर्वैराचार्यैः ईश शीघ्रफलप्रदाः ॥ १ ॥
काली तारा सुन्दरी च भुवनेशी च भैरवी ।
छिन्ना ज्येष्ठा च बगला मानङ्गी कमलात्मिका ॥ २ ॥

(१) कालीमहाविद्या

जिह्वात्रयं कूर्चयुगं त्रपे द्वे सत्यो नृसिंहः सह माधवेन ।
रतिः सयोर्निद्रुहिणस्य वृत्तः पुरन्दरो दक्षिणनेत्रयुक्तः ॥३॥

क्रोधीशसूक्ष्मामृतयोः समेतं द्वन्द्वं पुनश्चक्रिगुणा रसज्ञा ।
क्रोधावुभौ लोकयुगं कृशानोःकान्तेति विद्या कथितेयमाद्या ॥४॥
भैरव-उष्णिक्काली मुनिमुख्या अस्य मन्त्रराजस्य ।
बीजमभाणि रसज्ञा शक्तिर्लोकोऽथ कीलकं क्रोधः ॥ ५ ॥
विनियोगः सर्वासां सिद्धीनां साधने समाख्यातः ।
षड्दीर्घयुक्तकाद्या करविन्यासस्तथाऽङ्गविन्यासः ॥ ६ ॥
निगृह्णन्ती चेतो निजपदरतानां रिपुगण-
प्रणाशं कुर्वाणा सकलवरदाऽऽपत्प्रशमनी ।
पिशाचस्त्रीवेषा सहकपटभूतेन विभुना
श्मशाने क्रीडन्ती हृदि वसतु काली मम सदा ॥ ७ ॥
निशि लक्षं दिवा लक्षं दिव्यभावमुपाश्रितः ।
संश्रितो वा वीरभावपशुभावौ जपेन्मनुम् ॥ ८ ॥
अयुतं जुहुयात्पश्चात्प्रयोगार्हो भवेन्मनुः ।
स्त्रियो न निन्देन्नो वीरान्कालीभक्तस्य तद्व्रतम् ॥ ९ ॥
करोतीत्यनया वृत्या निष्पन्नं बीजमादिमम् ।
इह तस्य षडावृत्या सृष्टौ शक्ततमो मनुः ॥ १० ॥
सर्वेषामपि भावानां स्रष्टा केवल ईश्वरः ।
तन्नियत्यविरोधेन नॄणां स्रष्टृत्वमिष्यते ॥ ११ ॥
यत्कवित्वप्रदा विद्या काल्या इत्यागमे प्रथा ।
विद्या-शक्त्येकदेशस्य बोद्धव्यं तत्प्रदर्शनम् ॥ १२ ॥
ईशः स्यात्सर्वसिद्धीनां विद्यामेतामुपाश्रितः ।
लोकेश्वरीचतुष्कस्य प्रभावात्साधको जनः ॥ १३ ॥
क्रोधबीजचतुष्कस्य प्रभावादहितक्षये ।
समर्थो मन्त्रराजोऽयं शिरसा तुष्टि-पुष्टिकृत् ॥ १४ ॥
भुवनान्तोचितं भीमं बिभ्रत्या अपि विग्रहम् ।
भक्तानुकूल्यं वक्तयत्र विद्यायां दक्षिणापदम् ॥ १५ ॥
कालमेव विदुः कालीं स्त्रीलिङ्गेन विपश्चितः ।
कर्मेन्द्रियं पाणिसंज्ञं कालीत्यध्यात्मचिन्तकाः ॥ १६ ॥
हरस्य पक्तु खलु शक्तिरेव कालीश्च काली च बुधैरभाणि ।
प्रपञ्चनाथस्य पुमाकृतित्वे नार्याकृतित्वं परदेवतायाम् ॥१७॥
पाणेः प्राधान्यतः प्राहुः क्रियासु सकलास्वपि ।
क्रियाशक्तिस्वरूपत्वात्कालिकां पाणिमिन्द्रियम् ॥ १८ ॥

आत्मा पक्ता स्फुरँश्चेति द्विविधः सम्प्रकीर्तितः ।
भूतानां परिणामस्य हेतुः पक्ता सदा ज्वलन् ॥ १९ ॥
मण्डले हृदये चेति द्वैविध्यं स्फुरतः स्मृतम् ।
आद्यो हिरण्यगर्भः स्याद्ब्रह्मा जीवोऽपरो विराट् ॥ २० ॥
जीवनामव्यक्तिपक्षे विराजः सूरयो विदुः ।
तस्यैव जातिपक्षे तु विष्णुनाम प्रचक्षते ॥ २१ ॥
पक्तारं सर्वभूतानां शिवमाहुर्महेश्वरम् ।
पक्तुश्च स्फुरतश्चापि विभेदो नास्ति वस्तुतः ॥ २२ ॥
जगत्कर्तुर्यथाऽस्माकं पाणिर्यद्यपि नेशितुः ।
व्यष्टौ विभूतिराद्या यास्तथाऽप्यत्र प्रदर्शिता ॥ २३ ॥

(२) आद्यैकाक्षरो

पृथक् चोपास्यमम्बाया बीजमन्त्रं प्रचक्षते ।
अष्टसिद्धीश्वरो वाग्मी तेन जप्तेन वा भवेत् ॥ २४ ॥

(३) कामकलाविद्या

अथानुविद्यामाद्याया वक्ष्ये कामकलाह्वयाम् ।
यस्यास्तन्त्रेषु बहुधा महिमा सम्प्रगीयते ॥ २५ ॥
कामो गणेशोऽनलशान्तिचन्द्री क्रोधः सतारो जलजातगर्भः ।
हृपूर्वकाद्री दहनत्रिकोणग्लावो युताः पञ्चमबीजमुक्तम् ॥ २६ ॥
वृत्तान्वितौ चक्रि-सहस्रनेत्रौ सूर्याजगर्भौ द्रुहिणः सवृत्तः ।
भूर्दक्षनेत्रेण विपर्ययेण बीजानि पञ्चाग्निवधूश्च मन्त्रः ॥ २७ ॥

ऋषिरस्य महाकालो बृहती छन्द उच्यते ।
काली कामकला नाम देवता परिकीर्तिता ॥ २८ ॥
प्रसूनमार्गणो बीजं क्रोधः शक्तिरुदीर्यते ।
कीलकं पञ्चमं बीजं विनियोगोऽखिलाप्तये ॥ २९ ॥
प्रत्येकं बिन्दुसंयुक्तनामाक्षरसमन्वितैः ।
बीजैस्तु पञ्चभिर्नाम्ना कराङ्गन्यास ईरितः ॥ ३० ॥

विविधप्रहरणविद्यापिधानवेर्बीं रिपुक्षये घोराम् ।
प्रेतभुवि सञ्चरन्तीं पिशाचिकावेषमद्भुतं दधतीम् ॥ ३१ ॥
आहितपशुभयमोहं कामकलानाम भावतो दधतीम् ।
समलङ्कृतां शिवाभ्यां पार्श्वद्वितये प्रचण्डराबाभ्याम् ॥ ३२ ॥

सर्वाङ्गशक्तिपूर्णां जम्बूफलमेचकामदुष्टाङ्गीम् ।
कालीं ज्वलन्निनयनां ध्यायेत्संहारनायकासक्ताम् ॥ ३३ ॥

पुरश्चरणमाद्यावदस्यास्तन्त्रेषु गीयते ।
साधने सर्वसिद्धीनामेषा विद्योत्तमोत्तमा ॥ ३४ ॥

(४) गुह्यकाली विद्या

आद्याया अनुविद्याऽन्या गुह्यकाली समीर्यते ।
संश्रितो गुह्यविद्यां यां सर्वसिद्धीश्वरो भवेत् ॥ ३५ ॥

ध्रुवो रौद्री जातवेदो योनिप्रद्युम्नसंयुता ।
हंसो विद्यायुतो युक्ताः शैलसात्वतमाधवाः ॥ ३६ ॥

दुहिणो दहनः शेषी शक्रो दक्षिणनेत्रवान् ।
क्रोधस्यानन्तरं बीजमाद्यायां समुदीरितम् ॥ ३७ ॥

एकनेत्रो धरापूर्वगोविन्दतुहिनांशुमान् ।
पूर्वं मन्दाक्षतो बीजमाद्यायां सम्प्रदर्शितम् ॥ ३८ ॥

सीमन्तिनी पुनर्बीजं द्वितीयमिह दर्शितम् ।
हृदयं वह्नितरुणी विद्येयं षोडशाक्षरी ॥ ३९ ॥

अथर्वा ऋषिरस्य स्याज्जगती छन्द उच्यते ।
देवता गुह्यकाली स्यात्क्रोधो बीजमुदीर्यते ॥ ४० ॥

शक्तिः स्यान्नवमं बीजं द्वितीयं कीलकं विदुः ।
द्विपञ्चत्रिद्विनेत्रद्विवर्णैर्न्यासः उदाहृतः ॥ ४१ ॥

ज्ञानरश्मिच्छटाटोपज्योतिर्मण्डलमध्यमाम् ।
लोकमानान्दशदिशः कार्यभारात्प्रतिक्षणम् ॥ ४२ ॥

ततः शीतां यतः सख्यो यतो भक्ताः शिवो यतः ।
अन्यतो दिक्षु सर्वासु प्रज्वलत्तीव्रलोचनाम् ॥ ४३ ॥

भीमाकर्षिणीं शूरां चञ्चलां धीमतीं दृढाम् ।
समदां सजवां सर्वग्राहिणीं सन्ततक्रियाम् ॥ ४४ ॥

विविधायुधविद्यासु निष्णातां शत्रुमर्दिनीम् ।
नायिकां सर्वसिद्धीनां गुह्यां कालीं विचिन्तयेत् ॥ ४५ ॥

शुद्धो लक्षं जपेन्मन्त्रमयुतं जुहुयाद्व्रती ।
ततः क्षमो भवेन्मन्त्रः सर्वसिद्धिप्रसाधने ॥ ४६ ॥

इति श्रीभगवद्रमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः
कृतौ तन्त्रहृदये कालीपटले द्वितीयः ।

तारापटलस्तृतीयः

तारा महाविद्या

५ तत्र व्यक्षरी

काञ्चिन्मायां पुस्कृत्य सकूर्चां दृश्यते वधूः ।
नीलां सरस्वतीमेतां प्राहुरागमपारगाः ॥ १ ॥

६ चतुरक्षरी

अन्ततो बिभ्रतीं शस्त्रं नीलामेकजटां विदुः ।

७ पञ्चाक्षरी

ध्वनन्तीमादितस्तारं तान्तु गायन्ति तारिणीम् ॥ २ ॥

तिसृणामृष्यादि

अक्षोभ्यमुनिरेतेषां बृहती छन्द इष्यते ।
त्रयाणामपि मन्त्राणां तारादेवी परात्परा ॥ ३ ॥

क्रोधो बीजं शिवा शक्तिः कीलकं वामलोचना ।
षड्दीर्घभाजा शिवया कराङ्गन्यास ईरितः ॥ ४ ॥

तारापरा वाक्कुहना पिशाची सिद्धीश्वरी सिद्धपतेर्वधूटी ।
नमन्मनोनिग्रहकृद्विपुघ्नी ग्रन्थिच्छदानन्दकरी विचिन्त्या ॥ ५ ॥

कामचारी जपेल्लक्ष - मयुत जुहुयाज्जनः ।
ततः सिद्धा भवेद्विद्या त्रिविद्याऽभीष्टसाधने ॥ ६ ॥

विद्येयमचिरात्सिद्धये - लब्धा नारी मुखाद्यदि ।
तस्मादस्याः प्रपश्यामो नारीगुरुपरम्पराम् ॥ ७ ॥

शापः कृष्णावतारान्त इति पक्षं समाश्रिताः ।
न पठन्ति भृगुं केचिद्वधूबीजे मनीषिणः ॥ ८ ॥

अस्तु वा मास्तु वा शापो भृगुरत्राधिको मनौ ।
अर्थतः शब्दतश्चापि गुणायैव प्रकल्पते ॥ ९ ॥

अक्षरस्याभ्यनुज्ञाता शक्तिश्चेच्छापमुक्तये ।
समयस्यावधिं तत्र प्रपश्यामो न सार्थकम् ॥ १० ॥

तस्माद्वसिष्ठशापस्य विमोक्षाय गुणाय च ।
पूर्णमेव वधूबीजं वक्तव्यं न भृगुं विना ॥ ११ ॥

महाचीनक्रमेणैता- मुपास्यामाहुरम्बिकाम् ।
विशुद्धो मानसो भावो महाचीनक्रमो मतः ॥ १२ ॥

सिद्धेन पित्रा मात्रा वा पुरश्चरितविद्यया ।
अकृत्तनाभेर्जातस्य जिह्वायां व्यक्षरो मनुः ॥ १३ ॥

लेख्यो गोरोचनाक्तेन कुशेन सकुमारकः ।
असंशयं भवेद्विद्वान्विधाता चाद्भुतो गिराम् ॥ १४ ॥
सकलमपिवा वेदार्णं वा गुणार्णमथापि वा ।
मुनिजननुतं तारामन्त्रं जपेद्यदि मानवः ॥
अमृतजलदीभूतः पूतः प्रयोगविशेषवित्
स इह वसुधालोके धारा गिरामभिवर्षति ॥ १५ ॥

इममभिमुखीभूता शातोदरी कमलालया
हयगजाघटापूर्णाऽभ्यर्णं समेत्य निषेवते ।
सविबुधमिदं विश्वं तस्य प्रयाति पुनर्वशं
प्रथितयशसां सिद्धीनां चाप्यमुं भजतेऽष्टकम् ॥ १६ ॥
सुविमलधियस्तस्य क्रोधाद्दगम्बुधुतद्युती
रिपुजनवधूगण्डाभोगो भवेदुत पाण्डुरः ।
स खलु भुवनव्याप्तं चाप्तैः प्रमाणपुरःसरं
भणितमजरं भद्रं ज्योतिः परं परिपश्यति ॥ १७ ॥

तारणादुदिता तारा वागेव जगतां प्रसूः ।
जनयन्ती विभोः शक्तिः सन्ततं शब्दमम्बरे ॥ १८ ॥
निनादो योऽयमव्यक्तः सन्ततः खे विजृम्भते ।
तपोदृष्टेषु मन्त्रेषु सगीतां ब्रह्मणस्पतिः ॥ १९ ॥
ब्रह्मणस्पतिमेवाहुरागमेषु गणेश्वरम् ।
तारागणेशजननी तस्मादार्यैः प्रकीर्तिता ॥ २० ॥
शब्दायमानस्य हरस्य शक्तिः तारा च वाक्चापि बुधैरभाणि ।
प्रपञ्चनाथस्य पुमाकृतित्वे नार्याकृतित्वं परदेवतायाः ॥ २१ ॥
वक्तुर्हिरण्यगर्भस्य शक्तिरुक्ता सरस्वती ।
ईशस्य तारा कथिता विशेषस्त्वनयोरयम् ॥ २२ ॥
अव्यक्तमेव प्रणवं जनयेदीशभारती ।
व्यक्ताश्च विविधा वाचः स्फुरतस्तु सरस्वती ॥ २३ ॥
ईशवाक्तामसी नीला व्यक्तो नाख्याध्वनिर्यतः ।
श्वेता हिरण्यगर्भस्य सात्त्विकी सत्यवादिनी ॥ २४ ॥
विराजो राजसी चित्रा वाणी विविधवादिनी ।
आद्ये तासामुपास्यत्वाद्देवते सम्प्रकीर्तिते ॥ २५ ॥
तारा तु प्रकृतिस्तासामन्ये तु विकृती मते ।
तारां निषेवमाणेन सर्वा वाणी निषेविता ॥ २६ ॥

सत्यमेव प्रवक्तव्यं ताराभक्तेन नानृतम् ।
अनृतं प्रवदन् पापो हन्यादेव सरस्वतीम् ॥ २७ ॥
भिन्नातिसृभिराख्याभिरेकरूपाऽपि वस्तुतः ।
द्वितीयैवं महाविद्या वर्णिता पापनाशिनी ॥ २८ ॥
क्रियाशक्तिः पिशाचीव वामैव भुवने सताम् ।
तस्मात्काली च तारा च पिशाच्यौ सम्प्रकीर्तिते ॥ २९ ॥

इति श्रीभगवद्रमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोः गणपतेः
कृतौ तन्त्रहृदये तारापटलस्तृतीयः ॥

सुन्दरीपटलश्चतुर्थः

त्रिपुरसुन्दरीमहाविद्या

तत्रादौ मूलम्

ब्रह्मा योनिः शान्तिरिन्द्रो भवानी प्राणो हंसः सृष्टिरभ्रं धरार्या ।
हंसो ब्रह्मा भूतधात्री शिवेति प्रोक्ता सेयं सुन्दरीमूलविद्या ॥ १ ॥

आधारविद्या

अत्राद्यानामक्षराणां त्रयं चेदभ्रं शुक्रं सृष्टिरन्त्यसमानम् ।
लोपामुद्रा नाम साहादिविद्या तामेवार्याः प्राहुराधारविद्याम् ॥ २ ॥

तारतम्यपूर्वक उभयत्र कूटविभागः

ब्रह्मा शक्रश्चोदितौ शैववर्णौ योनिः शान्तिर्भूर्भृगु· शक्तिवर्णाः ।
लोकेशानी शक्तिरुद्रोभयात्मा मूलं तस्माच्छक्तमाधारतः स्यात् ॥ ३ ॥
आद्यं कूटं वाग्भवं युग्मकेऽस्मिन्नार्गैरुक्तं कामराजं द्वितीयम् ।
तार्तीयीकं कथ्यते शक्तिकूटं कूटान्येवं त्रीणि विद्याद्वयेऽपि ॥ ४ ॥

षोडशी

पद्मा गौरी मन्मथो ब्रह्मजाया शक्तिस्तारः पार्वतीमात्रिकूटा ।
शक्तिर्वाणी कामलोकौ रमेति श्रीविद्येयं षोडशी मन्त्रराशी ॥ ५ ॥
शक्त्यन्तानामादितः कूटतोक्ता तारादीनां कूटतास्या त्रयाणाम् ।
शक्त्यादीनां कूटतोक्ताऽवसाने षट्कूटैवं मूलकूटैः सहेयम् ॥ ६ ॥
मूले येयं धस्रवर्णा त्रिकूटा षोडश्यां सा सम्प्रदाया त्रिवर्णी ।
तस्मादुक्ता नायिकेयं मनूनामष्टाविंशत्यक्षरी षोडशीति ॥ ७ ॥
श्रीबीजाढ्या षोडशी मूलविद्येत्येके प्राहुर्वर्णसङ्ख्यां भजन्तः ।
सङ्गच्छन्ते नैव तन्त्राणि तेषां नामव्याख्या नात्र किञ्चित्करी स्यात् ॥ ८ ॥

तिसृणामृष्यादि

मुन्याद्याः स्युर्दक्षिणामूर्तिपङ्क्ति-श्रीसुन्दर्योऽमुष्य मन्त्रत्रयस्य ।
बीजं प्राहुर्वाग्भवं शक्तिकूटं शक्तिं प्राहुः कीलकं कामराजम् ॥ ९ ॥

आवृत्तेन द्विस्तुमन्त्रेण मूलेत्वाधारे वा न्यास उक्तो बुधेन्द्रैः ।
षड्भिः कूटैरुच्यते मन्त्रनाथे ध्यायेत्पश्चात्सर्वलोकाधिराज्ञीम् ॥ १० ॥

बन्धूकपुष्पकमनीयरुचिस्त्रिनेत्रा
बालामृतांशुमुकुटोल्लसितदाखिलाम्बा ।
स्निग्धा शिवे रिपुजने कुपिता समस्त-
सम्मोहिनी नतहिता ललिता विचिन्त्या ॥ ११ ॥

एतेषु तन्त्रचयसारतयोद्धृतेषु
मन्त्रेषु धीरमतिरन्यतमं गृहीत्वा ।
लक्षं जपेद्दशगुणं जुहुयात्सहस्रं
सिद्धो मनुर्भवति काम्यजयाय पश्चात् ॥ १२ ॥

तत्पालये भगवती कमला स्थिरास्या-
त्सद्यो वशे भवति तस्य जगत्समस्तम् ।
सोऽयं कृती रमयते हृदयेन युक्ता
पीयूषसारतुलितैरनघैर्वचोभिः ॥ १३ ॥

निःशास्त्रवः स रमते चिरमत्र लोके
तं वृण्वते स्वयमुपेत्य च सिद्धयोऽष्टौ ।
साक्षात्करोति स परं भुवनस्य बीजम्
यः सुन्दरीं जपति पूतमना मनुष्यः ॥ १४ ॥

तत्त्वाक्षरीं निगमसारमुदाहरन्ति
मूलं त्रिकूटयुतमागमसारमाहुः ।
तच्चाभ्यषेच्यखिलमन्त्रगणाधिपत्ये
श्रेष्ठत्रिबीजकलितं शरबीजरुद्धम् ॥ १६ ॥

प्रज्ञानभूतेश्वरधर्मभूत- ज्ञानाग्निकेयं परदेवतोक्ता ।
हिरण्यगर्भस्य तु धर्मभूतं ज्ञानं चतुर्विंशतिवर्णगम्यम् ॥ १६ ॥

यत्र स्फुटं केवलमात्मरूपं तमीशबोधं कथयन्ति सन्तः ।
हैरण्यगर्भस्य उदारबोधो विभासते यत्र जगच्च सर्वम् ॥ १७ ॥

हिरण्यगर्भस्य सदा समाधि-ज्ञानं च लोकस्य विना विरोधम् ।
भोगाऽपरेषां निजरूपभोगी भेदाग्रहात्तस्य लयं प्रयाति ॥ १८ ॥

ईशेत्वसङ्कीर्णतया समाधिर्नित्यश्चिदानन्दमयोऽभिलाष्यः ।
तदेव तत्त्वं स्पृहणीयमस्याः श्रीमातुराचार्यमुखाच्छ्रुतं नः ॥ १९ ॥
बोधो विराजो विविधो विभाति विमुक्तये संसृतये च यः स्यात् ।
विमुक्तये स्यात्तपतः प्रबोधो बहिर्दृशः संसृतये विबोधः ॥ २० ॥
विराजिदेवीगतिरुत्तमा सा विद्येशितुभीति समाधिकाले ।
सैवान्यदा स्याद्विषयैर्विभक्ता नानेव यत्र प्रतितिष्ठतीदम् ॥ २१ ॥
हरस्य बोद्धुः खलु शक्तिरेव श्रीसुन्दरीधीश्च बुधैरभाणि ।
प्रपञ्चनाथस्य पुमाकृतित्वे नार्याकृतित्वं परदेवतायाः ॥ २२ ॥
वियत्त्वनन्तं परमं पुरं स्यात्सूर्यस्य बिम्बं तु पुरं द्वितीयम् ।
पुरं जनानां हृदयं तृतीयं मातुर्यदस्यास्त्रिपुरा तदेषा ॥ २३ ॥
प्राणेषु सेयं दशसु प्रदिष्टा चक्षुर्मयी चिन्मयशक्तिरम्बा ।
ध्येयं हि जाबालमुनिर्महात्मा तत्रैव बोधं निजमाबभाण ॥ २४ ॥
विभ्राजतेऽधो हृदयस्य मूलमग्रं भ्रुवोरन्तरतश्च कान्ति ।
देवी पुरत्वं ज्वलतोः स तस्मान्नासङ्गतं लोचनमण्डलस्य ॥ २५ ॥

य एवं विद्वांसो नयनयुगले वाऽथ हृदि वा
जगद्धात्रीं रात्रिप्रियतमकलाबद्धमुकुटाम् ।
विविक्ता रूपाद्यैरखिलविषयैः संविदमुमा-
ममुञ्चता नित्यं दधति सकलं तैः खलु जितम् ॥ २६ ॥

बाला

प्रीतये मनुविद्यामनुविद्या प्रोच्यते बहुगुणा त्रिपुरायाः ।
वाक्स्मरो भृगुरनुग्रहसर्ग- व्यक्षरीयमखिलागमगीता ॥ २७ ॥
श्रेष्ठमाहुरनुलोमविलोमा जप्यमानमिममुत्तममन्त्रम् ।
षोडशीवदृषिमुरुयममुष्याः देवता भगवती तु कुमारी ॥ २८ ॥
कूटानां त्रयमिव मूलमन्त्रराजे बीजानां त्रयमिह संज्ञया प्रदिष्टम् ।
विद्येयं भवति विराट्प्रबोधरूपा मूर्धास्या नयनयुगं च हृत्पुराणि ॥ २९ ॥
अनुलोम- विलोमतः षडङ्गं त्रितयेनात्र तु मूलवर्णकानाम् ।
परिशुद्धमनास्ततो मनुष्यो हृदि देवीमनुसन्दधीत बालाम् ॥ ३० ॥
अरुणा करुणातरङ्गिताक्षी सुभगा पातकहृत्कविर्जयन्ती ।
अमृतांशुकलाकनत्कलापा नववर्षा हृदि बालिका विचिन्त्या ॥ ३१ ॥
लक्षत्रितयं तु जप- स्त्रिंशत्साहस्रमुच्यते होमः ।
तदनु मनुः संसिद्धः साधयितुर्भवति कल्पद्रुः ॥ ३२ ॥

मैथिलास्तु कवयन्ति नीलया द्राविडास्तु कवयन्ति बालया ।
तद्वचोमृतवितृप्तचेतसां किं नु वामनयनोष्ठलालया ॥ ३३ ॥

उपसंहारः

एतास्तिस्रः परा विद्याः काली तारा च सुन्दरी ।
आद्ये भेदौ क्रियाशक्तेर्ज्ञानशक्तिरथोत्तरा ॥ ३४ ॥
पाणित्वं स्थूलदृष्टयोक्तं प्राणरूपैव कालिका ।
चक्षुस्त्वं स्थूलदृष्टयोक्तं चितिरूपैव सुन्दरी ॥ ३५ ॥
गृहीत्वा तु चितिच्छायां प्राणो वागात्मतां व्रजेत् ।
तद्वाक् प्रवहति ज्ञानं क्रियारूपाऽपि वस्तुतः ॥ ३६ ॥
विरला ज्ञानशक्तिः स्याक्रियाशक्तिर्घनां मता ।
विरलत्व-घनत्वाभ्यां शक्तेर्द्वैविध्यमागतम् ॥ ३७ ॥

इति श्रीभगवद्रमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः
कृतौ तन्त्रहृदये सुन्दरीपटलश्चतुर्थः ॥

भुवनेश्वरीपटलः पञ्चमः

भुवनेश्वरीमहाविद्या

अरुणां केवलामुक्त्वा क्रोधिनीमथ केवलाम् ।
शान्तिं ततः समुच्चार्य व्योमरूपां समुद्धरेत् ॥ १ ॥
चतुर्थीयं महाविद्या चतुःशक्तिसमुद्भवा ।
ऋष्याद्याः शक्तिगायत्री-भुवनेशयः प्रकीर्तिताः ॥ २ ॥
षड्दीर्घयुक्तबीजेन षडङ्गन्यासमाचरेत् ।
अथ ध्यायेन्महादेवीं सर्वभूतैकमातरम् ॥ ३ ॥
पापघ्नी वत्सला सर्व-दायिन्यापत्प्रणाशिनी ।
तप्तकार्तस्वरच्छाया ध्येया चित्तेन शाम्भवी ॥ ४ ॥
द्वात्रिंशच्छतसाहस्रं जपेद्विद्यामनन्यधीः ।
परमं पश्यति ज्योतिः सर्वग्रन्थीन्विभिद्य सः ॥ ५ ॥
मूलविद्या यथाऽम्बायाः सावित्रोतो विशिष्यते ।
तथाऽम्बाबीजविद्येयं प्रणवाच्च विशिष्यते ॥ ६ ॥
ऋचस्तु योनिं भूतानामाकाशमदितिं विदुः ।
भणन्त्यनन्तां तामेव तन्त्राणि भुवनेश्वरीम् ॥ ७ ॥
अधः पृथिव्याश्च दिवः परस्ताद्यच्चान्तराद्दृश्यमिदं समस्तम् ।
वदत्यमुष्यामदितौ तदोतं प्रोतं च गार्गी प्रति याज्ञवल्क्यः ॥ ८ ॥

ओतं च प्रोतमेतस्यामदितौ भुवनं यतः ।
तदेषा प्रकृतिः प्राज्ञैरुच्यते भुवनेश्वरी ॥ ९ ॥
ईशस्य प्रथमा दृष्टिराकाश इति भण्यते ।
अशेषश्लोकचित्राणां भित्तिरन्तविवर्जिता ॥ १० ॥
इच्छाशक्तिरियं ज्ञेया परमस्य महेश्वरी ।
इच्छेक्षा प्रथमा दृष्टि - रित्यनर्थान्तरं भवेत् ॥ ११ ॥
प्रथमेक्षा यथाऽस्माकं स्वप्ने देशाय कल्पते ।
प्रथमेक्षा तथेशस्य सर्गे देशाय कल्पते ॥ १२ ॥
अनन्तराणां वृत्तीनामुक्ता ज्ञान-क्रियात्मता ।
व्यापारः प्रथमः शक्तेर्देशभाव उदाहृतः ॥ १३ ॥
भित्तिस्थानं विनादेशं न च ज्ञानं न च क्रिया ।
तच्चतुर्थीं विना देवी न तृतीया न चादिमे ॥ १४ ॥
तामेतामखिलेशानीं मूलप्रकृतिमव्ययाम् ।
भित्तिभूतामशेषस्य मायां प्राज्ञाः प्रचक्षते ॥ १५ ॥
व्याप्तस्य सर्वत्र हरस्य शक्तिर्देशश्च माया च बुधैरभाणि ।
प्रपञ्चनाथस्य पुमाकृतित्वे नार्याकृतित्वं परदेवतायाः ॥ १६ ॥
पिण्डेषु भुवनेशानी श्रोत्रमिन्द्रियमीर्यते ।
श्रुत्यन्तचिन्तकैः श्रोत्रं दिग्दैवत्यं हि कथ्यते ॥ १७ ॥

सारस्वतचिन्तामणिः

मन्त्रोऽयं भुवनेश्वर्याः संरुद्धस्त्रिवृता यदि ।
भवेच्चिन्तामणिर्नाम श्रेष्ठः सारस्वतप्रदः ॥ १८ ॥

अन्नपूर्णा

अनुविद्यामथैतस्याश्चतुर्थ्याः परिचक्ष्महे ।
दारिद्र्यं दूरतः कुर्यात्साधको यामुपाश्रितः ॥ १९ ॥
आदिः श्रुतीनां भुवनस्य राज्ञी शुद्धान्तनारी मधुसूदनस्य ।
प्रसूनबाणो हृदयं द्विरण्डः पञ्चान्तको वारिहरिः ससूक्ष्मः ॥ २० ॥
त्विषांपतिर्माधवमञ्चशायी श्लिष्टोऽथ सूक्ष्माऽमृतया वराहः ।
ऊष्मादिरन्तस्थसमापकेन साकं सवामेतरलोचनोऽग्निः ॥ २१ ॥
आदिः स्वराणामनुनासिके द्वे दन्त्ये युतेऽर्धांशयुतोनृपालः ।
रतित्रिकोणी दहनस्तदन्तः पुरेश्वरी चेतिमनुर्नखार्णः ॥ २२ ॥
ऋषिः स्यान्नाभिजन्माऽस्य छन्दः कृतिरुदीर्यते ।
देवतात्वन्नपूर्णेशी बीजादि गिरिजादिकम् ॥ २३ ॥

षड्दीर्घभाजा बीजेन कराङ्गन्यासमाचरेत् ।
ततो ध्यायेदन्नपूर्णां विशालाक्षीं महेश्वरम् ॥ २४ ॥
तप्तस्वर्णरुचिः सुधांशुमुकुटक्षोणीरमासेविता
माणिक्याभरणान्विता विरजसी चित्रांशुके बिभ्रती ।
अन्नं विग्रहधारिणे प्रददती नेत्रत्रयोल्लासिनी
विश्वाधीश्वरनाट्यलोकनरता ध्येयान्नपूर्णेश्वरी ॥ २५ ॥
लक्षमेकं जपेद्विद्यां जुहुयादयुतं जनः ।
ततो भवेत्प्रयोगार्हः सोऽयमत्युत्तमो मनुः ॥ २६ ॥

इति श्रीभगवद्रमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोः गणपतेः
कृतौ तन्त्रहृदये भुवनेश्वरीपटलः पञ्चमः ।

षष्ठस्त्रिपुरभैरवीपटलः

त्रिपुरभैरवी महाविद्या

नकुलिहंसकृशानुगिरोयुताः प्रथमबीजमुदारमुदाहृतम् ।
अरुणया भृगुणायुतमादितः सदहनं स्मरबीजमनन्तरम् ॥ १ ॥
किटिशरीरभृता परिचुम्बिता भवति शक्तिरधो सधनञ्जया ।
इयमशेषमनोरथदायिनी सकलतन्त्रनुता खलु पञ्चमी ॥ २ ॥
बालाविद्यावदत्रापि बीजानां नामभिस्त्रिकम् ।
ऋष्यादि च विशेषस्तु देवी त्रिपुरभैरवी ॥ ३ ॥
आद्येन षड्दीर्घयुजा षडङ्गन्यास ईरितः ।
ततो ध्यायेज्जगद्धात्रीं देवीं त्रिपुरभैरवीम् ॥ ४ ॥
सोमशेखरा रामलोचना मुण्डमालिका कण्ठभूषणा ।
चण्डशासना मोहिनी वरा भीतिदा गतिर्भैरवी मम ॥५॥
लक्षत्रयं जपेद्विद्यां दशांशं जुहुयाद्घृती ।
एवं सिद्धे मनौ मन्त्री काम्यकर्माणि साधयेत् ॥ ६ ॥
तृतीया यादृशी विद्या तादृशीं पञ्चमीं विदुः ।
तयैव सकलं साध्यमनयाऽपि च विद्यया ॥ ७ ॥
तेजस्त्रिपुरभैरव्यास्तत्त्रयमालोकितं बुधैः ।
पृथिवी चान्तरिक्षं द्यौरस्यास्तिस्रो मताः पुरः ॥ ८ ॥
पृथिव्यामग्निरूपेयमन्तरिक्षे तटित्तनुः ।
दिवि भास्करबिम्बात्मा शक्तिस्त्रिपुरभैरवी ॥ ९ ॥

प्रकाशकस्यैव हरस्य शक्तिर्भा भैरवी चापि बुधैरभाणि ।
प्रपञ्चनाथस्य पुमाकृतित्वे नार्याकृतित्वं परदेवतायाः ॥ १० ॥
वह्नियः प्रथमे बीजे कृष्णवर्त्मा स पार्थिवः ।
बीजे वह्निद्वितीये यः स शक्रस्तडिदात्मकः ॥ ११ ॥
तृतीयबीजे यो वह्निर्मण्डलात्मा स भास्करः ।
एवं विदित्वा यो विद्वाञ्जपेत्तेनाखिलं जितम् ॥ १२ ॥
तेजो यद्रोचकं नाम त्वगिन्द्रियमुपाश्रितम् ।
अधिपिण्डं तदम्बायाः स्वरूपं परिचक्षते ॥ १३ ॥
तेजः सह कृतेनैव गृह्यते मातरिश्वना ।
स्पर्शः सञ्जच्छते तस्मात्तेजोरूपं त्वगिन्द्रियम् ॥ १४ ॥

इति श्रीभगवद्रमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः
कृतौ तन्त्रहृदये षष्ठस्त्रिपुरभैरवीपटलः

अक्षरतत्त्वम्

श्रीकण्ठानन्तसूक्ष्माख्यांस्त्रिमूर्तिममरेश्वरम् ।
अर्थीशं भारभूतिं चातिर्थीशं स्थाणुकं हरम् ॥ १ ॥
झिण्टीशं भौतिकं सद्योजातं चानुग्रहेश्वरम् ।
अक्रूरं च महासेनं स्वररुद्रान्नमाम्यहम् ॥ २ ॥
अन्याक्रोधीशचण्डेशपञ्चान्तकशिवोत्तमान् ।
एकरुद्रं च कूर्मेशमेकनेत्रं चतुर्मुखम् ॥ ३ ॥
अजेशं सर्वसोमेशौ लाङ्गलीशं च दारकम् ।
अर्धनारीश्वरं चोमाकान्तमाषाढिदण्डिनौ ॥ ४ ॥
अत्रि मीनेश मेषेशौ लोहितं शिखिनं तथा ।
छगलाण्डं द्विरण्डेशं महाकाल च वालिनम् ॥ ५ ॥
भुजङ्गेश-पिनाकीशखड्गीशान्बकमर्जुनम् ।
भृगुं च नकुलीशानं शिवं संवर्तकं नुमः ॥ ६ ॥
केशवाद्यनिरुद्धान्ताः प्रोदिताः स्वरविष्णवः ।
चक्री गदायुधः शार्ङ्गी खड्गी शङ्खी हलायुधः ॥ ७ ॥
मुसली शूलहस्तश्च पाशवानङ्कुशी तथा ।
मुकुन्दो नन्दजो नन्दी नरो नरकजिद्धरिः ॥ ८ ॥
कृष्णः सत्यः सात्वतश्च शौरिः शूरो जनार्दनः ।
भूधरो विश्वमूर्तिश्च वैकुण्ठः पुरुषोत्तमः ॥ ९ ॥

बलो बलानुजो बालो वृषघ्नवृष-हंसकाः ।
वराहो विमलः पश्चान्नृसिंहो विष्णवो हलाम् ॥ १० ॥

नियतिश्च प्रतिष्ठा च विद्या शान्तिरथेन्धिका ।
दीपिका देविका पश्चान्मोचिकाऽऽनन्तरं परा ॥ ११ ॥

सूक्ष्मासूक्ष्मामृता ज्ञानामृता चाप्यायनी ततः ।
व्यापिनी व्योमरूपा चानन्ताः स्युः स्वरशक्तयः ॥ १२ ॥

सृष्टिश्चार्द्धिः स्मृतिर्मेधासंज्ञा काञ्चनदेवता ।
द्युतिः स्थिरास्थितिसिद्धिर्जरा तदनुपालिनी ॥ १३ ॥

क्षान्तिर्माहेश्वरी पश्चाद्रतिस्तनुकामिका ।
विशालाक्षी ह्लादिनी च प्रीतिस्तदनुनादिनी ॥ १४ ॥

तीक्ष्णा रौद्र्यभया निद्रा तन्द्राक्षुत्क्रोधिनी क्रिया ।
उत्कारी मृत्युसंज्ञाऽथ पीता तदनुसङ्गतिः ॥ ॥ १५ ॥

क्षरुणा श्यामला वज्रा स्मृता व्यञ्जनशक्तयः ।
वर्णानामेवमीशानविष्णुशक्तिस्वरूपता ॥ १६ ॥

भूतान्यजगवी बालो बलो वाली वराहकः ।
सप्तवालिनमारभ्य धातवः सम्प्रकीर्तिताः ॥ १७ ॥

चन्द्र-सूर्यौ समाख्यातावनुस्वार-मकारकौ ।
गकारश्च टकारश्च गजानन-षडाननौ ॥ १८ ॥

स्मृताः कला ज वा वर्णा ब्रह्मेन्द्रयमपाशिनः ।
काल्पः सकारः सम्प्रोक्तो हकारः प्राण उच्यते ॥ १९ ॥

इत्यक्षरतत्त्वं संपूर्णम्

इति श्रीभगवद्रमणान्तेवासिनो वासिष्ठस्य नरसिंह-
सूनोर्गणपतेः कृतौ तन्त्रहृदयं समाप्तम् ॥

Aryasomayajulavari, Vamsavali, Emigrated From Ve
Krishnarayapuram) Sri Nalla Vajl

Sri Ganapathi Vajhulu, (A

Sri Kasipathi Va

(1) (2) (3)

Bhavani Shankaram — Kasipathi — Venkayya

(Two wives)

Second wife

Lakshmamma

(1) (Kasipatnam) (2)

Venkatesam — Narasimham

Lakshminarasamma — Verámma

(Mukhalingam)

Venkayya (Daivagjna)

Varahalamma

(1) (2) (3) (4)

Madhukeswara — Bhaskararao — Suryanarayana sastry — Rangan

Kannathalli — Ramanamma — Sanyasamma — Swamy

Kamala

Aswinikumar

Satyanarayana

Gopalini

Jayalakshmi

Suryakumari

Nirmala

Charumati

Savitri

3, 13, 18, 28, 43
24, 34, 40, 43
51, 53, 42, 77

langaman, Tanjore-Tamilnad (1785). (Bommikapadu-
ulu. (Bommikapadu-Vedic Scholar)
|
uthority on Mantra Sastra)
|
jhula, Bovvamma

(4)	(5)	(6)	(7)
Veeresem	Arunachalam	Vichamma [Ganapathi Muni's Grand Mother]	Papamma

	(5)	(6)	(7)	(8)	(9)
adha	Satyanayana Janakamma	Ramarao Vimala	Vimala Anjeneyulu	Kamala Appala Narsayya Pantulu	Ramana Venkata Rama Sastry

ॐ

॥ उमाशतकम् ॥

—••०••—

॥ प्रथमं दशकम् ॥

फुल्लत्वं रविदीधिति निरपेक्ष मुमामुखाब्जस्य ।
पूर्णं करोतु मानस मभिलाषं पुण्यभूमिजुषाम् ॥ १

कैलासवासिनी वा धवलद्युति बिम्बनिलया वा ।
आकाशान्तरपीठ स्थितोत मे देवता भवति ॥ (स्थिता+उता) २

आकाशान्तरपीठ स्थितैव साक्षा त्पराशक्तिः ।
तस्या अंशव्यक्ती शशिनि सिताद्रौ च राजन्त्यौ ॥ ३

संकल्पवातसंगा दानन्दरसो घनीभूतः ।
अन्त र्व्यापकशक्तेः समपद्यते वपुर्मातः ॥ ४

इच्छाविचित्रवीर्या त्तेजःपटलो घनीभूतः ।
अन्तर्व्यापकशक्तेः समपद्यते विभो गात्रम् ॥ ५

इच्छायोगा त्तेजसि तव भागः कश्चि दस्तीशे ।
विज्ञानयोगतो मुदि भाग्य स्त्वयि कश्चि दीशस्य ॥ ६

सम्राजौ शशभृति यौ गृहवन्तौ यौ च सितगिरिणा ।
तदिदं युवयो र्माया वेषान्तरमिथुनयुगल मुमे ॥ ७

यद्यपि विभूति रधिकं युवयो र्विश्वाम्बिके भवति ।
मिथुने तथा प्यमू वां नेदिष्ठे देवि पश्यामः ॥ ८

दंपत्यो र्भगवति वां प्रतिबिम्बौ भास्करे भवतः ।
देहभुवौ भूचक्र स्वप्नव्यक्ती सुधामहसि ॥ ९

देहे भुवः प्रतिबिम्बः प्राणा न्मूलस्य नेदीयान् ।
प्रतिबिंबव्यक्ते श्च स्वप्नव्यक्ति श्च नेदिष्ठा ॥ १०

॥ द्वितीयं दशकम् ॥

काश्मीर मुन्नतपयोधर कुंभसीम्नि स्निग्धं प्रदिग्ध मचलात्मजयाऽवता नः ।
भेत्ता पुरा मुपरि भस्मन एव धत्ते रागस्य चिह्न मिव य त्परिरंभलग्नम् ॥ १

अस्माक मम्बुदघनस्तनितोपमेषु हेरंबबृंहित विभूतिषु भाषि तेषु ।
सिद्धोद्यमान मतिलंघ्य निजापदानं बद्धश्रुति र्भवतु भर्गगृहस्य नेत्री ॥ २

सन्देह एष मम चन्द्रकलाधरस्य शुद्धान्तसुन्दरि मनांसि सतां ममाङ्घ्रिः
द्वानि किं विशति किंनु भजन्ति शुद्धिं अङ्घ्रेः प्रवेश मम तानि विधूय पङ्कम् ॥ ३

शैक्यपालनविधायि विकस्वराब्ज शोभाविडंबि मणिपीठतटीविलम्बि ।
क्षेमप्रदायि हृदये चरणं न्यधायि गौरि त्वया यदि कुत श्चपलं मनो मे ॥ ४

विघ्नानि य न्मुहु रिदं च मन श्चलं य त्सौख्यं न किंचिदपि यद्यदुपर्य सौख्यम् ।
त्वा माश्रितस्य च ममा खिललोकराज्ञि मत्तः परो जगति को मनुजेषु कल्की ॥ ५

मा भू न्निदेशवचनं नयनाञ्चलस्य माभू त्प्रसारण मयि त्यज निर्दयत्वम् ।
अंगीकुरु स्तुतगुणे चरणाम्बुजं ते ध्यातुं तदेव बहु मे भुवनस्य मातः ॥ ६

कामं ददातु न दादतु मनो धिनोतु नो वा धिनोतु नयता द्विव मन्यतो वा ।
आत्मर्पितोऽय मगजा पदपंकजाय किं कांक्षते प्रतिपदं विपुलो नुरागः ॥ ७

पादं ददासि मनसे किमु पापिनो मे पारिप्लवाय भुवनाधिकवासनाय ।
दूरे स तावद चलेन्द्रकुमारि कामो देवि प्रणाम मुररीकुरु तावताऽलम् ॥ ८

आराधनं तव भवानि यथाविधानं कर्तुं कुलाचलकुमारि न पारयामि
पादारविन्दयुग मेव तवानतोऽहं पापाकुलः शरण मीश्वरि कांक्षमाणः ॥ ९

बद्धव्रता प्रणतपापनिवारणे त्वं बद्धाञ्जलिश्च बहुपापसमाकुलोऽहम् ।
कर्तव्य मद्दितनये निपुणं विमृश्य निर्धारयात्र न यथा यशसो विलोपः ॥ १०

॥ तृतीयं दशकम् ॥

व्रतं तव विद न्हृदि प्रणतपापनाशे कृतं
फलप्रवणपातकप्रमथितो ऽ पि नास्म्याकुलः ।
भवामि शिरसा नत स्तव भवानि पादाम्बुजं
व्रतस्य परिपालनेयदि मति र्गति र्मे भव ॥ १

तपश्चरितु मुत्तमं प्रयतितं मया नैकदा
परं तु बहुलै रघैः परिणतैः वृतो ऽ ध्वा मम ।
अयं मम दृढो ऽ ञ्जलि स्तनुवियोगकालावधि
र्यदि त्व मचलव्रता स्यचलकन्यके मा भव ॥ २

अजेयबहुपापभृ द्भुवि जनिष्यमाणः खलः
कि मीशदयिते पुरा न विदित स्तवायं जनः ।
व्रतं कृत मिदं त्वया परमसाहसोपेतया
क्व वा ज्ञननि योषितां जगति दीर्घ मालोचनम् ॥ ३

इहा पु रघमर्षणा न्ययश एव भूत्वा मुधा
व्यलोकि नियमै स्तथा न बहुलै श्च कश्चि ज्जयः ।
स्थिरं न मदघःक्षये मदघतेजसा भूयसा
व्रतं च तव कुण्ठितं यदि ममैव कीर्तिः परा ॥ ४

क्षये यदि मदेनसा मसुकरेण धीरं मनो
न ते नगपतेः सुते किमपि चिन्त्य मेतत्कृते ।
व्रतं विसृज तन्मुधा ननु वधूस्वभावा त्कृतं
स्थिरीभवतु दुर्विधिः भुवि तव प्रसादा द्बली ॥ ५

कृतं परम यत्नतः चिर मनुज्झितं श्रद्धया
भृतं बहुविधोद्यमै रविजितं महापातकैः ।
गतं घनतरं यशो जयति पापजातं मम
व्रतं च तव तादृशं जननि कस्य वा स्या ज्जयः ॥ ६

मदीयदुरितावली प्रलयकाल कादम्बिनी मदोन्नतविजृम्भणं वृजिनभङ्गवद्व्रते ।
भवप्रियतमे निजप्रबलहुंकृतिप्रोद्धत प्रभञ्जनमहौजसा शमय पाल यात्मव्रतम् ॥ ७

अघक्षयविधौ तु ते परिणता परोपकृता
विभेदकथनं कथं पृथुलवैभवे युज्यते ।
इदं तव विगर्हणं परिणतैनसां वा स्तुतिः
मनो यदि मृडानि ते जगति साध्य मेवाखिलम् ॥ ८

सहस्रनयनादिभिः सुरवरैः समाराधिता सहस्रकिरणप्रभा सितमरीचिशीता मम ।
सहस्रदळपंकजे कृतनिकेतना देहिनां सहस्रदळलोचना दुरितसन्ततिंकृन्ततु ॥ ९

सरोजभवसंस्तुता सकललोकराज्येश्वरी करोपमितपल्लवा करुणाया न्तरुल्लोलिता ।
उरोरुहभरालसा मयपुरारिसंमोहिनी करोतु मदघक्षयं कुमुदलोचना काचन ॥ १०

॥ चतुर्थं दशकम् ॥

कालाम्भोधरचारुसान्द्रकबरी पूर्णेन्दुबिम्बानना
ताटंकद्युतिधौतगण्डफलका ताम्बूलरक्ताधरा ।
प्रालेयद्युतिबालकेन रचितोत्तंसा हराङ्कासना
शान्ता नूतनपल्लवाभचरणा भूत्यै शिवा चिन्त्यते ॥ १

श्रीपादं तवशैलराजदुहितः भास्वत्करास्फालन
प्रोद्बुद्धांबुजसुन्दरं श्रुतिवधूचूडातटीलालितम् ।
वन्दन्तां त्रिदिवौकसः प्रणयतः संवाहयत्वीश्वरो
योगी ध्यायतु वन्दिव द्भगवति प्रस्तौति सोऽयं जनः ॥ २

यस्या श्चामरधारिणी सरसिज प्रासादसञ्चारिणी
पौलोमी हृदयेश्वरप्रभृतयो नाकौकसः किंकराः ।
देवः कैरवबन्धुकोरकधरः लीलासहायः सखा
तस्याः पादसरोजवन्दिपदवीं प्राप्तो स्म्यहं भाग्यतः ॥ ३

पादस्य क्रियते क्षणा न्कतिचन ध्यानं जगद्धात्रि ते
य त्तस्येभघटाकुलाङ्गनमहीश्री र्नानुरूपं फलम् ।
नो द्वारो मधुमाधुरीमधुमुषां स्वाभाविको वा गिरां
साधीयस्तु फलं य दीश्वरि पुन र्ध्यातुं मति र्जायते ॥ ४

देवि त्वच्चरणारविन्दयुगळध्यानस्य केचि त्फलं
मन्यन्ते रथवाजिसामजवधूसौधादिरूपां श्रियम् ।
पीयूषद्रवसार वैभवमुषां वाचां परे पाटवं
प्राज्ञाः साधन मादितः परिणतौ प्राहुः फलं तत्स्वयम् ॥ ५

लोभः कुत्रचि दस्ति कुत्रचिद सौ रोषः परं भीषणः
कुत्राप्येष मनोभवोऽतिमलिने स्वान्ते निशान्ते मम ।
एतस्या प्यह हाद्रिराजतनुजे कोणे त्वदीयं पदं
खेटीमस्तकलालितं शुचितमं वाञ्छामि कर्तुं खलः ॥ ६

कन्दर्पेण निवारितं प्रहसता लोभेन निर्भर्त्सितं
मात्सर्येण तिरस्कृतं मदमहानागेन चाऽभिद्रुतम् ।
दुर्भ्रान्त्या गलहस्तितं बत पुनः क्रोधेन धूतं बला
दप्येत त्पद मम्ब ते विशति मे चेतोऽस्य वर्ण्या कृपा ॥ ७

उद्दीप्य न्नखरांशुजालजटिलः त्वत्पादकंठीरवो
यावन्मीलितलोचनः शशिकलाचूडामणे र्वल्लभे ।
ताव ल्लोभकिटि र्विखेलति मदं पुष्णाति कामद्विपो
रोषद्वीपिपति श्च गर्जतितरां मन्मानसे कानने ॥ ८

चांचल्यं हृदयस्य नक्ष्यति कथं युष्मत्प्रसादं विना
त्वं वा देवि कथं प्रसीदसि यदि स्थैर्या दपेतं मनः ।
अन्योन्याश्रयदोष एष सुमहा नन्यं विधिं स्थापय
त्यस्माकं वरदे तवोत करुणां निर्हेतुकां जन्तुषु ॥ ९

भक्ति र्मे त्वयि भर्गपत्नि महती ध्यातुं च वाञ्छामि ते
पादाम्भोजयुगं तथापि चलतां चेतो न मे मुञ्चति ।
कामाः सन्ति सहस्रशः नगसुते पश्चा द्ब्रवीम्यग्रतः
चित्तस्य स्थिरतां प्रदेहि करुणा यद्यस्ति ते वस्तुतः ॥ १०

॥ पञ्चमं दशकम् ॥

उडुराज कलाकलाप कान्ते सदये सुन्दरि कोमलाङ्गि मातः ।
श्रुतिपद्मदृशा ततं सितं ते पदपद्मं प्रतिभातु मानसे मे ॥ १

अरुणाचलनाथ सद्मनाथे चरितं ते चरणस्य धात्रि चित्रम् ।
क्रियतेऽब्जसनाभि नामुना य द्वतपंके मुनिमानसे निवासः ॥ २

चरितं चरणाम्बुजन्मन स्ते परमं विस्मय मातनोति मातः ।
अतिरागवद प्यदो विधत्ते सहवासेन यदन्तरं विरागम् ॥ ३

भवभामिनि कर्मशर्मदातुः भवदीयस्य पदस्य विस्मयाय ।
अपि धूलिविधूसरं विधत्ते यदिदं वीतरजो मनो मुनीनाम् ॥ ४

चरणं जगदम्ब कैटभारि र्यतमानोपि ददर्श नैव यस्य ।
स विभु स्तव दृश्यते विलग्न श्चरणे चण्डि चराचराधिनाथः ॥ ५

कमलासन कंजलोचनादी नवमत्य त्रिदशा नगेशकन्ये ।
अगुणे रमसे नगेऽत्र शोणे क्व गुणा न्पश्यति जातिपक्षपातः ॥ ६

कुसुमा दपि कोमलं वपु स्ते हृदयेश स्त्वरुणो गिरिः कठोरः ।
प्रचलाखुतुरंगमस्य मातः समनुध्याय बिभेमि चेत सेदम् ॥ ७

य दसौ विहितः सितोऽरुणाद्रि स्तव हासेन सितेन ना त्र चित्रम् ।
इद मद्भुत मस्य मानसं य द्विमलं पार्वति नीयतेऽतिरागम् ॥ ८

नवकुंकुमरेणु पंकिलस्य स्मरणा त्ते सतंत स्तनांचलस्य ।
स्वय मप्यचलो वभूव शोणः शशिधारी जगतां सविस्मयाय ॥ ९

स्मरणा दरुणाचलस्य मुक्तिः कथ मक्षीलकपाल भूषणस्य ।
वपुषोऽर्ध ममुष्य चे न्नचेत स्तिमिरध्वंसिनि सर्वमंगळे त्वम् ॥ १०

॥ षष्ठं दशकम् ॥

गौरि चंडि कालिके गणाधिनायका म्बिके स्कन्दमात रिन्दुखंडशेखरे परात्परे ।
वज्रनायिके प्रपंचराज्ञि हैमव त्युमे भर्गपत्नि पालयेति गीयतां सदा सखे ॥ १

वासुदेव वासवादि देव मौलिविस्फुर द्रत्नजाल रश्मिजात रंजितांघ्रिपंकजे ।
शीतभानुबालचूड चित्तजालडोलिके शैलपालबालिके सदा वदामि नाम ते ॥ २

कल्पवल्लि गायतां नितंबिनीमतल्लिके नाम ते विपश्चितो निरन्तरं गृणन्ति ये ।
दैत्यजैत्रि लोकधात्रि रात्रिराणिभानने शैलवंशवैजयन्ति जन्तवो जयन्ति ते ॥ ३

आनने त्वदीयनाम पावना च पावनं यस्य पुण्यपूरुषस्य पूरुषार्धविग्रहे ।
सानुमन्महेन्द्रपुत्रि संमदाय भूयसे बंधनालयो-पि तस्य नन्दनं वनं यथा ॥ ४

नामकीर्तनेषु या षडाननस्य षड्विधात्
शब्दतो पि भाषिता त्पृथक्पदा मिशोभितात् ।
उन्नतैकनादतो गजाननस्य बृंहितात्
तृप्ति मेति पुत्रयोः समापि सा जय त्युमा ॥ ५

मुग्धमित्रमानसे महान्धकार बन्धुरे निद्रिता मुमां निजे बहि र्गवेषय स्यहो ।
त त्प्रविश्य पश्य वेददीपकेन तां ततः तारशब्दबोधितां विहाय साध यामृतम् ॥ ६

आदिमो विभोः सुतो यदीयमूल माश्रितः कुञ्जराननो बिभर्ति सा लता तनौ तता ।
अग्रतो ददाति किंचि दम्बुजं मरन्दव त्तत्र शक्ति रुत्तमा प्रबोधयन्ति तां विदः ॥ ७

द्वादशान्तशायिनी हृदम्बुजा न्तरस्थिता मंडलद्वयालया सिताद्रिशृंगचारिणी ।
सर्वभूतजालभर्तु रासनार्धभागिनी भूति मुत्तमां तनोतु भूभृतः सुता तव ॥ ८

क्षत्रमर्दनप्रसू रसूरिलोक दुर्गमा दुर्गमाटवी विहारलालसा मदालसा ।
नित्यशक्तिपौरुषा ममांघ्रिमूलवासिनः सत्यकीर्ति रार्तिजालहारिणी हर त्वघम् ॥ ९

शक्तिधारिणः सवित्रि सर्व शक्तिमत्युमे भक्तिमज्जनोग्रपापनिग्रहे धृतग्रहे ।
देवमौलिरत्नकान्ति धौतपादुकाय ते सर्व मङ्ये मदीय मात्मना सहा र्पयते ॥ १०

॥ सप्तमं दशकम् ॥

जंभारिमुख्यसुरसंभाविता बहुलदंभात्मना मसुलभा
पुंभावदक्ष सनिशुंभादि बन्धुगण शुंभासुरेन्द्र दमनी ।
कुंभापहासि कुचकुंभा नभोरुजितरंभाऽनुरक्तहृदया
शंभा विभेन्द्रमुखडिंभा करोतु तव शं भामिनीमणि रुमा ॥ १

तारावलीतुलितहारालि शोभिकुचभराऽलसालसगतिः
धाराधराभ कचभारा सुपर्वरिपुवीराभिमान शमनी ।
नीराटकेतुशरधाराभदृष्टि रतिधीरा धराधरसुता
वाराणसीवसति वाराशितृणरति राराध्यता मयि सखे ॥ २

ख्याता मुनीन्द्रजनगीता मयूरहयपोताऽतिचित्रचरिता
शीताचलाधिपतिजाता प्रभातयमताताविशेषचरणा ।
पूता पिनाकधरपीताधरा त्रिदिवपातालभूतलजुषां
सा तापजात मविगीताऽखिलं हरतु माता कटाक्षकलया ॥ ३

खण्डामृतद्युतिशिखण्डा महोग्रतरभण्डादि दैत्यदमनी
चण्डानलाब्यकुलकुण्डालया विहितदंडा खलाय भुवने ।
शुण्डालभूमिपतितुण्डा धिभूततरुषण्डा चलाण्डघटमृ
त्पिण्डायिता सकलपिण्डान्तरस्थमणिभाण्डायिताऽस्तु शरणम् ॥ ४

राकासुधाकरसमाकारहासधुतभीका भवाब्धितरणे
नौका कटाक्षधुतशोका महामहिमपाकारिणाऽपि विनुता ।
एकाम्बिका सकललोकावले रचलतोकायिता खिलघन
श्रीका नतस्य मम सा कालिका कमलनीकाशदृक् दिशतु शम् ॥ ५

नीलालका मधुरशीला विधूतरिपुजाला विलासवसतिः
लोला दृशोः कनकमालावती विबुधलीलावती परिवृता ।
कीलालजाप्तमुखहेला जितामृतकरे लातले निवसतां
शालारुचा मजिनचेलाऽवला कपटकोटानुजा दिशतु शम् ॥ ६

अव्या दुदारतरपव्यायुधप्रभृति हव्याशि कीर्तित गुणा
गव्याज्यसंमिलित कव्याशिलोक नुतभव्याऽतिपावन कथा ।
श्रव्या सदा विविधनव्यावतारवर कव्यारभव्यभिरता
दिव्याकृति स्तरुणरव्याभपा दखिल मव्यात्मजा तव कुलम् ॥ ७

दोषाकरार्धकविभूषा कटाक्षधुतदोषा निरन्तरमन
स्थोषा परा कलुषकाषायधारियतिवेषाऽनवाप्यचरणा ।
भाषावधूदयितशेषाहिशायिविनुतैषा विषादशमनी
पोषाय पापततिशोषाय चाऽस्तु कुलयोषा भवस्य भवताम् ॥ ८

वन्दारुसाधुजनमन्दारवल्लि ररविन्दाभ दीर्घनयना
कुन्दालिकल्परदबृन्दा पदाब्जनतबृन्दार केन्दुवदना ।
मन्दा गता वलममन्दा मतौ जितमुकुन्दाऽसुरप्रशमनी
नन्दात्मजा दिशतु शं दारुणाघततिभिन्दान नामनिवहा ॥ ९

श्यामा कदंबवनधामा भवार्तिहरनामा नमज्जनहिता
भीमा रणेषु सुरभामावतंससुमधामा नुवासितपदा ।
कामाहितस्य कृतकामा किलालमभिरामा रमालयमुखी
क्षेमाय मे भवतु वामा कदंबकललामायिता भगवती ॥ १०

॥ अष्टमं दशकम् ॥

जलरुहं दहरं समुपाश्रिता जलचरध्वज सूदनसुन्दरी ।
हरतु बोधदृगावरणं तमो हृदयगं हसितेन सितेन ते ॥ १

नमद: मर्त्यकिरीटकृतै: किणै: कमठपृष्ठनिभे प्रपदेऽङ्किता ।
अजिनचेल वधू र्विदधातु मे वृजिनजाल मजाल मविक्रमम् ॥ २

ललितया नतपालनलोलया प्रमथनाथ मनोहर लीलया ।
किरिमुखीमुखशक्त्युपजीव्यया विदितयादितया गतिमा नहम् ॥ ३

अमृतदीधिति पोतवतंसया कृतपदानत पापनिरासया ।
गतिम दर्थनरा कृतिचित्रया भुवन मेव न मे कुल मार्यया ॥ ४

अगणयं न च गोष्पदव द्यदि त्रिभुवनं कुतले न तरामि किम् ।
शरणवा नह मुत्तमभावया गिरिजया रिजयावितदेवया ॥ ५

सकरुणा कुशलं तव रेणुका तनु रुमा तनुता दुदितो यत: ।
अवतर: सहते स्म सनासुमि: मुररिपो ररिपोत मपि स्थितम् ॥ ६

दशरथात्मजपूजित मीश्वरं विदधती रतिनाथवशं गतम् ।
दिशतु व: कुशलं नगवर्धनी हरिहया रिहयान मृगेश्वरा ॥ ७

जननि शुंभनिशुंभमहासुरो न्मथन विश्रुतविक्रमया त्वया ।
जगद रक्ष्यत गोपकुलेशितु: तनुजया नुजया र्जुनसारथे: ॥ ८

चरणयो र्धृतया विजयामहे जगति माररिपुप्रियभामया ।
शशिकलामल मन्दरहासया नगजया गजयानविलासया ॥ ९

इम मगाधिपनन्दिनि कल्किनं रुष मपोह्य हरस्य विलोकितै: ।
कलुषनाशन भीमदृशोल्लस न्मदनकैरवकै रव लोचने ॥ १०

॥ नवमं दशकम् ॥

स जयति पुण्यकुलेषु भ्राम्य न्गणनाथ मातु रालोक: ।
य मनुचरतो जनार्दन कुलतरुणी देवता च गिराम् ॥ १

कस्य प्रबलप्रतिभट भुजकंडूवारणं मह द्वीर्यम् ।
कस्य गिरा मिह सर्गो युगस्य परिवर्तनेऽपि पटु: ॥ २

कस्य पुन रन्तरात्मनि संगसहस्रै रचालिता निष्ठा ।
धूर्जटिदयिते युष्मद् दृगन्तभृत मन्तरा धन्यम् ॥ २

यस्य निदान मविद्या ममकारः पूर्वरूप मंकुरितः ।
रूपतापत्रितयं सत्संगः किंचि दुपशान्त्यै ॥ ४

अन्तःकरणं स्थानं प्रकोपनो विषयपंचकाभ्यासः ।
मुक्तिः सुषुप्तिसमये पुन रागमनाय घोराय ॥ ५

लोभाभिलाषरोषाः कफमारुतमायव स्त्रयो दोषाः ।
अरुचिः पथ्ये भूय स्यनुबन्धोपद्रवो घोरः ॥ ६

तस्य प्रयच्छ शमनं संसाराख्यस्य सुमहतो व्याधेः ।
मृत्युंजयस्य भामिनि भेषज मालोकितं नाम ॥ ७

भवदीयस्य भवानि प्रसिद्धचरिते ते कटाक्षमेघस्य ।
प्रावृट्परितापहृतो भव्यामृतवर्षिणः करुणा ॥ ८

राजोग्रदृष्टि रुग्रो युवराजः सन्ततं मदोपेतः ।
तव राज्ञि न करुणा चे द्भुवनस्य कथं शुभं भवतु ॥ ९

राज्ञि तव दृष्टि रवने जागर्ति सतां सदाऽपि खेलन्त्याः ।
तपतोऽपि नित्य मीशो लोलो लीलासु ते भवति ॥ १०

॥ दशमं दशकम् ॥

पदकमलात्र त्रिकलुष हर्त्री । जयति शिवेति त्रिभुवनभर्त्री । १
अधितनुदृष्टि स्तटि दधिभूतम् । प्रमदपतेः सा सुदृ गधिदैवम् ॥ २
स्वनयनवृत्तौ स्थिरचरणानाम् । द्विदलसरोजे भगवति भासि ॥ ३
दहरसरोजे निहितपदानाम् । द्विदलसरोजा दवतरसि त्वम् ॥ ४
अयिकुलकुण्डे धृतचरणानाम् । दशशतपत्रं व्रजसि तपन्ती ॥ ५

दहरसरोजे दश मपिहित्वा । विषयपराणां स्खलसि बहिस्त्वम् ॥ ६

स्खलसि यतस्त्वं स भवति हीनः । विलससि यस्मि न्स खलु महात्मा ॥ ७

दृशि दृशि चित्त्वं हृदि हृदि सत्ता । प्रतिनरशीर्षं प्रमदकलाऽसि ॥ ८

तव लहरीषु त्रिपुरविरोधी । कि मिव न चित्रं जननि करोति ॥ ९

हरशिरसो गौर्यवसि जग त्त्वम् । गणपतिशीर्षा दव मुनिभूमिम् ॥ १०

इतिश्री भगवन्महर्षि रमणाऽन्तेवासिनो वासिष्ठस्य नरसिंहसूनो
र्गणपतेः कृतिः उमाशतकं समाप्तम् ·

विजयवाड, वैश्यरत्न मुद्राक्षरशालायां मुद्रापिता - शा.श. १८८०.